
भगवद्रामानुजाचार्यविरचितम्

गद्यत्रयम्

शरणागतिगद्यम् श्रीरंगगद्यम् वैकुण्ठगद्यम्



संस्कृत संशोधन संसत्
अधीना : उच्च शिक्षण विभागः (विश्वविद्यानिलयः)
मेलुकोटे - ५७१ ४३१

भगवद्रामानुजग्रन्थमाला
गद्यत्रयम्
संस्कृत-संशोधन-संसत्
यादवाद्रिः (मेलुकोटे) - ५७१ ४३१

प्रधानसम्पादकः
डा.प्रो. भाष्यम् स्वामी, एम्.ए. पिहेच्.डि., डि.लिट्
निर्देशकः सहकार्यदर्शी च
संस्कृत-संशोधन-संसत्, मेलुकोटे

प्रकाशनम्
संस्कृत-संशोधन-संसत्
यादवाद्रिः (मेलुकोटे) - ५७१ ४३१

प्रथमसंस्करणम् - २००९
द्वितीयसंस्करणम् - २०१४
प्रतयः - ५००
मूल्यम् - ₹ १३०-००

अक्षरसंयोजनम् - मुद्रणञ्च
संस्कृत-संशोधन-संसत्
यादवाद्रिः (मेलुकोटे) - ५७१ ४३१
कर्नाटक

Academy of Sanskrit Research series - 65

GADYATRAYAM

of

Bhagavad Rāmānujācārya

With Śrutaprakāśikābhāṣya of Sudarśanasūri

and

Rahasyarakṣā of Vedāntadeśika

Academy of Sanskrit Research

MELKOTE - 571 431

2009, 2014

Bhagavad Rāmānuja Granthamālā
GADYATRAYAM
Academy of Sanskrit Research
Melkote - 571 431

Chief Editor
Dr. Prof. Bhashyam Swamy *M.A. Ph.D., D.Litt.*
Director & Joint Secretary
Academy of Sanskrit Research
Melkote - 571 431

Publisher
Academy of Sanskrit Research
Melkote - 571 431

ISBN. 978-81-85929-99-6

First Edition : 2009
Second Edition : 2014
Copies : 500

PRICE : ₹ 130.00

Typeset & Printed at :
Academy of Sanskrit Research
Melkote - 571 431
Karnataka

सम्पादनमण्डली

प्रधानसम्पादकः

***डा.प्रो. भाष्यम् स्वामी** एम्.ए. पिहेच्.डि., डि.लिट्*

निर्देशकः सहकार्यदर्शी च, संस्कृत-संशोधन-संसत्, मेलुकोटे

सम्पादकः

***विद्वान् एस्. नारायणः**, एम्.ए. (संस्कृत), एम्.ए. (कन्नड)*

अलङ्कारविद्वान्, विशिष्टाद्वैतवेदान्ताचार्य

संशोधनाधिकारी, संस्कृत-संशोधन-संसत्, मेलुकोटे

संशोधनसहायकः

विद्वान् एस्.एन् आनन्दाळवार्

विशिष्टाद्वैतवेदान्तविद्वान्

तान्त्रिकसहायकाः

श्री जवरेगौडः

श्रीमती डि. एन्. सौभाग्या

श्री के.एस्. बेट्टस्वामिगौडः

श्री जि.एन्. बेट्टेगौडः

Editorial Board

"About this Edition"

Since 1977, the Academy of Sanskrit Research, Melukote, has been the torch bearer of our vast and rich Sanskrit cultural heritage, especially in the sphere of Viśiṣṭādvaita philosophy of Śrī Rāmānujācārya. The Academy has brought out many of the old Sanskrit works into the public domain that are easy to read, understand and contemplate.

The **Gadyatrayam** is a prose-poetry on the exalted dvaya-mantra, mantraratna which, together with stotra-ratna (by Swāmi Ālavandār) and purāṇa-ratna (Viṣṇupurāṇa) that propounds the essence of Śrī Vaiṣṇavism. Gadyatrayam was published by our Academy in the year 2009. The first edition of Gadyatrayam was a tremendous success among national and international readers and lovers of Indian philosophy, especially, classical Sanskrit literature, and we are proud to convey that the book ran out of print in a very short time. The demand for the publication of the book has increased globally and the Academy is receiving requests from all the quarters of readers for a re-print edition of the book. Hence the Academy has re-printed Gadyatrayam in 2014 to fulfill the requests of our valuable readers.

On this occasion, the Academy requests all the scholars and readers to read and meditate on the knowledge conveyed by Gadyatrayam and experience the bliss that is felt within oneself.

The patrons for this great work are the Management of the Academy and the State Government of Karnataka. The Academy is very much grateful for the contributions made by the scholars of the

Academy, the printing team, Art designer and the binders of the book, for making the re-print of the auspicious Gadyatrayam to happen on time.

We look forward to enterprising years ahead as we have several good and rare publications to be brought out in the year of millennium celebration of our Humanitarian Ācārya par excellence Bhagavad Rāmānujācārya in 2017.

Place : Melkote
Date : 15-04-2014

(S. Kumara)
Director & Registrar (Admin.)
Academy of Sanskrit Research
Melkote

Foreword

The great Apostle Bhagavad Rāmānujācārya who flourished in the eleventh century, postulated Bhakti as universal medium through which one could, not only liberate himself from wordly tribulations but also attain the supremely blissful abode of the Lord Śrīmannārāyaṇa.

Among the stupendous works of Ācārya Rāmānuja, Gadya-traya, an encomium of infinite virtues and attributes of the Lord, sung in prose-poetry. This Magmum Opus of the great Ācārya has all prose-lyrical nuances.

As the name suggests 'Gadya-traya-triad of Gadyas' (Proses) is comprising three gadyas such as Śaraṇāgati Gadya, Śrī Raṅga Gadya and Vaikuṇṭha Gadya.

In the first of the Gadyas, Śaraṇāgati, there is the conversation between Ācārya and the Lord Śrīmannārāyaṇa Himself, wherein **'Prapatti'**-Utter dependence on the Lord, appreciated as the only way to 'release' to be with the Supreme Lord, proffering service unto Him in **'paramapada,'** the supreme abode. Ācārya Rāmānuja has detailed here about the ways of utter devotion unto the Lord. In second of the Gadyas, Śrī Ranga Gadya furthering the thought of the first, Rāmānuja has put forth elaborately and deeply the desire to serve the Lord, begs of Him to bestow unflappable devotion to the Lord. In the last of the Gadyas Vaikuṇṭha Gadya, Ācārya Rāmānuja presents the discription of supremely beautiful abode of the Lord, which as a ultimate Goal attainable, if the seeker of ultimate joy, adopting the path of devotion to Lord, to reach it.

The crux of this work emphasizes the complete self - surrender to the Lord, as the cause of ultimate bliss.

This edition is presented with two beautiful elucidations in Sanskrit 'Rahasyarakṣā' of Vedāntācārya and Śrutaprakāśikā Bhāṣya of Sudarśanasūri.

I wish to express my sincere thanks to Vidwān S. Narayana, the Research Officer, Vidwān S.N. Anandlwar, Junior Research Assistant, and Vidwān K.N. Rangapriya Junior Research Assistant for their rich contribution by bringing this critical edition in a record time.

I would like to thank the team of Mr. Lokesh - the Artist designer including Vidwān H.S. Hanumantha Rao, the Granthapala of the Academy for having brought out unique and effective cover page designs for this edition. Appreciations are also due to the team of DTP & in-house print division consisting of M/s Javare Gowda, Smt. D.N. Sowbhagya, K.S. Betta Swamy Gowda & G.N. Bette Gowda.

I will be failing in my duty if I don't thank our President, Sri G. Kumar Naik, I.A.S., the former Secretary cum Treasurer, Sri Chakravarthi Mohan, I.A.S., and Present Secretary cum Treasurer Sri P. Maheswar Rao I.A.S., for their source of inspiration and support and also to my beloved colleagues - the Registrar Sri B.S. Krishna Prasad & the Asst. Registrar Sri S. Kumar and all the staff who have directly or indirectly contributed in this endeavor. Thanks are also due to the Binder - Mr. Prasanna of Mysore.

My special thanks are due to the members of the Managing Committee for their support and the Government of Karnataka for their timely financial aid without which the Academy could not have undertaken such monumental works.

I am sure the edition will be well received by the Sanskrit Scholarly World and would be used as a useful guide in any of their related research activities.

Ist March 2009
Melkote

Dr. Bhashyam Swamy
Director & Joint Secretary

Introduction

Gadyatraya, a prose poem composed in a supremely blissful trance of overwhelming experience of the divine by Bhagavad Rāmānuja. This poem written in prose is a stream of uninterrupted flow pen picturing the transcendental experience with the divine, of the divine, about the divine by Bhagavad Rāmānuja, who is a confluence of a great intellect, philosopher, profound mystic above all a true altruist.

He is an altruist not only for his sharing of eternally elusive experience of the divine with the common folk but also in inviting each one to offer in his capacity the service unto Supreme Lord to vouchsafe His unconditional compassion, again to serve Him eternally in His sublimely transcendental abode Śrīvaikuṇṭha, here-after. What an objective he has in mind for the devotee of the Lord to uplift him from the depths of tribulations of mundane world, to make him ever joyful in the services of the Lord, wherein he is untouched by worldly miseries.

Bhagavad Rāmānuja in his encomium on the Supreme Lord Nārāyaṇa, with all humility converses with him, plead him, to be ever gracious in granting an opportunity to remain subservient eternally to the Lord. (To His holy feet)

The poet in Rāmānuja carves an image of sublimely marvelous abode of Śrīmannārāyaṇa namely 'Vaikuṇṭha', there is a lucid lyrical flow, at times prolix though, in the description of ever happy place, which is redundant with golden gardens of fabulous flowers, ponds, promenades so goes the commentary, of the abode devoid of even an iota of earthly blemish, the ultimate destination, every Śrīvaiṣṇava should aspire to reach

to. ŚrīRaṅgam, the holiest among the shrines of Viṣṇu, has been the place of description with its Lord Śrī Raṅganātha, the supreme deity of the shrine, in one of the gadyas, Bhagavad Rāmānuja reiterates that 'ŚrīRaṅgam' is the designated replica of heavenly Vaikuṇṭha according to the will of Lord Śrīmannārāyaṇa himself.

Even as Śrīmannārāyaṇa rests on Lordly serpent Ādiśeṣa in his transcendental realm 'Vaikuṇṭha', his sportly-will is the cause of origination of ŚrīRaṅgam in this physical universe. The shrine at 'ŚrīRaṅgam' since has been highly regarded revered by every devotee of Viṣṇu.

The triad of gadyas essentially strives to emphasize on one aspect 'Bhakti', devotion to the god, which still has a better epithet in 'prapatti', complete surrender unto the god, taking succor in Him like Vibhīṣaṇa in Lord ŚrīRāma. 'Bhakti', 'prapatti' or Śaraṇāgati one may choose any of these paths leading to Divinely experience, even as every human being is divinely potential to attain to god, considering his sincere approach with non-attachment, Uninterrupted discharge of one's prescribed duties, and knowledge of one's self being subservient to the supreme being, Śrīmannārāyaṇa.

Dr. Bhashyam Swamy
Director & Joint Secretary

प्रस्तावना

शरणागति, श्रीरङ्ग, वैकुण्ठाख्यं द्वयविवरणरूपात्मकं गद्यत्रयम् । गद्यानां त्रयम् गद्यत्रयम् । श्रीवैष्णवसम्प्रदाये रहस्यत्रयमस्ति तत् मूलमन्त्रं, द्वयं, चरमश्लोक इति । अष्टाक्षरमन्त्रः मूलमन्त्रः **'ओं नमो नारायणाय'**, 'द्वयं **श्रीमन्नारायणचरणौ शरणं प्रपद्ये', 'श्रीमते नारायणाय नमः,'** चरमश्लोकस्तु **'सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज'** इत्यादि । तत्र द्वयविवरणरूपं गद्यत्रयम् । तदुक्तं पाञ्चरात्ररक्षायां - **'द्वयव्याख्यानरूपे गद्यत्रये'** इति । द्वयस्य पूर्वाङ्गः तिरुमन्त्रापरनामधेयमूलमन्त्रः साध्यनारायणाष्टाक्षरः **'ओं नमो नारायणाय'** इति, उत्तराङ्गः भगवद्गीतोक्तेन चरमश्लोकः **सर्वधर्मान्** इति । एतेषामाहत्य रहस्यत्रयम् । **'द्वयमर्थानुसन्धानेन सह सदा एवं वक्ता यावत् शरीरपातम्'** इति भगवदाज्ञा एव मूलकारणम् । गद्यत्रयं प्रतिदिनं श्रीवैष्णवैः प्रपन्नजनैः प्रतिदिनमनुसन्धीयते । द्वयाख्यं शरणागतिमन्त्रः निष्ठाद्वयं बोधयति । उपायनिष्ठा, उपेयनिष्ठेति निष्ठाद्वयम् । परमात्मा एव उपायः स एव उपेयः । साध्यं साधनं द्वयमपि स एव । जीवात्मा अथवा चेतनः नित्यं उपायस्तरे अनुष्ठाय मोक्षानन्तरं उपेयस्तरे अनुष्ठेयः ।

उपायानुभवतः प्रक्रम्य उपेयानुभवे समाप्तिं गमिष्यति गद्यत्रये द्वयमन्त्रविवरणे । **'त्वत्पादारविन्दयुगलं शरणमहं प्रपद्ये'** इत्यत्र उपायानुष्ठानानुभवः । **'श्रीमत्पादारविन्दयुगलं शिरसि कृतं ध्यात्वा अमृतसागरान्तर्निमग्नसर्वावयवः सुखमासीत'** इति उपेयानुष्ठानानुभवः स अनुभवैकवेद्यः । एवं शरणागतिगद्ये, श्रीरङ्गगद्ये च उपायभूतश्रीमन्नारायणं प्रति अखिलहेयप्रत्यनीकेत्यादि गुणविशेषणैः संस्तुत्य अन्ते वैकुण्ठगद्ये प्राप्यभूत अनुभाव्यः वैकुण्ठं परमपदं वर्णयति । उपेयवस्तु एव प्राप्यः, प्राप्यवस्तु एव परमात्मा । भगवद्वर्णनं एवं निरूपितम् । **'तत्र...... अनन्तभोगिनी श्रीमद्वैकुण्ठैश्वर्यादि दिव्यलोकमात्मकान्त्या विश्वं आप्याययन्त्या शेषशेषाशनादि सर्वं परिजनं भगवतः तत्तदवस्थोचितपरिचर्यायाम् आज्ञापयन्त्या शीलरूप-गुणविलासादिभिः आत्मानुरूपया श्रिया सहासीनम्'** इति । एवं तस्य अवयवसौन्दर्यं, वैनतेयादिसेवा, भगवद्ध्यानादिपूर्वक आत्मसमर्पणं, अनुसन्धानं इत्यादि विषयाः

भगवद्रामानुजाचार्यैः स्वानुसन्धानपूर्वकं परमाह्लादकतया भक्त्या प्रतिपादितम् । एतादृशस्य परमात्मनः वैभवपूर्णानुभवः प्रपन्नस्य प्रतिनित्यमावश्यकम् । एष एव भक्तियोगः । तदुक्तं पाञ्चरात्ररक्षायां - **'अपि चात्र द्वयव्याख्यानरूपे गद्यत्रये निर्वेदभूयस्तया स्वरूपरूपगुणविभूतिदेवीभूषणायुध-परिजन-परिच्छदद्वारपालपार्षदादीनां यथावदनुसन्धानहेतुतया यथावस्थितस्वरूपरूपगुणविभूतिलीलोपकरण-विस्तारमनुसन्धाय तमेव शरणमुपगच्छेत्'** अखिलेत्यादिना समाराधनादौ अन्ते च भाष्यकारैः एव विनियुक्तम् । श्रीवैकुण्ठगद्यन्तु -

'यामुनार्यसुधाम्बोधिमवगाह्य यथामति ।
आदाय भक्तियोगाख्यं रत्नं सन्दर्शयाम्यहम्' ।।

इति प्रारम्भात् पश्चादपि **'ध्यानयोगेन दृष्ट्वा'** इत्यभिधानात् फलरूप-विलक्षणानुसन्धानभेदानां विधानात् **'अविच्छिन्नस्रोतोरूपेणावलोकयन्नासीत्'** इति कण्ठोक्तेश्च । योगार्थसङ्कल्पिते काले विशेषतो अनुसन्धेयमिति भाष्यकारातिशयः प्रतीयते । यामिन्यां भगवद्ध्यानस्य त्वरातिशयः स्मर्यते -

'उपपातकयुक्तेऽपि महापातकवानपि ।
यामिन्यां पादमेकन्तु ब्रह्मध्यानं समाचरेत्' ।। इति । (पां.र.तृतीयेऽधिकारे)

अस्य गद्यत्रयस्य पूर्वाचार्यकृताः व्याख्याः बह्व्यः आसन्, इति तत्र तत्र ग्रन्थानां परिशीलनेन ज्ञायते । परन्तु इदानीं पेरियवाच्चान् पिळ्ळै कृतं द्राविडव्याख्यानम् तथा वेदान्तदेशिकभाष्यं; सुदर्शनसूरिकृतं शरणागतिगद्यस्य व्याख्यानम् लभ्यते ।

ग्रन्थकर्तॄणां तथा व्याख्याकाराणां संक्षिप्तः परिचयः -

१. श्रीभगवद्रामानुजाचार्याः -

एते च भाष्यकाराः भगवद्रामानुजाचार्याः तमिल्नाडु प्रान्तीये श्रीमति भूतपुरीनाम्न्यग्रहारे कृतावताराः । **'श्रीपेरुम्बुदूर्'** इति द्राविडभाषानाम । क्रिस्ताब्दः १०१७ तः, ११३७ पर्यन्तः एषां जीवितकालः इति गुरुपरम्परावैभवादवगम्यते ।

'चैत्रा(मेषा)र्द्रासंभवं विष्णोः दर्शनस्थापनोत्सुकम् ।
तुण्डीरमण्डले शेषमूर्तिं रामानुजं भजे' ।।

इति च जन्मादिविषयकः श्लोकः । आदिशेषावताररूपा एते हारीतगोत्रलब्धजन्मानः । तातपादा एतेषां केशवसोमयाजिनामानः । प्रख्यातं वंशनामापि आसूरीति । एतेषां मातृभावेन पुण्यवती कान्तिमतीनाम्नी । भूदेवीत्यपि एनां जनाः व्यवहरन्ति स्म । एषा शठमर्षणगोत्रसम्भवस्य श्रीमन्नाथमुनिवंश्यस्य श्रीशैलपूर्णाख्यस्य गुरोः सोदरी । तद्वंशीयाः **'ताताचार्य'** संज्ञया लोके व्यवह्रियमाणाः विलसन्ति । अभिजनमातापितृवर्णनपरोऽयं श्लोकः -

'श्रीमन्महाभूतपुरे श्रीमत्केशवयज्वनः ।
कान्तिमत्यां प्रसूताय यतिराजाय मङ्गलम्' ।। इति ।

वडुकनम्बीति प्रसिद्धानां श्रीमताम् आन्ध्रपूर्णनाम्नामाचार्याणां श्लोकेन -

'कान्तिमतीसुकुमारकुमारं केशवसिंहकिशोरमुदारम् ।
रामानुजमहिराडवतारं मूकान्धानपि मोक्षयितारम्' ।।

इत्यनेन सर्वं स्फुटीकृतम् । एतेषामाचार्याः पेरियनम्बीति व्यवह्रियमाणाः महापूर्णार्याः । प्राचार्याश्च - परमयोगिनो नाथ (नाद)मुनि नाम्नो गुरोः पौत्राः भगवद्यामुनमुनयः । द्रमिडभाषायाम् आलवन्दार् इति प्रसिद्धाः । स्तुताश्च मुक्तकश्लोकेन तच्छिष्यैः यामुनार्यैः एतैः नाथमुनयः -

'नमोऽचिन्त्याद्भुताक्लिष्टज्ञानवैराग्यराशये ।
नाथाय मुनयेऽगाधभगवद्भक्तिसिन्धवे' ।। इति ।

भगवद्रामानुजार्याश्च -

'यत्पदाम्भोरुहध्यानविध्वस्ताशेषकल्मषः ।
वस्तुतामुपयातोऽहं यामुनेयं नमामि तम्' ।।

इति गीताभाष्यारम्भे स्वगुरून् यामुनार्यान् नमस्कृतवन्तः । भगवद्रामानुजार्याणाम् आन्तरङ्गिकतत्वार्थोपदेष्टारः कांचीपूर्णनामानः **'तिरुक्कच्चि नम्बिकल्'** इति द्राविडभाषायां प्रसिद्धाः । आन्ध्रपूर्णानां श्लोकेनैव श्रीभगवद्रामानुजसिद्धान्तसारसंग्रहः कृतो दृश्यते -

'गुणगुणिनोर्भेदः किल नित्यः चिदचिद्द्वयपरभेदः सत्यः ।
तद्द्वयदेहो हरिरिति सत्यं पश्य विशिष्टाद्वैतं तत्त्वम्' ।। इति ।

एतैः अनुगृहीताः ग्रन्थाश्च १. श्रीभाष्यम् २. गीताभाष्यम्, ३. वेदान्तदीपः, ४. वेदान्तसारः ५. वेदार्थसंग्रहः, ६. शरणागतिगद्यम्, ७. श्रीरङ्गगद्यम्, ८. वैकुण्ठगद्यम्, ९. नित्यग्रन्थः, (भगवदाराधनप्रतिपादकः इति,) आहत्य नव ग्रन्थाः ।

२. श्रीश्रुतप्रकाशिकाचार्याः-सुदर्शनसूरयः

एते च श्रुतप्रकाशिकाचार्याः श्रीरङ्गक्षेत्रे कृतावताराः । क्रिस्ताब्दे १३ तेषां जीवितकालः । एते हारितगोत्रलब्धजन्मानः । तातपादा एतेषां वाग्विजयिभट्टर् नामानः । एतेषां पितामहाः वेदव्यासभट्टर् । भगवद्रामानुजाचार्याणां प्रधान अन्तरङ्गशिष्यस्य श्री कूरेशस्य (कूरत्ताळ्वान्) प्रपौत्राः एते श्रुतप्रकाशिकाचार्याः । एते सुदर्शनभट्टर्, सुदर्शनसूरिः, व्यासभट्टर्, टीकाचार्यः, इत्यादि नामधेयैः प्रख्याताः ।

तेषां आचार्याः तावत् वात्स्यवरदाचार्याः नडादूरम्माळ् इति द्राविडभाषायां प्रसिद्धाः । भगवद्रामानुजार्यैः स्थापितेषु चतुस्सप्ततौ सिंहासनेषु अन्यतमस्य श्रीभाष्यपीठस्य अधिपतयश्च । एतेषां सविधे श्रुतप्रकाशिकाचार्याः श्रीभाष्यादि ग्रन्थान् अधीतवन्तः । आचार्यमुखेन बहुवारं श्रीभाष्यकालक्षेपं श्रुत्वा यथाश्रुतं तथैव विलिख्य रक्षितवान् । अत एव एतेषां नाम '**श्रुतप्रकाशिकाचार्यः**' इति विख्यातम् । तद्ग्रन्थः '**श्रुतप्रकाशिका**' इत्येव प्रसिद्धाभूत् ।

तस्मै रामानुजार्याय नमः परमयोगिने ।
यः श्रुतिस्मृतिसूत्राणां अन्तर्ज्वरमशीशमत् ।।
वन्देऽहं वरदार्यं तं वत्साभिजनभूषणम् ।
भाष्यामृतप्रदानात् यः सञ्जीवयति मामपि ।।

इति श्रुतप्रकाशिकाग्रन्थारम्भे परमगुरून् भगवद्रामानुजाचार्यान् तथा स्वगुरून् वात्स्यवरदार्यान् नमस्कृतवन्तः ।

एतैः अनुग्रहीताः ग्रन्थाः - १. श्रुतप्रकाशिका २. श्रुतप्रदीपिका ३. तात्पर्यदीपिका - वेदार्थसङ्ग्रहव्याख्या ४. सुबालोपनिषद्वृत्तिः ५. शरणागतिगद्यव्याख्या (इतर गद्यद्वयस्य व्याख्या लुप्ता) ६. नित्यग्रन्थव्याख्या ७. शुकपक्षीयम् (भागवतव्याख्याग्रन्थः) ८. सन्ध्यावन्दनभाष्यम् ९. प्रार्थनापञ्चकम् १०. मुक्तकश्लोकाः ११. पञ्चस्तवादिव्याख्या (लुप्तः) इत्याद्यनेके ग्रन्थाः ।

एतेषां सविधे श्री पिळ्ळैलोकाचार्याः, श्री वेदान्ताचार्याः, ईयुण्णि पद्मनाभाः इत्यादि महाचार्याः श्रीभाष्यादीन् अधीतवन्ताः ।

पूर्वाचार्यैः परिरक्षितश्रीरङ्गक्षेत्रं, श्रीरङ्गनाथकैङ्कर्यञ्च तथा श्रीभाष्यादि प्रमाणग्रन्थान् सम्यक् परिपोषितवन्तः एते । एतेषां कालानन्तरं तुरुष्कयवनाद्याक्रमणकाले श्रीपिळ्ळैलोकाचार्येण, प्रमेयं श्रीरङ्गनाथदिव्यमङ्गलविग्रहं, तथा श्रीवेदान्ताचार्येण प्रमाणं श्रुतप्रकाशिकां परिरक्ष्य उपकृतवन्तः । श्री श्रुतप्रकाशिकाचार्यस्य तनियन् (स्तुतिः)

'यतीन्द्रकृतभाष्यार्थाः यद्व्याख्यानेन दर्शिताः ।
वरं सुदर्शनार्यं तं वन्दे कूरकुलाधिपम्' ।। इति ।

३. श्रीवेदान्तदेशिकः -

श्रीवेदान्तदेशिकः - विशिष्टाद्वैतसम्प्रदाये सर्वपूर्वोत्तराचार्येभ्यः अस्य निरतिशय-वैभवम् । वेंकटनाथार्यः वेंकटेशः इति जन्मनाम्ना कीर्तितोऽसौ परपक्षनिरासपूर्वक-सिद्धान्तस्थापकबहुप्रबन्धनिर्माणालंकर्मीणत्वात् साक्षात् श्रीरंगनाथेनैव दत्तवेदान्ताचार्यबिरुदः इति प्रसिद्धिः । तदारभ्य वेदान्तदेशिकः निगमान्तगुरुः इत्यादिनामभिरेष व्यपादिश्यत । उक्तं चैतत् स्वयमेव अधिकरणसारावलेः आदौ **'विश्वस्मिन् नामरूपाण्यनुविहितयता तेन देयेन दत्तां वेदान्ताचार्यसंज्ञा अवहितबहुवित्सार्थमन्वर्थयामि'** इति । तथा संकल्पसूर्योदयनाटके प्रस्तावनायां **'विंशत्यब्दे बहुश्रुतनानाविधविद्यः - त्रिंशद्वारं श्रावितशारीरकभाष्यः'** इति स्वयमेव कीर्तनात् विंशतिवर्षमिते वयस्येव सर्वविद्यावैशारद्यं प्रापुषोऽमुष्य आचार्यतल्लजस्य जीवितकाले त्रिंशद्वारं श्रीभाष्यप्रवचनं च शिष्येभ्यः कृतमिति महतीयं असाधारणी प्रतिष्ठा । कवितार्किकसिंह इति सर्वतन्त्रस्वतन्त्र इति च समानकालिकैः विद्वद्वरैः सादरं बिरुदप्रदानेन एष समभाव्यत ।

कांच्याः समीपे तूप्पिल्नाम्नि अग्रहारे लब्धजन्मनोऽस्य जीवनकालः (क्रिस्तः १२६८ प्रभृति १३६९ पर्यन्त इति चारित्रकाः । वैश्वामित्रवंशे लब्धजनुषोऽस्य पितामहः पुण्डरीकाक्षयज्वा, पितरौ च अनन्तार्यतोतारम्बनामकौ । श्रुतप्रकाशिकाकर्तुः श्रीसुदर्शनभट्टारकस्य सब्रह्मचारितया - व्यपदिष्टात् वात्स्यवरदाचार्यशिष्येषु अग्रगण्यात् श्रीमदात्रेयरामानुजार्यात् स्वमातुलादेव सर्वविद्याधिगमः । अस्य शिष्याः आद्यब्रह्मतन्त्र-मुनीन्द्रप्रभृतयः परश्शतम् । विद्यारण्यमुनि अक्षोभ्यमुनिप्रभृतयोऽस्य समसामयिकाः भिन्नमतस्थाः प्रसिद्धविद्वांसः । कांच्यामेव स्वप्रथमवयसि सिद्धान्तप्रवर्तकतया स्थितोऽयं श्रीरंगक्षेत्रश्रियोऽभिवृद्धिमपेक्ष्य तत्रत्यैः परमभागवतैराहूतः तत्र गत्वा लम्भितोद्दामभूमा

संस्कृत-द्राविडवेदान्तप्रवचनैकपरायणः वादाहवेषु परान् प्रत्याचक्षणश्च आदेहपातमुवासेति निश्चप्रचम् ।

श्रीभाष्यकारैः भगवद्रामानुजार्यैः निर्विशेषाद्वैतमतोपरि प्रतिपादितानां दूषणानां विस्तरणार्थं वादग्रन्थरूपेण प्रवर्तिता शतदूषणी कृतिः आचार्यप्रतिभायाः पताका भवति । विशिष्टाद्वैतसिद्धान्तसर्वस्वमिति सम्भावनीयो ग्रन्थः तत्त्वमुक्ताकलापाख्याः स्रग्धरावृत्तमयश्लोक - पंचशती समुद्भासितः स्वेनैव सर्वार्थसिद्धिनामकव्याख्यया परिष्कृतः श्रीवैष्णवैः विद्वद्भिः कण्ठे धार्यं अमूल्यमाभरणम् । एकस्यामेव रात्रौ श्रीरंगनाथपादुकामुद्दिश्य निर्मितं विविधालंकारवैचित्रीबन्धुरं पादुकासहस्राभिधस्तोत्रं भावुकानां सुधास्वादवत् अमन्दानन्दसन्धायकम् । एवमस्य द्रविडभाषामया गाथाप्रबन्धा अपि बहवः उभयभाषयोः समं प्रौढिमानमाविष्कुर्वन्ति ।

'कर्मावलंबकाः केचित् केचित् ज्ञानावलंबकाः ।
वयं तु हरिदासानां पादरक्षावलंबकाः' ।

इति श्लोकेन तान् सद्यः प्रत्युत्तरयतः स्वविनयप्रदर्शनकाष्ठा हि परमविस्मयनीया । एतदीयं यादवाभ्युदयमहाकाव्यं श्रीमदप्पयदीक्षितेन आलंकारिकमूर्धन्येन व्याख्यातमित्यत एव तत्काव्यवैभवं सुगमम् । एवं काव्यनाटकविभागे, स्तोत्रविभागे, व्याख्याविभागे, द्रविडसंम्प्रदायविभागे च शताधिकान् प्रबन्धान् प्रणीतवतोऽस्य महागुरोः प्रसिद्धाः कतिपयग्रन्था इह नामतो निर्दिश्यन्ते ।

काव्यविभागे :- यादवाभ्युदयः, हंससन्देशः, सुभाषितनीवी, संकल्पसूर्योदयनाटकम् इत्याद्याः ।

शास्त्रविभागे :- शतदूषणी, तत्त्वमुक्ताकलापः सर्वार्थसिद्धिसहितः, न्यायपरिशुद्धिः, न्यायसिद्धांजनम्, सेश्वरमीमांसा, अधिकरणसारावलिः, मीमांसापादुका इत्याद्याः ।

व्याख्यानविभागे :- गीताभाष्यतात्पर्यचन्द्रिका, तत्त्वटीका, ईशावास्यभाष्यम्, स्तोत्ररत्नभाष्यम्, गद्यत्रयभाष्यम् इत्याद्याः ।

स्तोत्रविभागे :- पादुकासहस्रम्, दयाशतकम्, अच्युतशतकम्, यतिराजसप्ततिः, अभीतिस्तवः, हयग्रीवस्तोत्रम्, गरुडपञ्चाशत्, सव्याख्यन्यासविंशतिः इत्याद्याः ।

द्रविडसम्प्रदायविभागे :- सम्प्रदायपरिशुद्धिः, अभयप्रदानसारः, परमतभंगः, मुनिवाहनभोगम्, अधिकारसंग्रहः, परमपदसोपानम्, अमृतास्वादिनी, विरोधपरिहारः इत्याद्याः ।

प्रकृतं संसदा गद्यत्रयं सुदर्शनसूरिकृतव्याख्यया, वेदान्तदेशिकभाष्येण च प्राकाश्यं नीतं वर्तते । प्रथमं मूलं तदनु श्री सुदर्शनसूरिभिः विरचितं श्रुतप्रकाशिकाभाष्यं, पश्चात् वेदान्तदेशिकविरचिता रहस्यरक्षाव्याख्या च प्रकाशिता । पाठान्तरेण संवलिता । पाठभेदार्थं स्वीकृतानां ग्रन्थानां सूची अन्ते दत्ता वर्तते । अन्ते च अनुबन्धे प्रमाणाकरणां सूचनी, कारिकाणां सूचनी इत्यादिकमुपनिबद्धं वर्तते । ग्रन्थादौ अध्येतॄणां सौकर्याय गद्यत्रयस्य मूलपाठोऽपि प्रकाशितः ।

कीर्तिशेषभूतैः श्रीमद्भिः विद्वद्भिः सरगूरुमाडभूषि वरदाचार्यैः आवश्यक मार्गदर्शादिना अस्मान् उपकृतवन्तः । तेषां हार्दं कार्तज्ञ्यं अर्प्यते इयं संसत् ।

अस्य ग्रन्थस्य सम्पादनकार्ये संसदः निर्देशकाः सहकार्यदर्शिनश्च श्री उ.वे. भाष्यं स्वामीजीमहोदयाः आवश्यकान् सर्वान् मार्गदर्शनान् प्रदाय अस्मान् प्रोत्साहितवन्तः । तेभ्यः हार्दं कार्तज्ञ्यमर्पयामि । तथा संशोधनसहायकाः विद्वान् एस्. एन्. आनन्दाळवार्, तथा विद्वान् के.एन्. रङ्गप्रियः, गणकयन्त्रकार्यकर्तारौ श्री जवरेगौडः, श्रीमती डि.एन्. सौभाग्या, मुद्रणकार्यकर्तारौ श्री के.एस्. बेट्टस्वामिगौडः, श्री जि.एन्. बेट्टेगौडः, मुखपुटविन्यासकारः विद्वान् हेच्.एस्. हनुमन्तरावः, कलाकारः श्री लोकेशः, कार्यालयस्य कुलसचिवः श्री कृष्णप्रसादः, उपकुलसचिवः एस्. कुमारः, अन्येऽन्ये च आवश्यकान् सर्वान् सहकारान् प्रदाय कार्यमेतन्निर्वोढुं महान्तमानुकूल्यमापादितवन्तः इति तेभ्यः कार्तज्ञ्यमर्पयामि । श्रीमान् यदुशैलदीपः यदुगिरिनायिकासमेतः नारायणः प्रसीदतु ।।

।। इति शम् ।।

एस्. नारायणः
सम्पादकः
संशोधनाधिकारी
संस्कृत-संशोधन-संसत्, मेलुकोटे

विषयसूचनी

श्रीधराय नमः

श्रियै नमः

श्रीमते रामानुजाय नमः

यो नित्यमच्युतपदाम्बुजयुग्मरुक्म-
व्यामोहतस्तदितराणि तृणाय मेने ।
अस्मद्गुरोर्भगवतोऽस्य दयैकसिन्धोः
रामानुजस्य चरणौ शरणं प्रपद्ये ।।

श्रीभगवद्रामानुजाचार्यविरचिते गद्यत्रये

शरणागतिगद्यम्

[वन्दे वेदान्तकर्पूरचामीकरकरण्डकम् ।
रामानुजार्यमार्याणां चूडामणिमहर्निशम् ।।]

ओम् भगवन्नारायणाभिमतानुरूप-स्वरूप-रूप-गुण-विभवैश्वर्य-शीलाद्यनवधिकातिशय-असङ्ख्येयकल्याणगुणगणाम्, पद्मवनालयाम्, भगवतीम्, श्रियम्, देवीम्, नित्यानपायिनीम्, निरवद्याम्, देवदेवदिव्यमहिषीम्, अखिलजगन्मातरम्-अस्मन्मातरम्-अशरण्यशरण्याम्, अनन्यशरणः-शरणमहं प्रपद्ये ।। १ ।।

पारमार्थिक-भगवच्चरणारविन्दयुगलैकान्तिकात्यन्तिक-परभक्ति-परज्ञान-परमभक्तिकृत-परिपूर्णानवरत-नित्य-विशदतम-अनन्यप्रयोजनानवधिकातिशय-प्रिय-भगवदनुभवजनित-अनवधिकातिशयप्रीतिकारित-अशेषावस्थोचित-अशेषशेषतैकरतिरुप-नित्यकैङ्कर्यप्राप्त्यपेक्षया, पारमार्थिकी भगवच्चरणारविन्द-शरणागतिः यथावस्थिता-अविरताऽस्तु मे ।। २ ।।

अस्तु ते ।। ३।।

तयैव सर्वं सम्पत्स्यते ।। ४ ।।

अखिलहेयप्रत्यनीक-कल्याणैकतान स्वेतर-समस्तवस्तु-विलक्षणानन्त-ज्ञानानन्दैक-स्वरूप!

स्वाभिमतानुरूपैकरूपाचिन्त्य-दिव्याद्भुत-नित्य-निरवद्य निरतिशयौज्ज्वल्य-सौन्दर्य-सौगन्ध्य-सौकुमार्य-लावण्य-यौवनाद्यनन्तगुणनिधि-दिव्यरूप!

स्वाभाविकानवधिकातिशय-ज्ञान-बलैश्वर्य-वीर्य-शक्ति-तेजः-सौशील्य-वात्सल्य-मार्दवार्जव-सौहार्द-साम्य-कारुण्य-माधुर्य-गाम्भीर्य-औदार्य-चातुर्य-स्थैर्य-धैर्य-शौर्य-पराक्रम-सत्यकाम-सत्यसङ्कल्प-कृतित्व-कृतज्ञताद्यसङ्ख्येय-कल्याण-गुणगणौघ-महार्णव!

स्वोचित-विविध-विचित्रानन्ताश्चर्य-नित्य-निरवद्य-निरतिशयसुगन्ध-निरतिशयसुखस्पर्श-निरतिशयौज्ज्वल्य-किरीट-मकुट-चूडाऽवतंस-मकरकुण्डल-ग्रैवेयक-हार-केयूर-कटक-श्रीवत्स-कौस्तुभ-मुक्तादामोदरबन्धन-पीताम्बर-काञ्ची-गुण-नूपुराद्यपरिमित-दिव्य-भूषण!

स्वानुरूपाचिन्त्यशक्ति-शङ्ख-चक्र-गदाऽसिशार्ङ्गाद्यसङ्ख्येय-नित्य-निरवद्य-निरतिशयकल्याण-दिव्यायुध!

स्वाभिमत-नित्य-निरवद्यानुरूप-स्वरूप-रूप-गुण-विभवैश्वर्य-शीलाद्यनवधिकातिशयासङ्ख्येय-कल्याणगुणगण-श्रीवल्लभ!

एवम्भूत-भूमि-नीळा-नायक!

स्वच्छन्दानुवृत्ति-स्वरूप-स्थिति-प्रवृत्तिभेदाशेष-शेषतैकरतिरूप-नित्य-निरवद्य-निरतिशय-ज्ञान-क्रियैश्वर्यादि-अनन्तकल्याणगुणगण-शेष-शेषाशन-गरुड-प्रमुख-नानाविधानन्त-परिजन-परिचारिका-परिचरित-चरणयुगल!
परमयोगिवाङ्मनसापरिच्छेद्य-स्वरूप-स्वभाव-स्वाभिमत-विविध-विचित्रानन्त-भोग्य-भोगोपकरण-भोगस्थान-समृद्धानन्ताश्चर्य-अनन्तमहाविभव-अनन्तपरिमाण-नित्य-निरवद्य-निरतिशय-श्रीवैकुण्ठनाथ!

स्वसङ्कल्पानुविधायि-स्वरूप-स्थिति-प्रवृत्ति-स्वशेषतैकस्वभाव-प्रकृति-पुरुष-कालात्मक-विविध-विचित्रानन्त-भोग्य-भोक्तृवर्ग-भोगोपकरण-भोगस्थानरूप-निखिल-जगदुदयविभवलयलील!

सत्यकाम! सत्यसङ्कल्प! परब्रह्मभूत! पुरुषोत्तम! महाविभूते! श्रीमन्! नारायण! वैकुण्ठनाथ!

अपार-कारुण्य-सौशील्य-वात्सल्य-औदार्य-ऐश्वर्य-सौन्दर्य-महोदधे ! अनालोचितविशेषाशेष-लोकशरण्य! प्रणतार्तिहर! आश्रितवात्सल्यैकजलधे! अनवरतविदित-निखिल-भूतजात-याथात्म्य! अशेष-चराचरभूत-निखिल-नियमन-

निरत! अशेष-चिदचिद्वस्तु-शेषिभूत! निखिल-जगदाधार! अखिलजगत्स्वामिन्! अस्मत्स्वामिन्! सत्यकाम! सत्यसङ्कल्प! सकलेतरविलक्षण! अर्थिकल्पक! आपत्सख! श्रीमन् ! नारायण! अशरण्यशरण्य! अनन्यशरणः, त्वत्पादारविन्दयुगलं शरणमहं प्रपद्ये ।। ५ ।।

अत्र द्वयम् ।। ६ ।।

पितरं मातरं दारान् पुत्रान् बन्धून् सखीन् गुरून् ।
रत्नानि धन-धान्यानि क्षेत्राणि च गृहाणि च ।। ७ ।।
सर्वधर्मांश्च सन्त्यज्य सर्वकामांश्च साक्षरान् ।
लोकविक्रान्तचरणौ शरणं तेऽव्रजं विभो!।। ८ ।।
त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च गुरुस्त्वमेव ।
त्वमेव विद्या द्रविणं त्वमेव त्वमेव सर्वं मम देवदेव ।। ९ ।।
पिताऽसि लोकस्य चराचरस्य
त्वमस्य पूज्यश्च गुरुर्गरीयान् ।
न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यो
लोकत्रयेऽप्यप्रतिमप्रभाव! ।। १० ।।
तस्मात्प्रणम्य प्रणिधाय कायं प्रसादये त्वामहमीशमीड्यम् ।
पितेव पुत्रस्य सखेव सख्युः प्रियः प्रियायाऽर्हसि देव! सोढुम् ।। ११ ।।

मनोवाक्कायैः अनादिकालप्रवृत्तानन्त-अकृत्यकरण-कृत्याकरण-भगवदपचार-भागवतापचार-असह्यापचाररूप-नानाविधानन्तापचारान्; आरब्धकार्यान्-अनारब्धकार्यान्; कृतान्-क्रियमाणान्-करिष्यमाणांश्च-सर्वान् अशेषतः क्षमस्व ।। १२ ।।

अनादिकालप्रवृत्तं विपरीतज्ञानम् आत्मविषयम्-कृत्स्नजगद्विषयं च; विपरीतवृत्तं च अशेषविषयम्, अद्याऽपि वर्तमानं वर्तिष्यमाणं च सर्वं क्षमस्व ।। १३ ।।

मदीयानादिकर्मप्रवाहप्रवृत्ताम्, भगवत्स्वरूपतिरोधानकरीं, विपरीतज्ञानजननीं, स्वविषयायाश्च भोग्यबुद्धेर्जननीं, देहेन्द्रियत्वेन-भोग्यत्वेन-सूक्ष्मरूपेण चावस्थितां, दैवीं, गुणमयीं, मायाम्; दासभूतः,'शरणागतोऽस्मि; तवाऽस्मि दास' इति वक्तारं मां तारय ।। १४ ।।

'तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते ।
प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः' ।।
'उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतम् ।
आस्थितः स हि युक्तात्मा मामेवानुत्तमां गतिम्' ।।
'बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते ।
वासुदेवः सर्वमिति स महात्मा सुदुर्लभः' ।।
इति श्लोकत्रयोदित-ज्ञानिनं मां कुरुष्व! ।। १५ ।।
'पुरुषः स परः पार्थ! भक्त्या लभ्यस्त्वनन्यया' ।
'भक्त्या त्वनन्यया शक्यः', 'मद्भक्तिं लभते पराम्' इति स्थानत्रयोदित-परभक्तियुक्तं मां कुरुष्व! ।। १६ ।।

परभक्ति-परज्ञान-परभक्त्येकस्वभावं मां कुरुष्व! ।। १७ ।।

परभक्ति-परज्ञान-परमभक्तिकृत-परिपूर्णानवरत-नित्य-विशदतम-अनन्यप्रयोजनानवधिकातिशयप्रिय-भगवदनुभवोऽहम्, तथाविध-भगवदनुभव-जनितानवधिकातिशय-प्रीतिकारित-अशेषावस्थोचित-अशेष-शेषतैकरतिरूप-नित्यकिङ्करो भवानि ।। १८ ।।

एवम्भूत-मत्कैङ्कर्य-प्राप्त्युपायतया-अवक्लृप्त-समस्त-वस्तु-विहीनोऽपि, अनन्त-तद्विरोधि-पापाक्रान्तोऽपि, अनन्त-मदपचार-युक्तोऽपि, अनन्त-मदीयापचार-युक्तोऽपि, अनन्तासह्यापचार-युक्तोऽपि, एतत्कार्य-कारणभूतानादि-विपरीताहङ्कार-विमूढात्मस्वभावोऽपि, एतदुभय-कार्यकारणभूतानादि-विपरीत-वासना-सम्बद्धोऽपि,एतदनुगुण-प्रकृतिविशेष-सम्बद्धोऽपि, एतन्मूल-आध्यात्मिक-आधिभौतिक-आधिदैविक-सुख-दुःख-तद्धेतु-तदितरोपेक्षणीय-विषयानुभव-ज्ञानसङ्कोचरूप-मच्चरणारविन्दयुगलैकन्तिकात्यन्तिक-परभक्ति-परज्ञान-परमभक्ति-विघ्नप्रतिहतोऽपि; येनकेनाऽपि प्रकारेण द्वयवक्ता त्वम्; केवलं मदीययैव दयया; निश्शेष-विनष्ट-सहेतुक-मच्चरणारविन्दयुगलैकान्तिकात्यन्तिक-परभक्ति-परज्ञान-परमभक्तिविघ्नः; मत्प्रसादलब्ध-मच्चरणारविन्दयुगलैकान्तिकात्यन्तिक-परभक्ति-परज्ञान-परमभक्तिः; मत्प्रसादादेव साक्षात्कृत-यथाऽवस्थित-मत्स्वरूप-रूप-गुणविभूति-लीलोपकरणविस्तारः; अपरोक्षसिद्ध-मन्नियाम्यता-

मद्दास्यैकस्वभावात्मस्वरूपः ; मदेकानुभवः; मद्दास्यैकप्रियः; परिपूर्णानवरत-नित्य-विशदतमानन्यप्रयोजन-अनवधिकातिशयप्रिय-मदनुभवस्त्वम्; तथाविधमदनु-भव-जनितानवधिकातिशय-प्रीतिकारित-अशेषावस्थोचित-अशेषशेषतैकरतिरूप-नित्यकिङ्करो भव! ।। १९ ।।

एवम्भूतोऽसि ।। २० ।।

आध्यात्मिक-आधिभौतिक-आधिदैविक-दुःख-विघ्न-गन्ध-रहितस्त्वम्, द्वयमर्थानुसन्धानेन सह सदैवं वक्ता; यावच्छरीरपातम् अत्रैव श्रीरङ्गे सुखमास्स्व ।। २१ ।।

शरीरपातसमये तु, केवलं मदीययैव दयया अतिप्रबुद्धः, मामेवाऽवलोकयन्, अप्रच्युतपूर्वसंस्कारमनोरथः, जीर्णमिव वस्त्रं सुखेन, इमां प्रकृतिं स्थूलसूक्ष्मरूपां विसृज्य, तदानीमेव मत्प्रसादलब्ध-मच्चरणारविन्दयुगलैकान्तिकात्यन्तिक-परभक्ति-परज्ञान-परमभक्तिकृत-परिपूर्णानवरत-नित्य-विशदतम-अनन्यप्रयोजनानवधिकातिशय-प्रियमदनुभवजनित-अनवधिकातिशय-प्रीतिकारित-अशेषावस्थोचिताशेष-शेषतैकरतिरूप नित्यकिङ्करो भविष्यसि! मा ते भूदत्र संशयः ।। २२ ।।

'अनृतं नोक्तपूर्वं मे न च वक्ष्ये कदाचन' । रामो द्विर्नाभिभाषते -

'सकृदेव प्रपन्नाय तवाऽस्मीति च याचते ।
अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम' ।।
'सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः' ।।

इति मयैव ह्युक्तम् ।। २३ ।।

अतस्त्वं तव तत्त्वतो मज्ज्ञानदर्शनप्राप्तिषु निस्संशयः, सुखमास्स्व! ।। २४ ।।

[तृणीकृतविरिञ्चादि निरङ्कुशविभूतयः ।
रामानुजपदाम्भोजसमाश्रयणशालिनः] ।। २५ ।।

अन्त्यकाले स्मृतिर्या तु तव कैङ्कर्यकारिता ।
तामेनां भगवन्! अद्य क्रियमाणां कुरुष्व मे ।। २६ ।।

।। इति श्रीभगवद्रामानुजविरचितं शरणागतिगद्यं समाप्तम् ।।

।। श्रीमते रामानुजाय नमः ।।

श्रीधराय नमः

श्रियै नमः

श्रीमते रामानुजाय नमः

श्रीभगवद्रामानुजविरचिते गद्यत्रये

श्री र ङ्ग ग द्य म्

[चिदचित्परतत्त्वानां तत्त्वयाथात्म्यवेदिने ।
रामानुजाय मुनये नमो मम गरीयसे ।।]

स्वाधीन-त्रिविधचेतनाचेतन-स्वरूप-स्थिति-प्रवृत्ति-भेदम्, क्लेश-कर्माद्यशेषदोषासंस्पृष्टम्, स्वाभाविकानवधिकातिशय-ज्ञान-बलैश्वर्य-वीर्य-शक्ति-तेजः-सौशील्य-वात्सल्य-मार्दवार्जव-सौहार्द-साम्य-कारुण्य-माधुर्य-गाम्भीर्य-औदार्य-चातुर्य-स्थैर्य-धैर्य-शौर्य-पराक्रम-सत्यकाम-सत्यसङ्कल्प-कृतित्व-कृतज्ञताद्यसङ्ख्येय-कल्याण-गुणगणौघ-महार्णवम्; परब्रह्मभूतम्, पुरुषोत्तमम्, श्रीरङ्गशायिनम् अस्मत्-स्वामिनम्, प्रबुद्ध-नित्यनियाम्य-नित्य-दास्यैक-रसात्म-स्वभावोऽहम्, तदेकानुभवः; तदेकप्रियः; परिपूर्ण-भगवन्तम्; विशदतमानुभवेन निरन्तरमनुभूय; तदनुभवजनितानवधिकातिशय-प्रीतिकारित-अशेषावस्थोचिताशेषशेषतैकरतिरूप-नित्यकिङ्करो भवानि! ।। १ ।।

स्वात्म-नित्यनियाम्य-नित्यदास्यैकरसात्मस्वभावानुसन्धानपूर्वक-भगवदनवधिकातिशय-स्वाम्याद्यखिलगुणगणानुभवजनित-अनवधिकातिशय-प्रीतिकारिता अशेषावस्थोचिताशेष-शेषतैकरतिरूप-नित्यकैङ्कर्यप्राप्त्युपायभूत-भक्ति-तदुपाय-सम्यग्ज्ञान-तदुपाय-समीचीनक्रिया-तदनुगुण-सात्त्विकताऽऽस्तिक्यादि-समस्तात्म-गुण-विहीनः; दुरुत्तरानन्त-तद्विपर्ययज्ञानक्रियानुगुणानादि-पापवासना-महार्णवान्तर्निमग्नः; तिलतैलवत्-दारुवह्निवत् दुर्विवेच-त्रिगुण-क्षणक्षरण-स्वभाव-अचेतन-प्रकृति-व्याप्तिरूप-दुरत्यय-भगवन्माया-तिरोहित-स्वप्रकाशः; अनाद्यविद्या-सञ्चित-अनन्ताशक्य-विस्रंसन-कर्मपाश-प्रग्रथितः, अनागतानन्तकाल-समीक्षयाऽपि अदृष्टसन्तारोपायः, निखिलजन्तुजातशरण्य! श्रीमन्! नारायण! तव चरणारविन्दयुगलं शरणमहं प्रपद्ये ।। २ ।।

एवमवस्थितस्याऽपि अर्थित्वमात्रेण-परमकारुणिको भगवान्; स्वानुभवप्रीत्योपनीतैकान्तिकात्यन्तिक-नित्यकैङ्कर्यैकरतिरूप-नित्यदास्यं दास्यतीति विश्वासपूर्वकं; भगवन्तं नित्यकिङ्करतां प्रार्थये ।। ३ ।।

तवाऽनुभूति-सम्भूत-प्रीति-कारित-दासताम् ।
देहि मे कृपया नाथ! न जाने गतिमन्यथा ।। ४ ।।
सर्वावस्थोचिताशेष-शेषतैकरतिस्तव ।
भवेयं पुण्डरीकाक्ष! त्वमेवैवं कुरुष्व! माम् ।। ५ ।।

एवम्भूत-तत्त्वयाथात्म्यावबोध-तदिच्छारहितस्यापि, एतदुच्चारणमात्रावलम्बनेन; उच्यमानार्थ-परमार्थनिष्ठं मे मनः, त्वमेवाद्यैव कारय! ।। ६ ।।

अपारकरुणाम्बुधे! अनालोचितविशेषाशेषलोकशरण्य! प्रणतार्तिहर! आश्रितवात्सल्यैकमहोदधे! अनवरतविदित-निखिल-भूतजात-याथात्म्य!

सत्यकाम! सत्यसङ्कल्प! आपत्सख! काकुत्स्थ! श्रीमन्! नारायण! पुरुषोत्तम! श्रीरङ्गनाथ! मम नाथ! नमोऽस्तु ते ।। ७ ।।

।। इति श्रीभगवद्रामानुजविरचितं श्रीरङ्गगद्यं सम्पूर्णम् ।।

।। श्रीमते रामानुजाय नमः ।।

श्रीधराय नमः

श्रियै नमः

श्रीमते रामानुजाय नमः

श्रीभगवद्रामानुजविरचिते गद्यत्रये

श्री वै कु ण्ठ ग द्य म्

यामुनार्यसुधाम्भोधिम् अवगाह्य यथामति ।
आदाय भक्तियोगाख्यं रत्नं सन्दर्शयाम्यहम् ।। १ ।।

स्वाधीन-त्रिविध-चेतनाचेतन-स्वरूप-स्थिति-प्रवृत्ति-भेदम्, क्लेशकर्माद्यशेष-दोषासंस्पृष्टम्, स्वाभाविकानवधिकातिशय-ज्ञान-बलैश्वर्य-वीर्य-शक्ति-तेजः-प्रभृत्यसङ्ख्येयकल्याणगुणगणौघ-महार्णवम्; परमपुरुषं, भगवन्तं नारायणम्; स्वामित्वेन, सुहृत्वेन, गुरुत्वेन च, परिगृह्य; ऐकान्तिकात्यन्तिक-तत्पादाम्बुजद्वय-परिचर्यैकमनोरथः, तत्प्राप्तये च तत्पादाम्बुजद्वयप्रपत्तेः, अन्यन्न मे कल्पकोटिसहस्रेणाऽपि साधनमस्तीति मन्वानः, तस्यैव भगवतो नारायणस्य; अखिल-सत्त्वदयैक-सागरस्य, अनालोचित-गुणगणाखण्डजनानुकूलामर्यादशीलवतः, स्वाभाविक-अनवधिकातिशय-गुणवत्तया, देव-तिर्यङ्-मनुष्याद्यखिलजन-हृदयानन्दनस्य; आश्रित-वात्सल्यैकजलधेः, भक्तजन-संश्लेषैकभोगस्य; नित्य-ज्ञान-क्रियैश्वर्यादि- भोग-सामग्री-समृद्धस्य, महा-विभूतेः श्रीमतः चरणारविन्दयुगलम्; अनन्यात्म-सञ्जीवनेन तद्गत सर्वभावेन, शरणमनुव्रजेत् ।। २ ।।

ततश्च प्रत्यहम् आत्मोज्जीवनायैवमनुस्मरेत् ।। ३ ।।

चतुर्दशभुवनात्मकमण्डम्, दशगुणितोत्तरं च आवरणसप्तकम्; समस्तं कार्यकारणजातमतीत्य; परमव्योमशब्दाभिधेये; ब्रह्मादीनां वाङ्मनसागोचरे; श्रीमति वैकुण्ठे, दिव्यलोके; सनक-विधि-शिवादिभिरप्यचिन्त्यस्वभावैश्वर्यैः, नित्यसिद्धैः, अनन्तैः, भगवदानुकूल्यैकभोगैः, दिव्यपुरुषैः महात्मभिरापूरिते, तेषामपि, इयत्परिमाणम्, इयदैश्वर्यम्, ईदृशस्वभावम्, इति परिच्छेत्तुमयोग्ये; दिव्यावरण-शतसहस्रावृते; दिव्यकल्पकतरूपशोभिते; दिव्योद्यान-शतसहस्रकोटिभिरावृते; अतिप्रमाणे, दिव्यायतने, कस्मिंश्चित्, विचित्रदिव्यरत्नमय-दिव्यास्थानमण्टपे; दिव्यरत्नस्तम्भ-

शतसहस्रकोटिभिरुपशोभिते; दिव्यनानारत्न-कृतस्थल-विचित्रिते; दिव्यालङ्कारालङ्कृते; परितः पतितैः, पतमानैः, पादपस्थैश्च नानागन्धवर्णैः, दिव्यपुष्पैश्शोभमानैः, दिव्यपुष्पोपवनैरुपशोभिते; सङ्कीर्ण-पारिजातादि-कल्पद्रुमोपशोभितैः, असङ्कीर्णैश्च कैश्चित् अन्तस्थ-पुष्परत्नादि-निर्मित-दिव्य-लीलामण्टप-शतसहस्रोपशोभितैः, सर्वदाऽनुभूयमानैरपि अपूर्ववत् आश्चर्यमावहद्भिः, क्रीडाशैलशतसहस्रैरलङ्कृतैः; कैश्चिन्नारायण-दिव्य-लीलाऽसाधारणैः, कैश्चित् पद्मवनालया-दिव्यलीलाऽसाधारणैः; साधारणैश्च कैश्चित्, शुक-शारिका-मयूर-कोकिलादिभिः कोमलकूजितैराकुलैः; दिव्योद्यान-शतसहस्रैरावृते; मणि-मुक्ता-प्रवाल-कृत सोपानैः; दिव्यामलामृत-रसोदकैः, दिव्याण्डजवरैः; अतिरमणीयदर्शनैः अतिमनोहर-मधुर-स्वरैराकुलैः; अन्तस्थ-मुक्तामय-दिव्यक्रीडास्थानोपशोभितैः; दिव्य-सौगन्धिक-वापी-शत-सहस्रैः; दिव्यराजहंसावलीविराजितैरावृते; निरस्तातिशयानन्दैकरसतया च आनन्त्याच्च, प्रविष्टानुन्मादयद्भिः, क्रीडोद्देशैर्विराजिते; तत्रतत्रकृत-दिव्य पुष्प-पर्यङ्कोपशोभिते; नाना-पुष्पासवास्वाद-मत्त-भृङ्गावलीभिः उद्गीयमान-दिव्य-गान्धर्वेणापूरिते; चन्दनागुरु-कर्पूर-दिव्य-पुष्पावगाहि-मन्दानिला सेव्यमाने; मध्ये पुष्पसञ्चयविचित्रिते; महति; दिव्ययोगपर्यङ्के, अनन्तभोगिनि; श्रीमद्वैकुण्ठैश्वर्यादि-दिव्यलोकम् आत्म-कान्त्या विश्वमाप्याययन्त्या, शेषशेषाशनादि सर्वं परिजनं भगवतः तत्तदवस्थोचित-परिचर्यायाम् आज्ञापयन्त्या, शील-रूप-गुण-विलासादिभिः आत्मानुरूपया, श्रिया, सहासीनम्; प्रत्यग्रोन्मीलित-सरसिज-सदृश-नयनयुगलम्, स्वच्छनील जीमूत-सङ्काशम्; अत्युज्ज्वल-पीतवाससम्; स्वया प्रभया अतिनिर्मलया अतिशीतलया स्वच्छमाणिक्याभया कृत्स्नं जगद्भासयन्तम्; अचिन्त्य-दिव्याद्भुत-नित्ययौवनस्वभाव-लावण्यमयामृतसागरम्; अतिसौकुमार्यात् ईषत्प्रस्विन्नवदालक्ष्यमाण-ललाट-फलक-दिव्यालकावली-विराजितम्; प्रबुद्ध-मुग्धाम्बुज-चारु-लोचनम्; स-विभ्रम-भ्रूलतम् उज्ज्वलाधरम्; शुचिस्मितम्; कोमल-गण्डमुन्नसम्; उदग्र-पीनांस-विलम्बि-कुण्डल-अलकावली-बन्धुर-कम्बु-कन्धरम्; प्रियावतंसोत्पल-कर्णभूषण-श्लथालकाबन्ध-विमर्दशंसिभिः चतुर्भिराजानुविलम्बिभिर्भुजैः विराजितम्; अतिकोमल-दिव्य-रेखालङ्कृताताम्रकरतलम्; दिव्याङ्गुलीयक-विराजितम्; अतिकोमल-दिव्य-नखावली-विराजित-अतिरक्ताङ्गुलीभिः अलङ्कृतम्; तत्क्षणोन्मीलित-पुण्डरीक-सरसिज-सदृश-चरण-युगलम्; अतिमनोहर-किरीट-मकुट-चूडाऽवतंस-मकरकुण्डल-

ग्रैवेयक-हार-केयूर-कटक-श्रीवत्स-कौस्तुभ-मुक्तादामोदरबन्धन-पीताम्बर-काञ्ची-गुण-नूपुरादिभिः अत्यन्त-सुखस्पर्शैर्दिव्यगन्धैः दिव्यभूषणैर्भूषितम्, श्रीमत्या वैजयन्त्या वनमालया विराजितम्; शङ्ख-चक्र-गदाऽसि-शार्ङ्गादि-दिव्यायुधैः सेव्यमानम्; स्वसङ्कल्पमात्रावक्लृप्त-जगज्जन्म-स्थिति-ध्वंसादिके, श्रीमति, विष्वक्सेने, न्यस्त-समस्तात्मैश्वर्यम्; वैनतेयादिभिः स्वभावतो-निरस्त-समस्त-सांसारिक-स्वभावैः; भगवत्परिचर्या-करण-योग्यैः, भगवत्परिचर्यैक-भोगैः; नित्य-सिद्धैः, अनन्तैः यथायोगं सेव्यमानम्; आत्मभोगेनानुसंहित-परादि-काल-दिव्यामल-कोमलावलोकनेन, विश्वमाह्लादयन्तम्; ईषदुन्मीलित-मुखाम्बुजोदर-विनिर्गतेन, दिव्याननारविन्द-शोभाजनकेन; दिव्य-गाम्भीर्य-औदार्य-सौन्दर्य-माधुर्याद्यनवधिक-गुण-गण-विभूषितेन, अतिमनोहर-दिव्य-भाव-गर्भेण; दिव्यलीलालापामृतेन अखिल-जन-हृदयान्तराणि आपूरयन्तं; भगवन्तं नारायणम्, ध्यानयोगेन दृष्ट्वा;

ततो भगवतो नित्यस्वाम्यम् आत्मनो नित्यदास्यं च यथावस्थितम् अनुसन्धाय;

'कदाऽहं भगवन्तं, नारायणं, मम नाथम्, मम कुलदैवतम्, मम कुलधनम्, मम भोग्यम्, मम मातरम्, मम पितरम्, मम सर्वम्, साक्षात्करवाणि चक्षुषा!'

'कदाऽहं भगवत्पादाम्बुज-द्वयं शिरसा सङ्ग्रहिष्यामि!'

'कदाऽहं भगवत्पादाम्बुज-द्वय-परिचर्याशया निरस्त-समस्तेतर-भोगाशः, अपगत-समस्त-सांसारिक-स्वभावः, तत्पादाम्बुज-द्वयं प्रवेक्ष्यामि!'

'कदाऽहं भगवत्पादाम्बुज-द्वय-परिचर्या-करणयोग्यः तदेकभोगः, तत्पादौ परिचरिष्यामि!' 'कदा मां भगवान् स्वकीयया अतिशीतलया दृशाऽवलोक्य, स्निग्ध-गम्भीर-मधुरया गिरा परिचर्यायाम् आज्ञापयिष्यति!' इति, भगवत्परिचर्यायाम् आशां वर्धयित्वा;

तयैवाशया तत्प्रसादोपबृंहितया भगवन्तमुपेत्य, दूरादेव भगवन्तं शेषभोगे श्रिया सहाऽऽसीनम्, वैनतेयादिभिः सेव्यमानम्, 'समस्तपरिवाराय श्रीमते नारायणाय नमः' इति प्रणम्योत्थायोत्थाय, पुनः पुनः प्रणम्य, अत्यन्त-साध्वस-विनयावनतो भूत्वा, भगवत्पारिषद-गणनायकैः, द्वारपालैः, कृपया स्नेहगर्भया दृशाऽवलोकितः,

सम्यगभिवन्दितैः तैस्तैरेवानुमतो भगवन्तमुपेत्य, श्रीमता मूलमन्त्रेण 'माम् ऐकान्तिकात्यन्तिक-परिचर्याकरणाय परिगृह्णीष्व' इति याचमानः, प्रणम्य, आत्मानं भगवते निवेदयेत् ।। ४ ।।

ततो भगवता, स्वयमेवात्मसञ्जीवनेन; अमर्यादशीलवता, अतिप्रेमान्वितेन अवलोकनेनावलोक्य, सर्वदेश-सर्वकाल-सर्वावस्थोचितात्यन्त-शेषभावाय स्वीकृत; अनुज्ञातश्च अत्यन्त-साध्वस-विनयावनतः, किङ्कुर्वाणः, कृताञ्जलि-पुटो भगवन्तमुपासीत ।। ५ ।।

ततश्चानुभूयमान-भावविशेषः, निरतिशय-प्रीत्या; अन्यत् किञ्चित् कर्तुं द्रष्टुं स्मर्तुमशक्तः; पुनरपि शेषभावमेव याचमानो, भगवन्तमेव अविच्छिन्न-स्रोतोरूपेण अवलोकनेनावलोकयन् आसीत ।। ६ ।।

ततो भगवता स्वयमेवात्मसञ्जीवनेन अवलोकनेनाऽवलोक्य, सस्मितमाहूय; समस्त-क्लेशापहं, निरतिशय-सुखावहम् आत्मीयं, श्रीमत्पादारविन्दयुगलं, शिरसि कृतं ध्यात्वा; अमृत-सागरान्तर्निमग्न-सर्वावयवः सुखमासीत ।। ७ ।।

।। इति श्रीभगवद्रामानुजविरचितं श्रीवैकुण्ठगद्यं सम्पूर्णम् ।।

।। इति श्रीभगवद्रामानुजविरचितं गद्यत्रयं सम्पूर्णम् ।।

।। श्रीमते रामानुजाय नमः ।।

श्रीधराय नमः

श्रियै नमः

श्रीमते रामानुजाय नमः

यो नित्यमच्युतपदाम्बुजयुग्मरुक्म-
व्यामोहतस्तदितराणि 'तृणाय'[१] मेने ।
अस्मद्गुरोर्भगवतोऽस्य दयैकसिन्धोः
रामानुजस्य चरणौ शरणं प्रपद्ये ।।

श्रीभगवद्रामानुजाचार्यविरचिते गद्यत्रये

श र णा ग ति ग द्य म्[२]

[वन्दे वेदान्तकर्पूरचामीकरकरण्डकम् ।
रामानुजार्यमार्याणां चूडामणिमहर्निशम् ।।]

यतीन्द्रकृतभाष्यार्था यद्व्याख्यानेन दर्शिताः ।
वरं सुदर्शनार्यं तं वन्दे कूरकुलाधिपम् ।।

श्रीसुदर्शनभट्टार्यप्रणीतं श्रीमच्छ्रुतप्रकाशिकाभिधानं

शरणागतिगद्यव्याख्यानम् ।

श्रीमान्वेंकटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ।।

श्रीवेदान्तदेशिकप्रणीतं पृथुगद्याधिकारनामकं
शरणागतिगद्यस्य व्याख्या रहस्यरक्षा

---

१. **तृणाय** - 'मन्यकर्मण्यनादरे विभाषाऽप्राणिषु' (पा.सू.२-३-१७) इति सूत्रेणानादरे द्योत्ये कर्मणि चतुर्थी वा स्यात् । (इति चतुर्थी)

२. **शरणागतिगद्यम्** - शरणार्थं संसारात् संरक्षणार्थं 'आ - समन्तात् सर्वप्रकारेण', प्रार्थनापूर्वकं 'गतिः' - गमनम् - अवलम्बनम् - आत्मसमर्पणम् - शरणागतिः । **शरणागतिः** - (प्रपत्तिः) - मोक्षसाधनोपायः; तदधिकृत्य कृतं गद्यम् **शरणागतिगद्यम्** ।।

श्रु.भा. - वरदं द्विरदाद्रीशं श्रीनिधिं करुणानिधिम् ।
शरण्यं शरणं यामि प्रणतार्तिहरं हरिम् ।।

[गुरुवन्दनं - प्रतिज्ञा च]

र.र. - प्रख्यातश्रुतविभवान् गुरूनशेषान्
प्रश्रित्य प्रणयति वेङ्कटेशसूरिः ।
लक्ष्मीशप्रपदनवैभवप्रतिष्ठां
रागान्ध्यप्रशमकरीं रहस्यरक्षाम् ।। १ ।।
लक्ष्मीपतेर्यतिपतेश्च दयैकधाम्नो योऽसौ पुरा समजनिष्ट जगद्धितार्थम् ।
प्राच्यं प्रकाशयतु नः परमं रहस्यं संवाद एष शरणागतिमन्त्रसारः ।। २ ।।

[अवतारिका]

अत्र भगवान् भाष्यकारः सदाचार्यसम्प्रदायागतद्वयवचनेन स्वयमनुष्ठितं न्यासाख्य-विद्याविशेषं स्वानुबन्धिसञ्जिजीवयिषया यथावत्प्रकाशयन् 'सीतामुवाचातियशा राघवञ्च महाव्रतम्', (रा.अयो.३१-२) 'सीतासमक्षं काकुत्स्थमिदं वचनमब्रवीत्' (रा.अर.१५-६) इत्यादिप्रकारेण श्रीप्रपत्तितदनुग्रहपूर्वकं स्वस्य भगवता सञ्जातं स्वयंप्रयोजनसंवादविशेषं निबध्नाति ।

प्रतिवचनांशस्तु शरणागतिवशीकृतशरण्याभिप्रायविशेषोन्नयनेन निबध्यत इत्येके । इह **सम्पत्स्यते** इत्यन्तं श्रीमच्छब्दाभिप्रेतप्रदर्शनम् । **अखिल** इत्यादिकम् **अशरण्यशरण्य!** इत्यन्तं नारायणशब्दार्थविवरणम् । तन्मध्ये **श्रीमन्नारायण** इति द्विःपठनं उपायोपेयवाक्ययोः सिद्धरूपप्रधानांशव्यञ्जनम् । **अनन्यशरणोऽहम्** इत्युत्तमपुरुषाभिप्रेताधिकारिविशेषोक्तिः । **त्वत्पादारविन्दयुगलम्** इत्यादिकमप्यर्थतस्स्वरूपतश्च मान्त्रवर्णिकपदज्ञापकम् । एवं प्रधानतमेन सिद्धो[१]पायेन[१] [२]सिद्ध[२]प्राप्येन च सह महा[1]वाक्यार्थ[1]पर्यवसानभूमितया शाब्दप्राधान्यवान् [३]साध्योपायांशो[३] दर्शितः। [४]साध्यप्राप्यम्[४] अपि **पारमार्थिक** इत्यादिना संक्षिप्तमिति ज्ञापयितुं मध्ये **द्वयम्** इति व्याख्येयसमाख्यानिर्देशः ।

---

१. **उपायेन** - उपायभूतब्रह्मणः पुरुषव्यापारासाध्यतया सिद्धोपायत्वम्- 'फलमत उपपत्तेः' इति सूत्राभिप्रेतम् ।

२. **सिद्ध** - एवं विभूतिद्वयविशिष्टब्रह्मणः प्राप्यत्वेन तस्यापि व्यापारासाद्ध्यतया सिद्धप्राप्यत्वम् 'परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते' इति सूत्रारूढमिदम् ।

३. **साध्योपायांशः** - निदिध्यासनस्य, प्रपत्तेर्वा पुरुषव्यापारसाध्यत्वात् साध्योपायशब्दवाच्यता - 'पुरुषार्थोऽतः शब्दादिति बादरायणः' इति विद्यातः पुरुषार्थसाधनात् । अत्र विद्यापदन्यास विद्यासाधारणं व्यवहितसाधनमिदम् । अव्यवहितसाधनन्तु 'फलमत उपपत्तेः' इत्युक्तरीत्या ब्रह्मैवेति बोध्यम् । अन्यथा पूर्वापरविरोधः स्यात् ।

४. **साध्यप्राप्यम्** - एवं मुक्तिकाले यथाभिमतकैङ्कर्यस्यापि स्वव्यापारसाध्यतया प्राप्यतया च साध्यप्राप्यत्वम् । 'द्वादशाहवत् उभयविधं बादरायणः' इति सूत्रसिद्धम् । शरीरपरिग्रहस्य भगवत्कैङ्कर्यार्थत्वात्, न तु स्वभोगाय इति बोद्धयम् ।

1. वाक्य - अ ।

र.र. - पितरम् इत्यादिभिः जितन्ताविशेषभगवद्गीतादिपठितैः उक्तसंवादकैरुपबृंहण-ग्रन्थैः प्रस्तुतोपायविशेषपरिग्रहं शरण्यस्वभावानुसन्धानपूर्वकं प्राप्यविरोधिनिवृत्तिप्रार्थनांशं च प्रपञ्चयिष्यमाणद्वयार्थतया सङ्ग्रहेण सङ्कलय्याह । **मनोवाक्कायैः** इत्यादिभिः, अर्थक्रमेण नमश्शब्दार्थविवरणपूर्वकं चतुर्थ्यभिप्रेतपरमपुरुषार्थप्रार्थना प्रकाश्यते । प्रतिवचन-वाक्यैस्तु, प्रकृताधिकारिनिर्भरत्वाय स्वीकृतभरस्य शरण्यस्य स्वाभाविकदयार्द्रमुत्तरखण्डोक्त-परमफलाङ्कुरकल्पमभिप्रायं व्यवृणुत । अतः कृत्स्नमिदं गद्यं द्वयविवरणमिति साधीयान् सम्प्रदायः ।

[पूर्वोत्तरकृत्यादिकम्]

[1]इह[1] भगवत्प्रपदने समुद्यतस्य सम्यग्ज्ञानसम्पादनपुरुषकारपुरस्कारादिकं पूर्वकृत्यम् । साङ्गस्वरक्षाभरसमर्पणं तत्कालकृत्यम्, स्वनिष्ठानुसन्धानपूर्वकं स्वाधिकारोचित[2]कैङ्कर्यादिक[2]मुत्तरकृत्यम् । शरण्यस्य तु पूर्वकृत्यम् पुरुषकारप्ररोचनादिकम्; तत्कालकृत्यं समर्पित-सर्वभरस्वीकरणम्; उत्तरकृत्यन्तु स्वयम्प्रयोजनभक्त्यादिप्रदानान्तिमदशाप्रबोधनप्रभृति परिपूर्ण-[3]कैङ्कर्यरूपमुक्ति[3]प्रदानपर्यन्तम् । एतदखिलमिह शब्दतोऽर्थतश्च यथास्थानमनुसन्धेयम् । किञ्च -

> 'सम्बोधनैः परं तत्त्वं न्यासोक्त्या परमं हितम् ।
> प्रार्थनाभिश्च परमः पुमर्थ इह दर्शितः' ।।

[लक्ष्मीप्रपदनस्य स्थिरीकरणम्]

नन्वेवं सकलफलप्रदो भगवानेव तत्प्रपत्तिसिद्ध्यर्थमप्याश्रीयताम्, किमिह लक्ष्मीप्रपदनेन? मैवम्; यदि भगवत्प्रपदनमिदानीं शक्यमिति निश्चिनुयात्, तदा मोक्षार्थमेव तदुपाददीत; न पुनस्तदर्थं तत्प्रयुञ्जीत । अनिश्चिते तु शक्यत्वे [4]नतराम्[4];

ननु च विदितश्चेत्प्रपत्तिशास्त्रार्थः, स च सुकरः; तदा स्वयमेव मोक्षार्थमनुष्ठीयताम्? मैवम्; दुष्करकर्माद्यङ्गविरहात् सौकर्येऽपि महाविश्वासाद्यङ्गकप्रपत्तिस्वरूपे, 'श्रूयते किल गोविन्दे' (वि.ध.२-२५) 'सत्यं शतेन विघ्नानाम्', (वि.ध.७०-८४) इत्यादि-न्यायेन सम्भवत्प्रतिबन्धे मात्रया दौष्कर्यात् । उक्तञ्च 'उपायस्सुकरस्सोऽयं दुष्करश्च मतो मम' (ल.तं.१७-१०४) इति । अतः 'स्थिते मनसि' (व.च.श्लो) इत्यादिप्रक्रियया विषयतस्स्वरूपतश्च विशिष्टाकारप्रपत्त्यनुष्ठाने प्राप्याऽभिलाषप्रापकाध्यवसाय-प्रापकान्तराऽनन्वयानुवृत्त्यनुगुणमनस्समाधानाद्यर्थमिह तत्प्रार्थनं युक्तम् ।

---

1. इह च - अ । 2. कैङ्कर्य - आ । 3. कैङ्कर्य - आ । 4. नितराम् - अ ।

श्रु.भा. - उपायोपेयपरं द्वयं विशदीक्रियते । तत्र प्रतापोष्मलपितृत्वदुरासदभगवत्संश्रयण-सिद्धये, पुरुषकारभूतवात्सल्यनिर्भरलक्ष्मी 'समाश्रयणं' श्रीमच्छब्दविवरणमुखेनाऽभिधीयते ।

यद्वा श्रियं प्रपद्य तत्सन्निधौ मूलमन्त्रेण स्वरूपानुरूपपुरुषार्थप्रार्थनं तदुपायप्रार्थनापर्यन्तं कृत्वा, तदनुज्ञया द्वयमनुसन्धीयत इति पूर्वाचार्यानुसन्धानमनुस्मरन् प्रथमं श्रियं प्रपद्यते **भगवत्** इति ।

र.र. - एवमपि सुकृतविशेषैरेव लक्ष्मीप्रपत्तिवत्, भगवत्प्रपत्तिरप्यस्तु; मैवम्, तदर्थ एव ह्ययं सुकृतविशेषः । न चात्रापि पूर्ववदशक्यत्वचोदना; स्वतन्त्रबुद्ध्यैव पूर्वं तावन्मात्रशक्तिप्रदानात्, तदभिप्रायेण ह्युक्तम् । भगवता शौनकेन - 'वाचः परं प्रार्थयिता प्रपद्येन्नियतश्श्रियम्' (शौ.सं.) इति । श्रीसात्वते च -

'यामालम्ब्य सुखेनेमं दुस्तरं हि गुणोदधिम् ।
निस्तरन्त्यचिरेणैव व्यक्तध्यानपरायणाः' ।। (सा.सं.१२-८४) इति ।

सा चैवं स्वयमाह -

'प्रायश्चित्तप्रसङ्गे तु सर्वपापसमुद्भवे ।
मामेकां देवदेवस्य महिषीं शरणं श्रयेत्' ।। (ल.तं.१७-१०२) इति ।

न चैवम्, [1]तदर्थमपि[1] प्रपत्यन्तरा[2]पेक्षया[2] अनवस्थादिप्रसङ्गः । स्वतन्त्रसंकल्पेन व्यवस्थितत्वात् सामग्रीविशेषाणाम् । सामग्रीप्रवाहानवस्था तु सर्वस्मिन्नपि कार्ये सर्वैस्सिद्धान्तिभिस्स्वीकर्तव्या; स्वीकृता चेति नासौ दोषः ।

अतोऽपवर्गार्थभगवत्प्रपत्तिसिद्धये -

'यज्ञविद्या महाविद्या गुह्यविद्या च शोभने ।
आत्मविद्या च देवि! त्वं विमुक्तिफलदायिनी' ।। (वि.पु.१-९-१२०)
'विद्यासहायवन्तं मामादित्यस्थं सनातनम्', (म.भा.शां.३४७-६९)

इत्यादिभिः सर्वविद्याप्रवर्तकतया तत्तद्विद्यात्वेन निर्दिष्टां सम्यग्ज्ञानव्यवसायोपायादिप्रदाने विशेषाधिकारवतीमनुग्रहैकस्वभावां श्रियमादौ प्रपद्यते - **भगवत्** इति । अत्र 'अशरण्यशरण्याम्' इति वक्ष्यमाणस्योपयुक्ताः विशेषाः नवभिः पदैः ख्याप्यन्ते ।

---

1. तदर्थं - आ । 2. पेक्षायां - आ ।

[श्रीशरणागतिः]

[१]ओम्[१] [२]भगवन्नारायणा[३]भिमतानुरूप-स्वरूप-रूप-गुण-विभवैश्वर्य-शीलाद्यनवधिकातिशय-असङ्ख्येयकल्याणगुणगणाम्,

श्रु.भा. - भगवन्नारायणशब्दौ गुणविभूतिपौष्कल्यपरौ, [३]द्विषट्का[३]ष्टार्णयोरपि तत्साहित्यज्ञानपरौ च । अनुरूपेऽनभिमतिरननुरूपे चाभिमतिश्च दृश्यत इति तद्व्युदासाय अभिमतानुरूपशब्दौ ।

र.र. - ननु 'विष्णुपत्नी,' (तै.सं.४-४-१२) 'विष्णुवल्लभा' इत्यादिषु भास्करेण प्रभेव पत्याऽसौ निरूप्यताम् । यथोक्तं ताभ्यामेव; 'अनन्या हि मया सीता,' (रा.यु.११८-१९) 'अनन्या राघवेणाऽहम्' (रा.सुं.२१-१५) इति । इह तु तया तन्निरूपणे व्याख्येयस्थे किमिति भगवताऽसौ निरूप्यते? प्रस्तुतोपयोगार्थमिति ब्रूमः । भगवदभिमतानुरूपत्वे हि, तस्यास्ते नेच्छाविघाताभावात्तद्विरुद्धेच्छाविरहाच्च ततोऽस्मदिष्टं सिद्ध्येत् । प्रभया प्रभावत इव व्याख्येयगतं तया तस्य निरूपणमपि श्रीवल्लभादिव्यपदेशेन दर्शयिष्यति । इदञ्च परस्परनिरूप्यत्वं अन्यत्राप्युक्तम् -

> 'तदेतत्सूक्ष्ममिथुनं परस्परविचिह्नितम् ।
> आदावन्योन्यमिश्रत्वात् अन्योन्यप्रतिपादकम्' ।। इति ।

आदावन्योन्यमिश्रत्वात् 'शान्तानन्त' (च.श्लो.४) [1]इत्यादि[1] प्रकारेण नित्यमन्योन्यसम्बद्धत्वादित्यर्थः । न च परस्परनिरूप्यत्वे अन्योन्याश्रयदोषः, प्रभाप्रभावतोरिव प्रमाणतः प्रकारान्तरेणापि तयोर्निरूपणात् ।

अत्र द्विषट्काष्टाक्षरगताभ्यां भगवन्नारायणशब्दाभ्यां 'शुद्धे महाविभूत्याख्ये', (वि.पु.६-५-७२) 'नरसम्बन्धिनो नाराः' (अहि.सं.५२-५०) इत्यादिभिर्निरुक्ताभ्यां उभयलिङ्गत्वमुभय-[2]विभूतित्वञ्च[2] ख्याप्यते, भगवच्छब्दस्य 'उत्पत्तिं प्रलयञ्चैव' (वि.पु.६-५-७८) इत्यादिप्रदर्शितक्रमेण 'अन्यत्र ह्युपचारतः' (वि.पु.६-५-७८) इत्यौपचारिकप्रयोगप्राचुर्यमस्ति । नारायणशब्दस्य तु तन्नास्ति । कारणवाक्येषु चानन्यथासिद्धनिःसन्देहविशेषनिर्धारणोपयुक्तश्चायम् ।

---

१. 'ओम्' इति पारायणे अनुष्ठीयते । २. भगवच्छब्दस्य हेयगुणरहितस्सन् समस्तकल्याणगुणाकरः इत्यर्थः ।

३. **द्विषट्क** - द्वादशाक्षरमन्त्रः । 'ओं नमो भगवते वासुदेवाय' इति ।

1. इति - अ । 2. विभूतिमत्वञ्च - अ ।

पद्मवनालयाम्, भगवतीम्,

श्रु.भा. - रूपानन्तरगुणशब्दः सौन्दर्यादिपरः । परत्वसौलभ्यकोटिनिविष्टगुणजातप्रदर्शनार्थौ ऐश्वर्यशीलशब्दौ । अनवधिक इत्यादि [1]स्पष्टार्थः[1] । परत्वसौलभ्ययोस्समाख्याः प्रमाणयति - **पद्म** इत्यादिभिश्चतुर्भिः पदैः ।

र.र. - 'एको ह वै नारायण आसीन्न ब्रह्मा नेशानः' (महोपनिषत् - ७) [2]इत्यादि[2] श्रुतेः । 'सहस्रशीर्षम्' (महाना.उ.११-२५) इत्यनुवाके च तेनैव सर्वपरविद्यावेद्यनिर्धारणम् । अतस्तेनात्र विशेष्यस्य निर्देशः । ततश्च तद्विशेषणतया भगवच्छब्दो [3]नात्र[3] रूढः उभयलिङ्गत्वव्यक्त्यर्थमेव ।

उक्तप्रकारं भगवतः स्वरूपं निरतिशयानन्दतया मुक्तानां नित्यानामिव च स्वस्याप्यभिमतम्, ततोऽपि स्ववल्लभायाः स्वरूपादिकमित्यभिप्रायेण अभिमतेत्युक्तम् ।

श्रूयते हि - 'श्रियं लोके देवजुष्टामुदाराम्' (श्रीसू.५) इति । निरवधिक[4]क्रीडादिमता[4] [5]निरुपाधिकदेवेन[5] भगवता प्रीतिविषयीकृतामित्यर्थः । सापेक्षनिरपेक्षयोः निरपेक्षसम्प्रतिपत्तेः, बाधकस्य चाभावादौचित्यातिशयात्तथैव वेदविद्याख्याततत्वाच्च। देवशब्दोऽत्र वासुदेवपरः । 'देवैर्जुष्टाम्' इति तु मन्दम् । स्मर्यते च 'प्राणेभ्योऽपि गरीयसीम्' इति ।

'अस्या देव्यामनस्तस्मिन् तस्य चास्यां प्रतिष्ठितम् ।
तेनेयं स च धर्मात्मा मुहूर्तमपि जीवति' ।। (रा.सुं.१५-५२) इति च ।

अभिमतत्वेपि अननुरूपत्वं **अनुरूप**त्वेपि अनभिमतत्वञ्च लोके दृष्टमिति तद्व्यवच्छेदार्थं उभयोक्तिः । यथा 'चकर्थ यस्या भवनं भुजान्तरम्' (स्तो.र.३७) इत्यादिश्लोकयोः । लोके केनचिदाकारेणाभिमताऽनुरूपत्वमाकारान्तरेण तदभावश्च क्वचिद्दृश्यते, तद्व्युदासाय स्वरूपरूपादिसर्वोक्तिः ।

[लक्ष्मीस्वरूपादेः भगवत्स्वरूपाद्यानुरूप्यस्थापनम्]

[6]अत्र तु[6] स्वरूपस्य गुणत्वायोगात्, **स्वरूपं, रूपं गुणः विभवैश्वर्यशीलाद्यनवधिकातिशय असंख्येयकल्याणगुणगणश्च** इति द्वन्द्वः । **अनुरूप**त्वमिह सम्बन्धे सति प्रकृष्टं सादृश्यम् ।

---

1. स्फुटार्थः - आ । 2. इति - आ । 3. अनादृतरूढिः - अ । 4. क्रीडोपयुक्ततया - आ । 5. देवेन - आ । 6. तत्र - अ ।

र.र. - यथा 'परस्परस्य सदृशौ प्रमाणेङ्गितचेष्टितैः' (रा.बा.४८-५) इति । रत्नकाञ्चनमुक्ता-प्रवालादेरिव स्वसम्बन्धेन शोभातिशयहेतुत्वरूपमौचित्यं वा; यथा -

'अतीव रामश्शुशुभेऽतिकामया विभुः श्रिया विष्णुरिवामरेश्वरः' ।। (रा.बा.७७-२९) इति । यथा च -

'तुल्यशीलवयोवृत्तां तुल्याभिजनलक्षणाम् ।
राघवोऽर्हति वैदेहीं तञ्चेऽयमसितेक्षणा' ।। (रा.सुं.१६-५) इति च । अत्र वयोलक्षणयोस्तुल्यशब्दः औचित्यपरः; दम्पत्योर्न्यूनाधिकवयस्कत्वात्, स्त्रीपुंसलक्षणानाञ्च भिन्नप्रकारत्वात्, तत्सहोक्त्या शीलादिष्वप्यौचित्यपर एव, तुल्यशब्दोक्तार्थस्य 'अर्हति' इति समुदायनिर्देशाच्च ।

यद्वा, अर्हत्त्वस्य साधकतया तुल्यशब्देन सदृशत्वमुच्यते । वयसस्सदृशत्वं 'धनकनकद्युती युवदशामपि मुग्धदशाम्' (श्रीगु.र.को.३५) इत्युक्तमासन्नतरत्वम् । लक्षणस्य सदृशत्वं पतिलक्षणवत्सर्वोत्कर्षव्यञ्जकत्वम्; येन स पुरुषोत्तमः; सा च 'सर्वलक्षणसम्पन्ना नारीणामुत्तमोत्तमा', (रा.बा.१-२७) इत्युच्यते । 'सदा तवैवोचितया तव श्रिया,' (स्तो.र.३८) 'आहुस्स्वैरनुरूपरूपविभवैः' (च.श्लो.४) इत्यादिकमत्रानुसन्धेयम् ।

भगवत्स्वरूपादेः एतत्स्वरूपादीनां यथाक्रममानुरूप्यमूह्यम् । तत्र स्वरूपं स्वासाधारणधर्मनिरूप्यं धर्मि; तस्यानुरूप्यम्, 'नानयोर्विद्यते परम्' (वि.पु.१-८-३५) इत्यादिषु ग्राह्यम् । रूपं हि, 'हिरण्यवर्णाम्' (श्रीसू.१) इत्याद्याम्नातम् । तस्यानुरूपत्वं हि अतिरमणीयत्वनित्यत्वाऽप्राकृतत्वादिविशिष्टमद्भुततमत्वम्, 'नित्यैवैषा' (वि.पु.१-८-१७) इत्युपक्रम्य 'विष्णोर्देहानुरूपां वै करोत्येषाऽऽत्मनस्तनूम्' (वि.पु.१-९-१४५) इति च निगमितम् । अत्र [1]रूपादनन्तरो[1] गुणशब्दस्सौन्दर्यादि दिव्यविग्रहगुणपरः । 'गुणाद्रूपगुणां चापि प्रीतिर्भूयो[2]व्यवर्धत[2] (रा.बा.७७-२९) इतिवत् विग्रहगुणानां स्वरूपगुणानाञ्च पृथङ्निर्देशः प्रीत्यतिशयद्योतनार्थः ।

---

1. रूपानन्तरो - आ । 2. अभ्यवर्धत - आ ।

र.र. - विभवः - 'फणिपतिश्शय्यासनं वाहनम्' (च.श्लो.२) इत्यादिभिरुक्तं विभूतिद्वयम् । यथोक्तम् - 'अस्या मम च शेषं हि विभूतिरुभयात्मिका' (वि.सं.) इति । उक्तञ्च श्रीराममिश्रैः - 'उभयाधिष्ठानञ्चैकं शेषित्वम्' (षडर्थसंक्षेपः) इति । एवं द्वयोर्विभवस्यैकत्वेऽपि तदानुरूप्यवचनमन्यूनानतिरिक्तविभूतिमत्वपरम् । यद्वा, 'अर्थो विष्णुरियं वाणी' (वि.पु.१-८-१८) इत्यादिभिः लौकिकदम्पतीन्यायेन विभज्य निर्दिष्टो विभूत्यंशः । स्वासाधारणविभूषणादिकञ्च विभवः ।

[1]निधिः पद्मो[1] निधिश्शङ्खश्चतुर्दन्ती गजस्तथा ।
कल्याणसर्पः [2]पञ्चास्यः[2] शिक्षितो गृहरक्षकः ।।

इत्यादि च पुराणप्रसिद्धमानुरूप्यमिह यथार्हं ग्राह्यम् ।

ऐश्वर्ये शीले चान्वितेन आदिशब्देन परत्वसौलभ्यौपयिकगुणवर्गद्वयसंग्रहः; 'सर्वैश्वर्यगुणोपेतां नित्यं तद्धर्मधर्मिणीम्' (ब्रा.पु.) इत्यादिभिरेतत्सिद्धिः । अत्र परस्परेच्छा-विघाताभावादैश्वर्यमनुरूपम् । शीलञ्च गुहादिषु रामस्येव, त्रिजटादिषु तस्याः प्रसिद्धम् । एवं पतिपारार्थ्ययुक्ततदितरसर्वशेषित्वान्वितानामन्येषामपि गुणानामानुरूप्यं सुगमम् ।

'ब्रह्मेशादिसुरव्रजस्सदयितस्त्वद्दासदासीगणः' (च.श्लो.१) इत्युक्तेभ्यस्सातिशय असंख्यातगुणेभ्यो व्यावृत्त्यर्थमाह - **अनवधिकातिशयासंख्येय** इति । [1]**अनवधिकत्वम्**[1] इह स्वापेक्षया उत्कृष्टावधिराहित्यम् ।

ननु भगवत एव ऐश्वर्यमनवधिकातिशयम्; 'तमीश्वराणां परमं महेश्वरम्'(श्वे.उ.६-७), 'सर्वेश्वरेश्वरः कृष्णः', (वि.ध.७४-४४) 'न त्वत्समश्चाभ्यधिकश्च दृश्यते', (श्वे.उ.६-८) 'न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यः' (भ.गी.११-४३) इत्यादिभिस्तथोक्तेः । 'पुंप्रधानेश्वरेश्वरी' (ल.स.१) इति नाम तु स्त्रीप्रत्ययानुपपत्तेः, श्रुत्यादिविरोधाच्च अन्यथा नेयम् । 'पुंप्रधानयोः' गोबलीवर्दन्यायेन विशेषत उक्तानां ब्रह्मादीश्वराणाञ्च भगवानीश्वरः तत्पत्नी इयमिति, 'पुंयोगादाख्यायाम्' (पा.सू.४-१-४८) इति स्त्रीप्रत्ययोपपत्तिः । पुंप्रधाने स्वशक्त्यैव नियच्छति । ईश्वरञ्च वाल्लभ्येनेति निर्वाहो विरूपः क्लिष्टश्च । 'ईश्वरीं सर्वभूतानां' (श्रीसू.९) इत्येतदप्येतेन गतार्थमिति ।

अत्रोच्यते - यद्यपि नाम्नि तथा निर्वाहः; तथाऽपि श्रुतौ न तथा स्यात्, 'सर्वभूतानाम्' इति षष्ठ्यन्वयवैघट्यप्रसङ्गात् । स्त्रीप्रत्ययस्तु बाहुलकेन नेयः । 'अस्येशाना

---

१. **अनवधिकातिशयत्वम्** - स्वापेक्षया उत्कृष्टावधिराहित्यम् ।

1. पद्मो गदो - अ । 2. चिक्लीतो - अ ।

र.र. - जगतो विष्णुपत्नी' (तै.सं.४-४-१२) इति च मन्त्रान्तरेण उक्तम् । तदपि हि तद्विभूतिभूतभूमिविषयत्वात् तत्पर्यवसाय्येव । श्रीवैकुण्ठगद्ये च शेषादीनामपि तदाज्ञानुविधायित्वमुक्तम्, 'शेषशेषाशनादि सर्वं परिजनं भगवतस्तत्तदवस्थोचित-परिचर्यायामाज्ञापयन्त्या' (वै.ग.) इति । आहुश्च भगवद्यामुनाचार्याः - 'यस्यास्ते महिमानमात्मन इव त्वद्वल्लभोऽपि प्रभुः, नालं मातुमियत्तया निरवधिं नित्यानुकूलं स्वतः' (च.श्लो.२) इति । वेदार्थसंग्रहे च उक्तं, [1]'स्वाभिमत[1]स्वानुरूपस्वरूपरूपगुणविभवैश्वर्य-शीलाद्यनवधिकमहिममहिषी' इति । उक्तञ्च श्रीवत्सांकमिश्रैः - 'देवि! त्वन्महिमावधिर्न हरिणा नापि त्वया ज्ञायते' (श्रीस्त.८) इति । तदात्मजैश्च 'प्रशकनबल' - इत्यारभ्य, - 'तव भगवतश्चैते साधारणा गुणराशयः' (श्रीगु.र.को.३२) इति ।

न चैतावता भगवतो निस्समाभ्यधिकत्वविरोधः; प्रत्युत तत्प्रतिष्ठापनमेव, 'ह्रीश्च ते लक्ष्मीश्च पत्न्यौ' (तै.आर.३-१३-४१) इति श्रुतेः । न ह्येवंविधपत्नीविशिष्टत्वं कस्यचित् [2]अन्यस्य[2] अस्ति, येन तत्साम्यादिशङ्का स्यात् । उपबृंहितञ्च 'अप्रमेयं हि तत्तेजो यस्य सा जनकात्मजा' (रा.अर.३७-१८) इति ।

एवमस्याश्शीलादीनामनवधिकातिशयत्वेऽप्यविरोधः -

'यथा प्रभागुणोत्कर्षे भास्करो निस्समाधिकः ।
श्रीमानपि तथैव स्यात्पतिः पत्नीगुणोन्नतौ ।।
ज्ञानभोगसमानत्वे नित्यमुक्तेश्वरेषु च ।
यथा वैषम्यनियतिस्तथैवाऽत्रेत्यनाविलम्' ।।

शास्त्रेषु बहुधा भगवद्गुणत्वादिरूपेण निर्दिष्टायास्तस्याः कैश्चिन्निर्गुणत्वादिकं [3]शंक्यते[3] इति [4]तद्व्युदासाय[4] **कल्याणगुणोक्तिः** । गुणत्वादिनिर्देशास्तु अस्या द्रव्यत्वाद्यविरोधेन अन्यपरा इति तत्र तत्र द्रष्टव्यम् । 'ततोऽवलोकिता देवाः', (वि.पु.१-९-१०६) 'त्वयाऽवलोकितस्सद्यः', (वि.पु.१-९-१३०) 'स श्लाघ्यस्स गुणी धन्यः' (वि.पु.१-९-१३१) इत्यादिभिरेतदवलोकनात् क्षुद्राणामपि गुणसिद्धौ, सर्वकल्याणगुणशालित्वमस्याः कैमुत्यसिद्धम् । कल्याणत्वं मोक्षपर्यवसायितत्त्वज्ञानादिमङ्गलावहत्वं स्वयं नित्यानुकूलत्वञ्च । 'न ते वर्णयितुं शक्ता गुणान् जिह्वाऽपि वेधसः' (वि.पु.१-९-१३३) इत्याद्यभिप्रेतसर्वापरिच्छेद्यगुणानन्त्यातिशयसूचनाय गणशब्दः; ऐश्वर्यादेरनेकावान्तरगुणसमुदायात्मकत्वाद्वा, 'प्रकृष्टं विज्ञानम्' (व.स्त.१५) इत्यादिन्यायात् ।

---

1. स्वाभिमतनित्यनिरवद्य - अ । 2. तदन्यस्य - अ । 3. शंक्येत - अ । 4. तन्निरासाय - आ ।

श्रियम्, देवीम्, नित्यानपायिनीम्,

श्रु.भा. - सदाऽपराधानभिज्ञतायै **नित्यानपायिनीम्** इति पदम् ।

र.र. - अथ विभूतितोऽपि मङ्गलनिर्वाहकत्वं प्रदर्शयति - **पद्मवनालयाम्** इति । एतेन 'पद्मे स्थितां पद्मवर्णाम्', (श्रीसू.४) 'गन्धद्वाराम्' (श्रीसू.९) इत्याद्याम्नात-सौवर्ण्यसौगन्ध्यातिशयोऽपि सूचितः । तच्छरणवरणमन्त्रे चोक्तम् - 'तां पद्मनेमीं शरणमहं प्रपद्ये' (श्रीसू.५) इति नाभिस्थानीयकर्णिकावस्थानात्पद्ममस्याः नेमिवद्भवति । 'पद्ममेव नेमिः - नयनसाधनं यस्यास्सा पद्मनेमी' इति केचित्; 'मातरं पद्ममालिनीम्', (श्रीसू.११) 'आर्द्रां पुष्करिणीं पुष्टिं पिङ्गलां पद्ममालिनीं', (श्रीसू.१३) 'श्रीनिलयमालाधारिणी', (श्रीमन्त्रम्) 'प्रियाणि तस्याः पुष्पाणि कमलानि विदुर्बुधाः', (धनदीये) 'विकासिकमलस्थिता' (वि.पु.१-९-१००) इत्यादिष्वप्यस्याः विशेषतः पद्माङ्गीकारश्रुतेः । श्रीविष्णुस्मृत्यादिषु विस्तरेणोक्तानां मङ्गल्यविभूतिभेदानां इयं विशेषतो देवतेति ज्ञापयितुमिह सुप्रसिद्धमुख्यमङ्गल-भूतपद्मवनोदाहरणम् । 'यत्र [१]पद्मवनानि[१] च' इति भगवतो विशेषसन्निधिस्थाने पद्मवने तद्विग्रह इव [1]असौ विशेषेण[1] सन्निधत्ते । एतेन-

'साऽहं वै पङ्कजे जाता सूर्यरश्मिप्रबोधिते ।
भूत्यर्थं सर्वभूतानां पद्मा श्रीः पद्ममालिनी' ।। (म.भा.शां.२२१-२०)

इति श्रीवासवसंवादोक्तं सर्वभूतोज्जीवनार्थावतारसौलभ्यमपि प्रदर्शितं भवति ।

एवं मङ्गलगुणविभूतियोगेन निर्दोषत्वमपि सङ्कलय्याह - **भगवतीम्** इति । 'ज्ञानशक्तिबल' (वि.पु.६-५-७४) इत्यारभ्य 'विना हेयैर्गुणादिभिः' (वि.पु.६-५-७५) इति हि स्मर्यते ।

[श्रीशब्दनिर्वचनम्]

अथोक्तवक्ष्यमाणसर्वातिशयस्थापिकया सुप्रसिद्धस्वासाधारणसमाख्यया सर्वसमाश्रयणीयत्वादिकमाह - **श्रियम्** इति। एवं हि श्रीशब्दो निरुच्यते -

---

१. **पद्मवनानि** - 'तुलसी काननं यत्र फुल्लपद्मवनानि च ।
वसन्ति वैष्णवा यत्र तत्र सन्निहितो हरिः' ।। इति वचनमिहाभिप्रेतम् ।

1. विशेषणासौ - आ ।

निरवद्याम्,

श्रु.भा. - दौर्लभ्यरूपाऽवद्यरहिता **निरवद्या** ।

र.र. - शृणाति निखिलान्दोषान् श्रीणाति च गुणैर्जगत् ।
श्रीयते चाखिलैर्नित्यं श्रूयते च परम्पदम् ।। (अहि.सं.५१-६५) इति । 'श्रयन्तीं श्रीयमाणाञ्च शृणन्तीं शृण्वतीमपि' । (अहि.सं.२१-८) इति च । अस्य च नाम्नस्सर्वप्रकारोत्कर्षज्ञापकत्वम् आहुः - 'श्रीरित्येव च नाम ते भगवति! ब्रूमः कथं त्वां वयम्' (च.श्लो.१) इति । 'श्रीरसि यतः' (श्रीगु.र.को.२९) इति च । भगवन्नारायण-पदोक्तस्यानुरूप्यञ्च **भगवतीम्, श्रियम्** इति, पदाभ्यां दर्शितम् । श्रीपदनिरुक्तिभिस्संश्रित-दोषनिराकरणम्, प्राप्यरुचिप्रापकाध्यवसायादिप्रदानमुपायस्वरूपनिर्वर्तकत्वम् । 'पितेव त्वत्प्रेयान्' (श्रीगु.र.को.५२) [1]इत्युक्तं[1] प्रतिप्रसादजनकत्वञ्च सिद्धम् ।

एवमाश्रितार्थव्यापारास्तदनुगुणावतारादयश्च न कर्मकृता इत्याह - **देवीम्** इति । भर्तुर्लीलायामैकरस्यात्तदनुगुणव्यापारोपपत्तिरिति भावः । भगवतीमित्यादिपदत्रयेण '[1]द्विषट्कार्णस्थ'भगवद्वासुदेवपदार्थानुरूप्यञ्च ज्ञाप्यते । **श्रियं देवीम्** इति समभिव्याहारेण, 'श्रियं देवीमुपह्वये श्रीर्मा देवी जुषताम्' । (श्रीसू.३) 'श्रीर्देवी पयसस्तस्मादुत्थिता धृतपङ्कजा' ।। (वि.पु.१-९-१००) इत्यादयश्श्रुतिस्मृतयः सूच्यन्ते । 'श्रियः श्रीश्च भवेदग्र्या' (रा.अयो.४४-१५) इत्याद्युक्तं पतिसम्बन्धेन द्योतमानत्वादिकमपि देवीमित्यनेन गम्यते ।

एवं 'क्रीडार्थमवतीर्णस्य तस्य' इत्याद्युक्तलोकानुकम्पाहेतुकावतारायाः अपि तस्याः 'पश्यतां सर्वदेवानां ययौ वक्षःस्थलं हरेः,' (वि.पु.१-९-१०५) 'मया विना शुष्यति शोकदीनम्' (रा.सुं.३६-२८) इत्यादिभिरागन्तुकसंश्लेषविश्लेषादिव्यपदेशात् कथमपराधभीतानां तत्तदवस्थासु तत्पुरस्कारेण भगवदाश्रयणं स्यादित्यत्राह - **नित्यानपायिनीम्** इति । 'श्रीवत्सवक्षा नित्यश्रीः,' (रा.यु.११४-१५) 'नित्यैवैषा जगन्माता विष्णोः श्रीरनपायिनी,' (वि.पु.१-८-१७) 'अन्येषु चावतारेषु विष्णोरेषाऽनपायिनी,' (वि.पु.१-९-१४४) 'भगवद्वासुदेवस्य नित्यैवैषाऽनपायिनी,'

---

१. **द्विषट्कार्णस्थः** - द्वादशाक्षरमन्त्रस्थः इत्यर्थः । अक्षरवाची, अर्णशब्दोऽपि प्रामाणिकः । अत एव सहस्रनामभाष्यनिरुक्तौ, 'वस्वर्णो मनुरुज्ज्वलः,' 'सप्तार्णो मृत्युनाशकः' इत्यादि प्रयोगाः दरीदृश्यन्ते ।

1. इत्याद्युक्तं - अ । 2. अवगम्यते - अ ।

र.र. - 'महाविभूतेस्सम्पूर्णषाड्गुण्यवपुषः प्रभोः ।
मम सर्वात्मभूतस्य नित्यैवैषानपायिनी' ।। (ब्रा.पु.) इत्यादिभिरनयोर्न कदाचिदपि विश्लेषः । अवतारेष्वपि कदाचिद्विश्लेषशोकादेरभिनयमात्रमेव । इदञ्च श्रीमद्रामायणान्ते सूचितम् -

'रामस्य सव्यपार्श्वे तु पद्मा श्रीस्समवस्थिता ।
दक्षिणे ह्रीर्विशालाक्षी व्यवसायस्तथाग्रतः' ।। (रा.उत्त.१०९-६) इति । एवं देवीमित्यन्तेन व्याख्येयस्थश्रीशब्दार्थो दर्शितः । तन्मुखेन नित्यं भगवतस्सुखप्रसादनीयत्वं [1]व्यञ्जयितुं[1] **नित्यानपायिनीम्** इत्यन्तेन तत्रत्यमतुबर्थश्चोक्तो भवति ।

ननु भगवतीमित्यादिभिस्स्वतो निर्दोषत्वादौ नित्यसम्बन्धे च सिद्धेऽपि स्त्रीत्वोपाधिवशात्कदाचित्पतिपारार्थ्यवैमुख्यम्, पतिप्रतिकूलाभिप्रायत्वम्, अविमृश्यकारित्वम्, नृशंसत्वम्, निग्रहरुचित्वञ्च -

'शतह्रदानां लोलत्वं [2]मत्स्यानां प्रतिकूलताम्[2] ।
गरुडानिलयोश्शैघ्र्यम् अनुगच्छन्ति योषितः' ।। (रा.अर.१३-६)
'विद्यते स्त्रीषु चापल्यं' (रा.युद्ध.१६-९) 'किं न कुर्वन्ति योषितः'। इत्यादिभिः प्रसिद्धं यदि स्यात्तदा कथं नित्यमशरण्यशरण्यत्वं स्यादित्यत्राह - **निरवद्याम्** इति । सामान्यतस्स्त्रीत्वनिबन्धनदोषवचनं क्षेत्रज्ञेष्वेव कर्मोपाधिविशेषनियतं प्रायिकञ्चेति नास्याः तत्प्रसङ्गः । उक्तञ्च तथैव, 'अनवद्याऽनवद्याङ्गी नित्यं तद्धर्मधर्मिणी' (ल.तं.१७-३१) इति । श्रीरामायणे च 'इयन्तु भवतो भार्या दोषैरेतैर्विवर्जिता' (रा.अर.१३-७) इति ।

किञ्च, 'आनृशस्यं परो धर्मस्त्वत्त एव मया श्रुतः' (रा.सुं. ३८-४१) इति स्मारयन्त्या नृशंसत्वप्रसङ्ग एव नास्ति । निग्रहरुचिश्च समर्थाया एवास्या अत्यन्तापकारिष्वपि न सम्भवतीति स्ववाक्यसिद्धम्,

'असन्देशात्तु रामस्य तपसश्चानुपालनात् ।
न त्वां कुर्मि दशग्रीव! भस्म भस्मार्ह! तेजसा' ।। (रा.सुं.२७-२०) इति ।

एतद्विभूतिभूत[3]देवतादिषु[3] [4]स्वकर्म[4]वशादीदृशदोषसम्भवेऽपि नास्याः तन्मूलभूतसङ्कल्पः ।

देवदेवदिव्यमहिषीम्,

श्रु.भा. - कृताऽभिषेका-**महिषी** । अतः अप्रतिहतचिकीर्षिता ।

र.र. - 'त्वया देवि! परित्यक्तं सकलं भुवनत्रयम् ।
विनष्टप्रायमभवत्त्वयेदानीं समेधितम्' ।। (वि.पु.१-९-१२३)

'सन्त्यक्ता ये त्वयाऽमले!' (वि.पु.१-९-१२९) इत्यादिषूक्तसन्त्यागोऽप्युपेक्षामात्रम् । तच्च प्रीतिकोपविरहेणावस्थानम् ।

नन्वेवं भगवदभिमतत्वादिकं [1]शरण्य[1]त्वौपयिकं सर्वं तत्पत्न्यन्तरेऽपि स्यात् 'विष्टम्भो दिवो धरुणः पृथिव्याः' (तै.सं.४-४-१२) इत्यादिभिस्तन्माहात्म्यप्रसिद्धेः; तारतम्यन्तु दुरूहम् । अतः कथं **अशरण्यशरण्यामनन्यशरण** इत्युच्यते? तत्राह - **देवदेवदिव्यमहिषीम्** इति । यथा मनुष्यादिभ्योऽधिकानां ब्रह्मादिदेवानां मनुष्यस्थानीयानां सर्वप्रकारसमधिकतया भगवान् देवः, तथा ब्रह्मादिदेवपत्नीभ्यस्समधिकानां भगवत्पत्नीनामप्यसौ प्रधानतमेत्यभिप्रायेणात्र **दिव्य**शब्दः ।

इयं ह्युभयाधिष्ठानैकशेषित्वसाम्राज्येन सर्वमङ्गलप्रदायित्वादिभिश्च प्रकृष्यत इति भगवच्छास्त्रे उक्तम् । तथा [2]ब्राह्मे[2]पुराणेऽपि - 'अनन्तनामधेया च शक्तिचक्रस्य नायिका' (ब्र.पु) इति । पत्न्यादिषु शक्तिशब्दस्तद्विहारादिकार्योपयुक्तविशेषणत्वाभिप्रायः । तदिदं प्राधान्यं 'कृताभिषेका महिषी' (अमरः.२-६-५) इति विशेषणात् **महिषी**शब्देनैव वा विवक्षितम् । तदा दिव्यशब्दः तद्विग्रहस्य भगवद्विग्रहस्येवाप्राकृतत्वादिकं व्यनक्ति ।

एवं चिकीर्षितभङ्गपरिहाराय प्रत्याख्यानानर्हत्वाय च पतिवाल्लभ्यातिशय उक्तः । अथ तथाविधोत्कर्षस्वनिकर्ष-स्वापराधदर्शनजनितसाध्वसपरिहाराय प्रजावात्सल्यातिशयमाह - **अखिलजगन्मातरम्** इति । **जग**च्छब्द इह चेतनपरः । 'नमामि सर्वलोकानां जननीमब्धिसम्भवाम्', (वि.पु.१-९-११७) 'त्वं माता सर्वलोकानाम्' (वि.पु.१-९-१२६) इत्यादिभिरस्याश्चतुर्मुखादीन् [3]सर्वाञ्जन्तून्प्रति[3] मातृत्वात् लोकमातेति नाम पठ्यते । एवमुपबृंहणबलात् 'निचदेवीं

---

1. तच्छरण्य - आ । 2. ब्रह्माण्ड - आ । 3. सर्वजन्तून्प्रति - आ ।

अखिलजगन्मातरम्-अस्मन्मातरम्-अशरण्यशरण्याम्,

श्रु.भा. - अखिलशब्दः स्वान्तर्भावपरः न [1]ह्यस्मद्वर्जितमिति[1] भावः । शरण्यं भगवन्तमलब्धवन्तः - **अशरण्याः**,

र.र. - मातरम्' (श्रीसू.१२) इत्यादिषूक्तमस्या मातृत्वं भगवतः पितृत्वेन समानविषयम्, न हि तत् मदेकवर्जम् इदमस्या मातृत्वमित्यभिप्रायेण **अखिल**शब्दः ।

तदिदं विश्वमातृत्वप्रदर्शितं निरुपाधिकवात्सल्यं 'रिपूणामपि वत्सलस्य' (रा.यु.५०-५६) पत्युरनुरूपतमम् । तच्च हितचिन्तारहितेष्वहितचिन्तकेष्वपि कयाचिन्नयत्या कदाचित्फलति । किं पुनरिदानीं हितचिन्तोन्मुखे मयीति भावः । दुस्सहनिरन्तरापराधे दोषैकनिधौ रावणेऽपि हि सोन्मादे पुत्र इव जननीत्वेनैव जातवात्सल्या 'मित्रमौपयिकं कर्तुम्', (रा.सुं.२१-१९) 'विदितस्स हि धर्मज्ञः', (रा.सुं.२१-२०) 'प्रसादयस्व त्वं चैनम्' (रा.सुं.२१-२०) इत्यादिभिस्सर्वाधिकं रहस्यमुपदिश्य, तद्भ्रमप्रशमने प्रयतते स्म । एवमखिलजगन्मातरमित्यन्तैः पदैश्चिकीर्षिताया: तत्प्रपत्तेरतिशयितामोघधर्मत्वं सूचितम् । यथोक्तं काश्यपीये -

'नारायणात्मिकां देवीं श्रियं त्रैलोक्यमातरम् ।
भजमानो महाभाग! परमो धर्म उच्यते' ।। (का.सं) इति ।

अयञ्च तदात्मकत्वव्यपदेशतत्पत्नीत्वाभिप्रायेण । अत्र 'अस्मत्स्वामिन्!' (श.ग.) इतिवदस्मन्मातरमित्यपि श्रीविष्णुचित्तादयः पठन्ति; व्याचक्षते च; 'यामुनमुनिवंशजननेन' पुनश्च विशेषेण **अस्मन्मातरम्** इति ।

उक्तैस्स्वभावैस्सिद्धमपेक्षितानुगुणमाकारमाह - **अशरण्यशरण्याम्** इति । येषां मोक्षोपायनिष्पत्तिकामानां सर्वलोकशरण्योऽपि न भवेच्छरण्यः, तेषामप्यसौ शरण्या; यथोक्तं त्रिजटया -

'भर्त्सितामपि याचध्वं राक्षस्यः! किं विवक्षया? ।
राघवाद्धि भयं घोरं राक्षसानामुपस्थितम्' ।। (रा.सुं.२७-४५)
'प्रणिपातप्रसन्ना हि मैथिली जनकात्मजा ।
अलमेषा परित्रातुं राक्षस्यो महतो भयात्' ।। इति । (रा.सुं.२७-४४)

---

1. ह्यस्मद्वर्जमिति - इ ।

अनन्यशरणः-शरणमहं प्रपद्ये ।। १ ।।

श्रु.भा. - अहमपि तेष्वेक इत्याह - **अनन्य** इति ।

र.र. - वानरपरिषदि च एतदनुवदन् [1]वायुसूनुराह[1] -

'अलमेषा परित्रातुं राघवाद्राक्षसीगणम्' ।। (रा.सुं.५८-८८)
'ततस्सा ह्रीमती बाला भर्तुर्विजयहर्षिता ।।
अवोचद्यदि तत्तथ्यं भवेयं शरणं हि वः' ।। (रा.सुं.५८-९१) इति ।

'पापानां वा शुभानां वा' (रा.यु.११६-४५) इत्यादीनि च प्रभञ्जनसुतं प्रति तद्वाक्यानि । कुपितनरसिंहसमीपागतिभीताश्च प्रजापतिप्रभृतयः तामेव विश्वमातरमाश्रित्य तत्पुरस्कारेण तमुपसेदुरिति पुराणप्रसिद्धम् । आहुश्च 'मातर्मैथिलि! राक्षसीस्त्वयि तथैवार्द्राऽपराधास्त्वया रक्षन्त्या' (श्रीगु.र.को.५०) इत्यादि ।

भवत्वेवमशरण्यशरण्यत्वं तस्याः; भवतस्तेन किमायातमित्यत्र तदेकप्रपत्तियोग्यां स्वावस्थां दर्शयति - **अनन्यशरण** इति । 'अन्यच्छरणं यस्य नास्ति सोऽनन्यशरणः'; **शरणम् -** उपायः ।

'उपाये गृहरक्षित्रोः शब्दश्शरणमित्ययम् ।
वर्तते साम्प्रतन्त्वेष उपायार्थैकवाचकः' ।। (अहि.सं.३७-३१)

इति व्यवस्थापनात् । एवमुत्तरत्रापि द्रष्टव्यम् । उत्तमपुरुषेणैव स्वान्वये सिद्धे **अहम्** इत्यधिकोक्त्या स्वस्य च दुष्करोपायान्तराशक्तिस्सूच्यते । **प्रपद्ये** इत्यत्र यद्यपि गत्यर्थेन धातुना बुद्ध्यर्थेन सता अध्यवसायमात्रमुपस्थाप्यते, तथाऽपि प्रमाणानुसारात् शरणशब्द[2]तात्पर्याच्च[2] प्रार्थनाद्यन्वितभरन्यासं करोमीत्युक्तं भवति । प्रार्थ्यते चानन्तरं फलविशेषः । यस्तु परस्परोपकारेण दक्षिणादानेन प्रशासनेन वा भरन्यासः, नासौ प्रपत्तिः ।

नन्विदं मुमुक्षोरेव, भगवद्व्यवच्छेदेन तदन्य[3]प्रपदने[3] तदैकान्त्यं विहन्यात्, मैवम्; यथा कर्मयोगादिकमनन्योपासनार्थतया उपादीयते, तथा अनन्यप्रपदनार्थतया उपादीयमानमिदं

---

1. वायुसूनुरेवमाह - आ । 2. तात्पर्यानुसाराच्च - अ । 3. प्रपदनं - आ ।

र.र. - तद्वदैकान्त्यमेव स्थापयति । यथा स्वाधिकारोचितपरिकरार्चने अनन्यत्वाविरोधः, तथेहापि -

'आप्तो विष्णोरनाप्तश्च द्विधा परिकरस्स्मृतः ।
नित्यो वन्द्यो न चानित्यः कर्मवश्यो मुमुक्षुभिः' ।। (पौ.सं.)

इति चोक्तम् । एवं घटकतया वरणेऽपि न विरोधः । अन्यथा गुरुभजनतत्पुरस्कारादिकमपि विरुध्येत ।

अथ, 'तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्', (मुं.उ.१-२-१२) 'आचार्यमुपासीत' (आप.ध.१६-१३) इत्यादिभिः तादर्थ्यात् तत्संगृह्यते; [1]इदमपि[1] पूर्वोक्तैस्तथैवाविशेषात् । किञ्च श्रियः प्रपत्तिम्, 'चन्द्रां प्रभासाम्' (श्रीसू.५) इति मन्त्रेणालक्ष्मीनाशनार्थं आमनन्ति । तथा 'ऋचस्सामानि यजूंषि सा हि श्रीरमृता सताम्' (तै.ब्रा.३-७) इति । या मुमुक्षूणां मोक्षहेतुर्विद्यैव लक्ष्मीः, तदभावनाशोऽनया क्रियत इति तदर्थं शरण्याभिप्रायसंवादिनी तन्महिषीप्रपत्तिः युक्तैवेति सिद्धम् ।

[2]एवं सेयं[2] साक्षात्परम्परया वा सर्वफलसाधिका । 'उदाराम्' (श्रीसू.५) इति श्रौतं पदं ह्यनवच्छिन्नविषयम् । तच्च -

'सर्वकामप्रदां रम्यां संसारार्णवतारिणीम् ।
क्षिप्रप्रसादिनीं [3]लक्ष्मीं[3] शरण्यामनुचिन्तयेत्' ।। इत्यादिभिः

स्वायम्भुवादिवचनैरुपबृंहितम् । व्याचख्युश्च - 'ऐश्वर्यमक्षरगतिं परमं पदं वा' इत्यारभ्य 'कथय कोऽयमुदारभावः' (श्रीगु.र.को.५८) इति । व्यतिरेकमुखेन चैतत् स्थिरीकृतं चतुःश्लोक्याम् -

'श्रेयो न ह्यरविन्दलोचनमनःकान्ताप्रसादादृते ।
संसृत्यक्षरवैष्णवाध्वसु नृणां संभाव्यते कर्हिचित्' ।। (च.श्लो.३) इति ।

तत्किमत्रापेक्षितमित्यत्राह - **पारमार्थिक** इति । पारमार्थिकशब्दस्य चरणारविन्दविशेषणत्वे **अर्थ**शब्दः प्रयोजनवाची । [4]**पारमार्थिकम्**[4] - परमार्थ इत्यर्थः ।

---

1. इयमपि - आ । 2. सेयं - अ । 3. देवीं - आ । 4. पारमार्थिकः - आ ।

[स्वस्य भगवच्छरणागतिनैरन्तर्यप्रार्थना]

पारमार्थिक-भगवच्चरणारविन्दयुगलैकान्तिकात्यन्तिक-

श्रु.भा. - किमपेक्षितमित्यत्राह - **पारमार्थिक** इति । अनुभवविशेषणम् । परमपुरुषार्थान्तर्भूतत्वात्, स्वयं परमपुरुषार्थत्वात्, अकृत्रिमत्वाद्वा पारमार्थिकत्वम् । अकृत्रिमत्वम् - निरुपाधिकत्वम्, भक्तिविशेषणं वा पारमार्थिकशब्दः । **चरणारविन्द** इति मातु[1]स्स्तन्यं[1] पुत्रस्येव शेषभूतस्य [2]प्राप्य[2]मिति भावः । **ऐकान्तिकत्वं** फलान्तरार्थत्वाभावात् भगवदेकविषयत्वम् । **आत्यन्तिकत्वम्** अत एव सदानुवृत्तिः, नित्ययुक्त इति यावत् ।

र.र. - यद्वा, परमप्रयोजनभूताऽनुभवग्राह्यं परमभोग्यमित्यर्थः । एतेन परभक्त्यादिजननार्हत्वं व्यज्यते । निर्दोषगुणवत्स्वामिचरणयोस्सेवकस्य भक्त्यतिशयः स्यादित्यभिप्रायेण **भगवच्चरण**शब्दः । **अरविन्द**त्वरूपणञ्च उपायदशायामपि स्वादुत्वसूचकम् 'स भ्रातुश्चरणौ गाढम्' (रा.अयो.३१-२) 'यावन्न चरणौ भ्रातुः' (रा.अयो.९८-८) ।

'तस्य ताम्रतलौ तात! चरणौ सुप्रतिष्ठितौ ।
सुजातमृदुरक्ताभिरङ्गुलीभिरलंकृतौ ।।
प्रयतेन मया मूर्ध्ना गृहीत्वा ह्यभिवन्दितौ' ।। (म.भा.आर.१८६-११९,१२०)

इत्यादिष्विव अन्योन्ययोगादपि शोभमानत्वद्योतनाय **युगल**शब्दः ।

पारमार्थिकशब्दस्य परभक्त्यादिविशेषणत्वे अनुभवविशेषणत्वेऽपि परमप्रयोजनत्वं, भ्रमकैतवराहित्यं वा विवक्षितम् । **ऐकान्तिकत्वं** प्रयोजनान्तरानन्वयेन तदेकनियतत्वम्; तत एव नित्यानुवृत्तत्वम् **आत्यन्तिकत्वम्** । अन्यार्थत्वे हि तत्सिद्धौ निवर्तेत । निरतिशयत्वम् **आत्यन्तिकत्वम्** इति चाहुः ।

---

1. स्स्तनम् - इ । 2. प्राप्त - इ ।

परभक्ति-परज्ञान-परमभक्तिकृत-

श्रु.भा. - उत्तरोत्तरसाक्षात्काराभिनिवेशः **परभक्तिः** । साक्षात्कारः **परज्ञानम्** । उत्तरोत्तरानुभवाभिनिवेशः **परमभक्तिः** ।

र.र. - अत्र **परभक्तिः** उत्तरोत्तरसाक्षात्कारेच्छात्मिका धीः, सा च 'या प्रीतिः' (वि.पु.१-१९-२०) इत्यादिष्विव विषयस्वभावजा, न त्विष्टसाधनत्वबुद्धिजा । **परज्ञानम्** - उत्तरोत्तरसाक्षात्कारः । साक्षात्कृते निरन्तरानुबुभूषा **परमभक्तिः** । अनुभवस्त्विह अनुकूलतमत्वेन साक्षात्कार एव । नित्यानां मुक्तानाञ्च नित्यानुवृत्तैक[1]रूपानुभवः[1] क्षणभेदेन परभक्तित्वाद्याकारभेदैश्च विकल्प्यते । पूर्वपूर्वक्षणेषु उत्तरोत्तरक्षणावच्छिन्नस्वरूपस्य इष्टतमत्वमभिप्रेत्य कृतत्वव्यपदेशः । तस्य मुख्यत्वन्तु योगविशेषजन्यानुभवे ।

ननु इहोपायभूतपरभक्त्यादिभिः [2]मुक्त[2]दशानुभवस्य कृतत्वं मुख्यमेवास्तु; तथासति उपरि श्लोकत्रयोदितज्ञानस्य स्थानत्रयोदितपरभक्तेश्च प्रार्थनमुपपद्येत । तदर्थञ्च यथाभाष्यं सम्प्रतिपन्नाङ्गप्रपत्तिरिह प्रार्थिता स्यात्? मैवम्, 'प्रकृतिं स्थूलसूक्ष्मरूपां विसृज्य तदानीमेव मत्प्रसादलब्धमच्चरणारविन्दयुगलैकान्तिकात्यन्तिकपरभक्तिपरज्ञान' इत्यादि-वक्ष्यमाणसरूपतया तदनुगुणमिह व्याख्यातुमुचितत्वात् ।

[भगवत्प्रपत्तेः स्वतन्त्रतया मोक्षसाधनत्वस्थापनम्]

न च भगवत्प्रपत्तेस्स्वतन्त्रतया मोक्षसाधनत्वं नास्तीति वाच्यम्, श्रुतिस्मृति-भगवच्छास्त्रेषु तत्स्वातन्त्र्यदृष्टेः ।

'यो ब्रह्माणम्' (श्वे.उ.६-१८) इत्यादिके हि श्वेताश्वतरमन्त्रे हिरण्यगर्भादिकारणभूत-परमपुरुषशरणागतिः मुमुक्षुणा अनुष्ठेयेति प्रतीयते । न च क्वचिदङ्गत्वदर्शनात् गुरुलघुविकल्पानुपपत्तेश्च व्यवहितसाधनत्वं कल्प्यम्; अधिकारिभेदेन व्यवस्थापनात् । तथा च उपबृंहितं ब्राह्मे पुराणे -

'शरणं त्वां प्रपन्ना ये ध्यानयोगविवर्जिताः ।
तेऽपि मृत्युमतिक्रम्य यान्ति तद्वैष्णवं पदम्' ।। इति । (ब्रा.पु.५३)

अहिर्बुध्न्ये च [3]स्पष्टमुक्तम्[3],

---

1. रूपानुभवे - अ । 2. मुक्ति - आ । 3. सुस्पष्टमुक्तम् - अ ।

र.र. - 'यद्येन कामकामेन न साध्यं साधनान्तरैः ।
मुमुक्षुणा यत्साङ्ख्येन योगेन न च भक्तितः ।।
प्राप्यते परमं धाम यतो नावर्तते यतिः ।
तेन तेनाप्यते तत्तन्न्यासेनैव महामुने! ।।
परमात्मा च तेनैव प्राप्यते पुरुषोत्तमः' ।। (अहि.सं.३७-२५,२६,२७) इति ।

प्रपपत्तियोगश्च अविलम्बित[1]फलप्रद एवं[1] उदाहृतः ।

'अहमस्म्यपराधानामालयोऽकिञ्चनोऽगतिः ।
त्वमेवोपायभूतो मे भवेति प्रार्थनामतिः ।।
शरणागतिरित्युक्ता सा देवेऽस्मिन् प्रयुज्यताम् ।
तस्यानुबन्धाः पाप्मानस्सर्वे नश्यन्ति तत्क्षणात्' ।। (अहि.सं.३७-३०,३१)

इति । अत्रापि 'त्वमेवोपायभूतो मे भव' इत्यादिभिः, न्यासात्मकत्वं सूच्यते । 'तेषान्तु तपसां न्यासमतिरिक्तं तपश्श्रुतम्' (अहि.सं.३७-३६) । इति चाह; न्यासशब्दस्य चात्र शरणागतिविषयत्वं दर्शितम् -

'निक्षेपापरपर्यायो न्यासः पञ्चाङ्गसंयुतः ।
सन्यासस्त्याग इत्युक्तश्शरणागतिरित्यपि' ।। इति । (ल.तं.१७-७४)

'न्यास इत्याहुर्मनीषिणो ब्रह्माणम्' (महाना.उ.६३-७९) इत्यत्र न्यासशब्द-सामानाधिकरण्यन्त्वन्यपरम् । एवं स्वतन्त्रप्रपत्तिसिद्धौ -

'भक्त्या परमया वाऽपि प्रपत्त्या वा महामते! ।
प्राप्योऽहं नान्यथा प्राप्यो मम कैङ्कर्यलिप्सुभिः' ।। इति विकल्पोऽपि

व्यवस्थितविषय उपपद्यते । श्लोकत्रयोदितज्ञानादिकमप्यत्र स्वयम्प्रयोजनतया प्रार्थ्यत इति न विरोधः ।

न च प्रपत्तिस्वातन्त्र्ये भाष्यविरोधः । तथा हि- 'चतुर्विधा भजन्ते मां जनास्सुकृतिनोऽर्जुन'! (भ.गी.७-१६) इत्यादिनोपासनस्येव, प्रपदनस्यापि -

'तावदार्तिस्तथा वाञ्छा तावन्मोहस्तथाऽसुखम् ।
यावन्न याति शरणं त्वामशेषाघनाशनम्' ।। (वि.पु.१-९-७३)

---

1. प्राप्तिपर्यन्त एव - अ ।

परिपूर्णानवरत-नित्य-विशदतम-

श्रु.भा. - परिपूर्णत्वादिपदषट्कं अनुभवविशेषणम् । परव्यूहादि सर्वावस्थभगवद्विषयत्वं परिपूर्णत्वम्; सकृत्वव्यावृत्त्यर्थं **अनवरतत्वम्** । अविरतेच्छावधिमत्वव्युदासाय **नित्यत्वम्** । विरतनित्यत्वव्युदासाय **अनवरतत्वम्** । स्नानाग्निहोत्रादिकं हि **विरतनित्यम्** । परोक्षत्वव्युदासाय **विशदतमत्वम्** ।

र.र. - 'प्रपत्तेः क्वचिदप्येवं परापेक्षा न विद्यते,

सा हि सर्वत्र सर्वेषां सर्वकामफलप्रदा ।। (सन.सं.)

इत्यादिभिस्सर्वाभिमतसाधनत्वावगतेः; सर्वफलसाधारणमपि चरमश्लोकविधेयं तत्र प्रकृतोपायविरोधिपापनिवर्तनरूपोदाहरणविशेषे प्रदर्शयामास । इह तु साध्यान्तर-साधनान्तररहितमन्त्रविवरणप्रवृत्तत्वात्, प्राप्तिविरोधिनिरसनार्थतया उदाहरति । 'तस्मान्नोपाय[1]भक्त्यादिक[1]मिहोच्यत' इति सिद्धम् ।

परभक्त्यादिभिस्साध्यमनुभवादिकं तदभावेऽपि मे प्रपत्तिमात्रेण भवत्विति विवक्षायां प्रस्तुतविरोधाभावेऽपि, वक्ष्यमाणानुसारेण विवक्षान्तरं दर्शितम् ।

'आर्तोपच्छन्दनं गद्यं भाष्यन्तु पररञ्जनम् ।
इत्याविलधियोऽप्येवं प्रसीदेयुः प्रमाणतः' ।।

पुनश्च मुक्तानुभवं परिपूर्णेत्यादिभिः **षड्भिः** विशिनष्टि । अत्र हि मुमुक्षूणां भगवदनुभवविशेषेषु यथासम्भवं सुकृततारतम्येन परिमिताकारगोचरत्वम्, खद्योतस्फुरणवत् सान्तरत्वम्, [2]कंचित्कालम्[2] निरन्तरत्वेऽपि सारस्वतस्रोतोन्यायेन विच्छिन्नप्रवाहत्वम्; सामान्यतस्सर्वविषयत्वेऽपि परोक्षरूपत्वम्, स्वयंप्रियत्वेऽपि मधुरभेषजनयेन मुक्तिरूपस्वप्रयोजनसाधनत्वबुध्या उपादेयत्वम्, अत एव सावधिकरसत्वञ्च स्यात्; निश्शेषनिवृत्तप्रतिबन्धस्य तु न तथेति भावः ।

---

1. भूतपरभक्त्यादिक - अ । 2. किञ्चित्कालं - आ ।

अनन्यप्रयोजनानवधिकातिशय-प्रिय-भगवदनुभवजनित-अनवधिकातिशयप्रीतिकारित

श्रु.भा. - प्रयोजनान्तरार्थत्वव्युदासाय **अनन्यप्रयोजन**त्वम् । तत्र हेतुः **अनवधिकातिशयप्रियत्वम् ।** प्रयोजनान्तरत्वाभावेऽपि सावधिकातिशयप्रियत्वव्युदासार्थम्; अनवधिकातिशयप्रियत्वमुक्तम् । ईदृशानुभवेन जनिताऽनवधिकातिशयप्रीतिः - 'अहो मया ईदृशानुभवो लब्धः' इति पूर्वानुभवलब्धविषयनिरवधिकातिशयानुकूलप्रीतिसन्तानरूपा । तया **अनुकारितम् ।**

र.र. - अत्र प्रीतिहेतुत्वाभिधानेऽपि तदर्थबुध्या उपादेयत्वाभावादनन्यप्रयोजनत्वमविरुद्धम् । तत्र हेतुः अनवधिकातिशयप्रियत्वम् । **भगवदनुभव** इत्यनेन मुक्तौ पाषाणकल्पत्वपक्षः । स्वात्ममात्रानुभवनिर्गुणप्राप्त्यादिवादश्च व्युदस्यते । सर्वविशिष्टब्रह्मानुभवे प्रधानानुभाव्यश्च व्यञ्जितम् ।

अत्र अनुभवजनितप्रीतिर्नाम 'निरतिशयानुकूलोऽयं विषयो मया अनुभूयते' इति । स्वयमपि निरतिशयानुकूल्यवती कृतार्थता बुद्धिः । 'कृतार्थोऽस्मीत्यमन्यत' इतिवत् । सा च सामग्र्यनुवृत्त्या प्रतिक्षणभाविनी प्रवाहविच्छेदरहिता चेत्येके । अन्ये तु - प्रीतेस्स्वरूपतोऽनुवृत्तत्वेऽपि पूर्ववदनुभवस्यैव प्रयोज्यप्रयोजकाकारविभागेन जन्यजनकवाचोयुक्तिः - इति ।

अस्याश्च प्रीतेः **अनवधिकातिशयत्वं** प्रीत्यन्तरापेक्षया निकृष्टत्वविरहात् । ईश्वरस्य नित्यानामपि हि न मुक्तेभ्योऽतिशयिता प्रीतिः । 'श्रोत्रियस्य चाकामहतस्य,' (तै.उ.आन.८) 'भोगमात्रसाम्यलिङ्गाच्च' (ब्र.सू.४-४-२१) इति समानभोगव्यवस्थापनात्, ईश्वरनित्यमुक्तभोगानां उपचयापचयतारतम्यवादयोः अपन्यायमूलत्वाच्च । कैङ्कर्यस्य भगवदिच्छाकारितत्वेऽपि 'प्रहर्षयिष्यामि' (स्तो.र.४६) इति, तत्प्रीत्युद्देशेन प्रवृत्तत्वेऽपि **प्रीतिकारिता** इत्यादिना 'यथार्हं केशवे वृत्तिम्' (म.भा.उ.३९-३८) इति न्यायात् प्रीतेः प्रेरकत्वातिशयेन स्वरसप्रवृत्तिर्नियोगनैरपेक्ष्यञ्च द्योत्यते ।

एवं प्रीत्या प्रवृत्तस्यापि कैङ्कर्यविशेषेषु स्वाम्यभिमतिविशेषास्त्वनुरोधनीयाः । तादृशमेव च कैङ्कर्यम्, 'एतत्सामगायन्नास्ते', (तै.उ.भृ.१०) 'जक्षत्क्रीडन् रममाणः स्त्रीभिर्वा', (छां.उ.८-१२-३)

अशेषावस्थोचित-अशेषशेषतैकरतिरुप-

श्रु.भा. - अशेषावस्थाः - आस्थानान्तःपुरस्थित्यादयः । अशेषशब्दः छत्र-चामर-कळाची-पादुकाग्रहण-ताम्बूलदानादिपरः ।

अनन्तवैनतेयादीनां सर्वविधकैङ्कर्यप्राप्तावपि कैङ्कर्यं प्रतिनियतं दृश्यते, तत्कथमिति शङ्कायामाह - **रतिरूप** इति ।

र.र. - 'स यदि पितृलोककामो भवति' (छां.उ.८-२-१) इत्यादिष्वप्युक्तम् । **अशेषावस्था-**शब्देन परव्यूहादयः स्थानासनशयनादयः जगत्सृष्ट्यादयश्च भगवतोऽवस्थाः, स्वस्य च सशरीरत्वाशरीरत्वानेकशरीरत्वरूपा गृह्यन्ते; कैङ्कर्यस्य तत्तदवस्थोचितत्वं, यथालोकं यथागमं च चामरग्रहणादिना भोक्तृतया भोग्यतया च सन्निधाय कृतत्वात् ।

अशेषशेषता आत्मनः आत्मीयस्य च सर्वस्य परशेषभावः । यद्वा, सर्वप्रकारशेषवृत्तिः । अनन्तगरुडादिप्रतिनियताधिकारकृत्येषु मुक्तस्येच्छाविरहात्, इष्यमाणेष्वपि सर्वेषु '[1]स एकधा भवति[1]', (छां.उ.७-२६-२) 'तावन्ति चक्रे रूपाणि भगवान् देवकीसुतः,' इति प्रकारेण शेषशेषिणोः यथाभिमतरूपपरिग्रहेण मुक्तस्य स्वाभिमतसर्वशेषवृत्तिस्स्यादेव । तस्याम् एकशब्देन स्वप्रयोजनप्राधान्यव्युदासः । अथवा, नित्यानां मुक्तानाञ्च भगवत्प्रीतिफलासु सर्वासु शेषवृत्तिषु परकृतासु स्वकृतासु च प्रीत्यविशेषो विवक्षितः । 'नित्याभिवाञ्छितपरस्परनीचभावैः,' (वै.स्त.७७) 'याभिस्त्वं स्तनबाहुदृष्टिभिरिव' (श्रीगु.र.को.२६) इत्यादिन्यायाच्च । एकरूपा वा रतिः एकरतिः, कालभेदेन सङ्कोचाद्यभावात् । **रति**रिह प्रीतिरिच्छा वा; तया हेतुभूतया कैङ्कर्यं निरूप्यत इत्यभिप्रायेण **रूप**शब्दः । **शेषतैकरतिः** इत्येतत् श्रीवैकुण्ठगद्ये 'परिचर्यैकमनोरथः' इत्यनेन विवृतम् । अत्रानुभवरतिकैंकर्यशब्देषु ज्ञानचिकीर्षाप्रयत्नक्रमश्च प्रकाशितः ।

यद्वा, **शेषतैकरति**रेव कैङ्कर्यप्रधानं स्वरूपम्; [2]तत्परिवाहतया[2] तु व्यापारान्तराणि भवन्तीत्यभिप्रायः । प्राकृतप्रलयादिष्वपि अविच्छिन्नप्रवाहतया अत्रत्यकैङ्कर्याद्यावृत्यर्थं

---

1. स एकधाभवति, द्विधाभवति, अनेकधाभवति - अ ।
2. तत्परीवाहतया - आ ।

नित्यकैङ्कर्यप्राप्त्यपेक्षया,

श्रु.भा. - स्वेन कृतत्वेऽपि परप्रीतिरेव फलम् । 'प्रहर्षयिष्यामि' इति ह्युच्यते; तस्मादन्यकृतत्वेऽपि कैङ्कर्यस्य तज्जनितपरप्रीतिं दृष्ट्वा स्वकृतत्वे सतीव प्रीतिस्सर्वेषां जायत इति तादृशप्रीतिरूपं कैङ्कर्यमित्यर्थः; इति मन्त्रचतुर्थ्यर्थोक्तिः ।

र.र. - **नित्य**त्वोक्तिः 'प्रलये न व्यथन्ति च' (भ.गी.१४-२) इति हि गीतम् । स्वामिसमादेशापेक्षी तच्चोदितकारी किङ्करः, तस्य वृत्तिः कैङ्कर्यम् । तस्य अन्यैर्दुष्प्रापत्वेन अलभ्यलाभत्व-सूचनार्थम्, इतःपूर्वं प्राप्तेरभावादप्राप्तप्राप्तिपक्षव्युदासेन अपेक्षार्हत्वज्ञापनार्थञ्च अधिकः **प्राप्ति**शब्दः । 'सम्पद्याविर्भावः' (ब्र.सू.४-४-१) इत्यादिकं हि नित्यसिद्धेष्वेवाकारेषु मुख्यम्; न तु साध्ये निरङ्कुशविकासे तत्पूर्वकव्यापारे च । तत्र तु निवृत्त[1]प्रतिबन्धस्वरूपोपाधि[1]कत्वसूचनार्थम् । 'आविस्स्युर्मम सहजकैङ्कर्यविधयः' (अ.श्लो.३) इत्यभियुक्तैरुक्तम् ।

'आत्माभिमानानुगुणपुरुषार्थव्यवस्थया ।
भगवत्पारतन्त्र्यादि प्रबुद्धस्य सुखायते ।।
परेच्छायत्तभूम्नोऽपि स्वेच्छाया अविघाततः ।
'सर्वं परवशं दुःखम्' (म.स्मृ.४-१६०) इत्याद्यं नात्र बाधकम्'।।

'स्वतश्शेषत्वकैङ्कर्ये न कुत्राप्यसुखावहे ।
कर्मजत्वात्तथात्वस्य लोके च व्यभिचारतः ।।
महानन्दमहिम्ना च प्राग्दुःखावेक्षणादपि ।
मोहदुःखे तदा स्यातामिति मूढस्य जल्पितम् ।।
सुखस्य मोहनत्वञ्च तामसत्वाद्युपाधिभिः ।
सुखाय च भवेत्क्वापि पूर्वदुःखावमर्शनम् ।।

---

1. प्रतिबन्धोपाधि - आ ।

पारमार्थिकी भगवच्चरणारविन्दशरणागतिः यथावस्थिता

श्रु.भा. - पारमार्थिकी इति तमःकार्यव्युदासाय । आनुकूल्यादिशरीरवती; तद्धि तस्या उपायान्तरेभ्यः व्यावृत्तं स्वरूपम् । **यथावस्थिता** इति रजःकार्यव्युदासाय । प्रपत्तव्यविषयसम्बन्धरूपः प्रकारः । तत्साहित्यमभिप्रेतम् । शरणवरणानर्हे शरण्यत्वधीर्हि अयथावस्थिता स्यात् ।

र.र. - एवमिह अपेक्षया इत्यन्तं व्याख्येये सोपबृंहणचतुर्थ्यभिप्रेतस्य प्रपञ्चनम् । भगवत एव शरणत्वे वक्तव्येऽपि, दिव्यविग्रहस्य शरण्यगुणादिव्यञ्जकत्वम् । चरणग्रहणस्य कृपोत्तम्भकत्वातिशयेन अनतिक्रमणहेतुत्वञ्चाभिप्रेत्य **चरण**शब्दः । **अरविन्द**शब्दः उपायदशायामपि भोग्यत्वं सूचयति । अत्र **भगव**च्छब्दः निरपेक्षरक्षणौपयिकाकार-पौष्कल्यप्रदर्शकः ।

कृत्स्नविदपि भाष्यकारः प्रश्रयप्रकाशनाय **पारमार्थिकी, यथावस्थिता** इति सामान्यतो निर्दिशति । 'त्वमेव वरं वृणीष्व यं त्वं मनुष्याय हिततमं मन्यसे', (कौषी.उ.१) 'यद्धितं मम देवेश! तदाज्ञापय माधव!' (जि.स्तो.१-१८) इतिवत् । एतेन [1]भगवत्प्रपत्तिर्मोक्षसाधनत्वम्[1] इत्येतावन्मया निर्णीतम् । सा यत्स्वरूपा यत्प्रकारेति च न जाने; अतस्त्वयैव वत्सलतया मोक्षार्थभगवत्प्रपत्तेस्स्वरूपादिकं यथाप्रमाणं ज्ञापयित्वा अनुष्ठापनीयोऽहम् इति विशेषनिष्कर्षरहितानामपि विज्ञापनप्रकारश्शिक्षितो भवति । एवं सामान्यत उक्तेऽपि सर्वज्ञा सर्वहितैषिणी देवी स्वयमेव सर्वं विधास्यतीति तात्पर्यम् ।

'देवानां गुह्यम्' (महाना.उ.१०-२२) इत्याद्युक्तं गोपनीयतमत्वम्, तत एव तत्र तत्र तदनुगुणनिर्देशः प्रपत्तिस्वरूपादेर्दुरवगाहत्वञ्च सामान्यनिर्देशेन द्योत्यते ।

ननु सर्वलोकसर्वागमप्रसिद्धायाः प्रपत्तेः कथं दुरवगाहत्वम्? इत्थम्; - केचित् भक्तिप्रपत्त्योर्व्यतिकरितप्रयोगादैक्यमिच्छन्ति । लक्षणभेदाद्भेदमिच्छन्तोऽपि केचित् स्वातन्त्र्येण मुक्तिसाधनत्वं नानुमन्यन्ते ।

---

1. भगवत्प्रपत्तेर्मोक्षसाधनम् - अ ।

र.र. - अन्ये तु, स्वातन्त्र्याभ्युपगमेऽपि 'षड्विधा शरणागतिः' (अहि.सं.३७-२९) इति वचनानुरोधादाग्नेयादिषट्कवत् सम्भूय साधकत्वमाहुः । तत्रैव षण्णां प्रत्येकं साधनत्वमपरे । तेष्वेव यथेष्टं केचित्कतिपयोपेक्षया कतिपयपरिग्राहिणः । नियतैकसङ्ग्रहेऽपि स्वरूपन्यासमात्रत्वम् । प्रार्थनाभरन्यासयोरन्यतरमात्रत्वम् । तयोरेव यथेष्टमङ्गाङ्गित्वम्, विकल्पं वा केचिदाहुः ।

इतरे च प्रपत्तेरविधेयज्ञानरूपत्वम्, अनिवारणादिरूपत्वम्, दक्षिणाज्ञादिहेतुकभरन्यासाविशिष्टत्वम्, अनङ्गत्वं, द्वित्राद्यङ्गत्वम्, सर्वधर्मस्वरूपत्यागाद्यङ्गकत्वम्, भक्तियोगवत् आप्रयाणादनुवर्तनीयत्वम्, भक्तियोगाद्यङ्गकत्वम्, आरब्धकार्यपुण्यपापनिवर्तनाक्षमत्वम्, किं बहुना? गृहागमनाऽञ्जलिप्रणामादिमात्रताञ्च प्रतिपादयन्ति । एवं विप्रतिपत्तियोग्यतया दुष्करः प्रपत्तेर्निष्कर्षः । स तर्हि कथं स्यात्? उच्यते -

तत्र तावत् भक्त्यैक्यादिपक्षान्निक्षेपरक्षादिषु निराकार्ष्म ! षाड्विध्योक्तिरपि 'न्यासः पञ्चाङ्गसंयुतः' (ल.तं.१७-७४) इतिवचनबलादष्टाङ्गयोगोक्तिवदाङ्गाङ्गिसमुच्चयेन स्थापिता । अत एव हि 'षडङ्गं तमुपायञ्च' (ल.तं.१७-५९) इत्यादिकमपि सङ्गच्छते; स्वरूपन्यासस्य अत्रापेक्षितत्वेऽपि 'आत्मात्मीयभरन्यासः,' (ल.तं.१७-७९) 'त्वयि निहितभरोऽस्मि सोऽहं यतः,' (व.स्त.९१) 'तव भरोहमकारिषि धार्मिकैः' (श्रीरं.स्त.२-१०२) इत्यादिप्रमाणसम्प्रदायैः भरन्यासप्राधान्यं सिद्धम् ।

यद्यप्युक्तं भरतमुनिना -

'अनन्यसाध्ये स्वाभीष्टे महाविश्वासपूर्वकम् ।
तदेकोपायतायाञ्चा प्रपत्तिश्शरणागतिः' ।। (भरतमुनिवाक्यम्) इति । यदपि च अहिर्बुध्न्येन 'प्रार्थनामतिश्शरणागतिः' (अहि.सं.३७-३१) इति । तत्रापि पूर्वोक्तप्रमाणानुसारात्, अनन्यसाध्यत्वतदेकोपायत्वोक्तितात्पर्याच्च, प्रार्थनापूर्वकभरन्यासात्मकत्वसिद्धिरित्येषा दिक् । अतो दुरवगाहत्वद्योतनाय **पारमार्थिकी** इत्यादिसामान्यनिर्देश उपपन्न इति ।

एवमीदृशभरन्यासात्मकतया शरण्यत्वोपयुक्ताकारविशिष्टपरतत्त्वविषयतया च निरूप्यायामस्यां प्रपत्तौ, स्वरूपतो विषयतश्च तमःकार्यवैपरीत्यविरहः **पारमार्थिक**त्वम् । प्रकारतोऽङ्गतश्च रजःकार्यप्रकारान्यथाभावराहित्यम्, यथाप्रमाणं फलसङ्गकर्तृत्वादित्यागश्च अत्र **यथावस्थित**त्वम् । राजस-तामसबुद्धिप्रकारश्च 'यया धर्ममधर्मञ्च,' (भ.गी.१८-३१)

अविरताऽस्तु मे ।। २ ।।

श्रु.भा. - अविरता आफलसिद्धेरविश्रान्ता । अव्यवहितसाधनमित्यर्थः । व्यवहितसाधनं हि मध्ये साधनान्तरप्राचुर्ये स्वयं विरतं स्यात् । साक्षादस्तु मे । **अस्तु ते** - इति 'तेन मैत्री भवतु ते' (रा.सुं.२१-२०) इत्यादिमानगत्या निश्चित्येति केचित् ।

र.र. - 'अधर्मं धर्ममिति या' (भ.गी. १८-३२) इति श्लोकाभ्यां गीतः । एतेन अनाप्तागमसिद्धत्वम्, नित्यागमसिद्धत्वेऽपि [1]पुरुषबुध्यन्यथा[1]कल्पितत्वञ्च निरस्तं भवति ।

एवन्तु व्याख्यातं व्यासार्यैः - '**पारमार्थिकी** इति [2]तमःकार्यव्युदासः[2] । आनुकूल्यादि शरीरवती च सा । तद्धि तस्या उपायान्तरेभ्यो व्यावृत्तं स्वरूपम् । **यथावस्थित** इति [3]रजःकार्यव्युदासः[3] । प्रपत्तव्यविषयसम्बन्धरूपः प्रकारः, तत्साहित्यमभिप्रेतम् । शरणवरणानर्हे शरण्यत्वधीर्हि अयथावस्थिता स्यात्' इति ।

अविरता - आमोक्षदानादविश्रान्तव्यापारेत्यर्थः । व्यापारश्चात्र शरण्यप्रसादविशेष एव । 'सकृदेव हि शास्त्रार्थः,' (ल.तं.१७-९०) 'सकृदेव प्रपन्नाय,' (रा.यु.१८-३३) 'ननु प्रपन्नस्सकृदेव नाथ!' (स्तो.र.६४) इत्यादिबलादङ्गतस्स्वरूपतो वा अनुवृत्तिरिह न विवक्षिता । व्याख्येये 'प्रपद्ये' इति वर्तमाननिर्देशस्तु अनुष्ठानकालाभिप्रायः । व्यापारानुवृत्तिकथनात्तु भाष्योदाहृतभक्त्यङ्गप्रपत्तिव्यवच्छेदः । सा हि मध्ये साधनरूपं साध्यान्तरमुत्पाद्य विरतव्यापारा भवति; तदेव तु मुक्तिं साधयति । **अस्त्वि**त्याशासनेन भगवत्प्रपत्तेस्स्वरूपतोऽपि स्वादुतमत्वं सूच्यते ।

मे अकिञ्चनतमस्य अनन्यशरणस्य । एवं विज्ञापिताया विष्णुपत्न्याः प्रतिवचनं निबध्नाति - **अस्तु ते** इति । रावणेऽपि 'तेन मैत्री भवतु ते' (रा.सुं.२१-२०) इति

---

1. पुरुषबुध्या अन्यथा - अ । 2. तमःकार्यव्युदासाय - अ । 3. रजःकार्यव्युदासाय - अ ।

[प्रार्थनायाः भगवता सफलीकरणम्]

अस्तु ते ।। ३ ।। तयैव सर्वं सम्पत्स्यते ।। ४ ।।

श्रु.भा. - [1]स्वसम्बन्धिसम्बन्धिनिस्तरण[1]मपि सर्वशब्दाभिप्रेतम् ।

अथ द्वयस्थं नारायणशब्दं विवृणोति - **अखिल** इत्यादिना । तत्र प्रथमपदेन नारशब्दवाच्यानां धर्म्युच्यते । अखिलशब्दः चिदचिद्गतक्लेशादिभावविकारादि**हेय**परः ।

र.र. - वादिन्याश्शरणागतविषये कैमुत्यसिद्धमिदं वरप्रदानवाक्यमित्युत्प्रेक्ष्य [2]प्रोक्तम्[2] । **ते** मयि न्यस्तभरस्य मया स्वीकृतभरस्य च ।

'उपायदानमेतस्यास्तदिदं प्रतिसंमतम् ।
यथा तस्याः प्रसीदन्त्या हारदानं हनूमते' ।। इति ।

भगवत्प्रपत्तेः पूर्वोक्तनित्यकैङ्कर्यप्राप्तिपर्यन्तफलाविनाभावमाह - **तयैव सर्वं सम्पत्स्यते** इति । **एव**कारेण अत्र उपायान्तरव्यवधाननैरपेक्ष्यं द्योत्यते । यद्वा **अस्तु ते** इत्येतावतैव पर्याप्ते **तयैव** इत्यादिकं विभीषणसहागतराक्षसन्यायेन यथाभिमतानुबन्धिरक्षणाभिप्रायम् । अथवा, श्लोकत्रयोदितज्ञानित्वादिकमत्र परत्र च यत्प्रार्थयिष्यते, तत्सर्वमिह **सर्व**शब्दार्थः । उक्तेन सह वक्ष्यमाणमनुक्तञ्च अनुबन्धिरक्षणम् अभिमतत्वाविशेषात् सङ्कलय्य प्रोच्यते । **सम्पत्स्यते** इति भविष्यन्निर्देशः - प्रपत्त्यनन्तरक्षणप्रभृति तत्तदुचितकालाभिप्रायः । वदान्यत्वव्यञ्जकञ्चेदं वाक्यद्वयम्; 'प्रियवाग्दानशीलो हि वदान्यः' (हला.को.२-२११) ।

एवं श्रीमच्छब्दाभिप्रेतमर्थं उपयोगविशेषपर्यन्तमुदाहृत्य प्राप्यत्व-प्रापकत्व उपयुक्तसर्वाकारसंग्राहकन्नारायणशब्दं व्याचिख्यासुः; तत्र तत्पुरुष[3]व्युत्पत्तौ[3] अयनशब्दार्थं,

---

1. स्वसम्बन्धिनिस्तरण - इ । 2. वा उक्तम् - आ ।3 . वृत्तौ - अ ।

[शरण्यत्वोपपादकानि भगवत्सम्बोधनानि भगवच्छरणागतिश्च]

अखिलहेयप्रत्यनीक-कल्याणैकतान

श्रु.भा. - प्रत्यनीक इति न केवलं विरहमात्रमित्यर्थः । **आनन्दकल्याण**शब्दौ स्वपरापेक्षया अनुकूलत्वपरौ । आनन्दविवरणं वा **कल्याण**शब्दः । कल्याणानां [1]गुणानां[1] एकास्पदमिति वा **कल्याणैकतान**शब्दार्थः । यद्वा स्वसम्बन्धिनामपि मङ्गलावहता **कल्याण**शब्दार्थः । **एक**शब्देन प्रदेशभेदेन जडत्वप्रतिकूलत्वव्युदासः ।

र.र. - बहुव्रीहावन्यपदार्थश्च दिव्यात्मस्वरूपं तावदाह - **अखिल** इति । अत्र सम्बुध्यन्तप्रयोगात् व्याख्येयेऽपि तथात्वेन त्वच्छब्दाध्याहार इति केचित् । **श्रीमन्नारायण! स्वामिन्!** (द्व.मं.) इत्यादौ मन्त्रान्तरे च [2]तद्द्रष्टव्यम्[2] । अन्ये तु, 'प्रार्थनानुगुणतात्पर्यानुसारेण सम्बुद्धिरिह प्रयुज्यत' इत्याहुः ।

अखिलहेयप्रत्यनीकत्वम् - अखिलहेयात्यन्ताभाववत्त्वम् । तेन कतिपयहेयरहितेभ्यो व्यवच्छेदः । **कल्याणैकतानत्वम् -** कल्याणानां सर्वेषां गुणानाम् असाधारणाश्रयभूत-विस्तारत्वम्; नित्यादीनामपि न सर्वमङ्गलगुणवत्वम् । 'समस्तहेयरहितं विष्ण्वाख्यं परमं पदम्', (वि.पु.१-२२-५३) 'तेजोबलैश्वर्यमहावबोधसुवीर्यशक्त्यादिगुणैकराशिः', (वि.पु.६-५-८५) 'स च सर्वगुणोपेतः' (रा.बाल.१-१७) इत्यादि प्रसिद्धोभयलिङ्गाधिकरणार्थः उपयोगातिशयात्प्रथममिहोक्तः । 'नराज्ञातानि तत्त्वानि' (म.भा.आनु.१७८-७) इत्याद्युक्त-कारणत्वादिशङ्कितमचिद्गतं चिद्गतञ्च विकारापुरुषार्थादिकं प्रणतोपेक्षादिपर्यन्तमवद्यं न किञ्चिदप्यस्यास्ति । न च कल्याणगुणेष्वस्याविद्यमानः कश्चिदित्यर्थः । पश्चात्तु ज्ञानबलादि-गुणोक्तिः - एतद्विवरणम् । स्वरूपनिरूपकं ज्ञानत्वादिकमप्यत्र कल्याणशब्देन सामान्यतस्सङ्गृहीतम् । एवं सगुणनिर्गुणश्रुत्योर्विषयभेदेन अविरोधात् कुदृष्टिपक्षश्च निरस्तः ।

यद्वा, कल्याणैकतानम् प्रदेशभेदेन कालभेदेनापि अकल्याणत्वरहितमित्यर्थः । 'ज्ञानानन्दैकस्वरूप', इति तु तद्विशदीकरणम् । ज्ञानतया आनन्दतया च कात्स्न्येन [3]कल्याणत्वमुक्तं[3] भवति । जडाद्भोग्यात् प्रतिकूलोदासीनरूपज्ञानाभ्याञ्च व्यवच्छेदाय

---

1. गुणानां वा - इ । 2. तद्दृष्टम् - अ । 3. कल्याणत्वमित्युक्तं - आ ।

स्वेतर-समस्तवस्तु-विलक्षणानन्त-ज्ञानानन्दैक-स्वरूप! स्वाभिमतानुरूप-

श्रु.भा. - अथ रूपम् । **अभिमतानुरूप**शब्दौ पूर्ववत् ।

र.र. - ज्ञानानन्दयोरुभयोरप्युक्तिः । आनन्दकल्याणशब्दौ स्वपरापेक्षया अनुकूलत्वं वा ब्रूतः । एवम्, 'आनन्दादयः प्रधानस्य,' (ब्र.सू.३-३-११) 'अक्षरधियान्त्ववरोधः' (ब्र.सू.३-३-३३) इत्यधिकरणद्वयोक्तं स्वरूपनिरूपकवर्गद्वयं व्यञ्जितं भवति ।

अथवा, हेयप्रत्यनीकत्वं - आश्रितानां यथोपायं स्वेच्छया हेयनिवर्तकत्वम् । तथा सति लोके स्वसङ्कल्पायत्तहेयसद्भावस्य न विरोधः । न च विरुद्धघटनशक्तिकल्पना; स्वरूपमात्रेण हेयनिवर्तकत्वस्यानङ्गीकारात् । अन्यथा अतिप्रसङ्गात् । कल्याणैकतानत्वं आश्रितानां अभिमतेषु कल्याणेष्वैकाग्र्यम्, [1]अनिष्टनिवर्तनमिष्टप्रापणञ्चेत्यर्थः[1]; स्वस्य निर्दोषमङ्गलगुणाकरत्वमप्यत्र [2]अर्थसिद्धम्[2] । 'फलमत उपपत्तेः' (ब्र.सू.३-५-३७) इत्यधिकरणार्थश्च दर्शितः ।

त्रिविधानां चेतनानां अचेतनानाञ्च पराधीनत्वादिसाम्यादेवंभूतं वस्त्वन्तरं नास्तीत्यभिप्रायेणाह - **स्वेतरसमस्तवस्तुविलक्षण** इति । एतेन ज्ञानभोगसाम्येऽपि सर्वप्रकारसाम्यनिषेधस्सिद्धः । 'नित्यं विभुं सर्वगतं सुसूक्ष्मम्,' (मुं.उ.१-१-६) 'विश्वमेवेदं पुरुषः' (महाना.उ.११-२५) इत्यादिप्रसिद्धं त्रिविधपरिच्छेदराहित्यं प्राधान्यतः पृथगाह - **अनन्त** इति सर्वव्यापित्वात् देशपरिच्छेदराहित्यम् । सर्वकालवर्तित्वात् कालपरिच्छेदाभावः । साक्षात्परम्परया वा सर्वप्रकारित्वेन सर्ववस्तुसामानाधिकरण्यार्हत्वात् वस्तुपरिच्छेदविरहः । येन केनापि प्राशस्त्येन स्वस्मादुत्कृष्टैः कैश्चिद्वस्तुभिः अधरीकृतत्वाभावाद्वा । तद्विग्रहादीनान्तु सन्तोऽपि केचिदतिशयास्तद्विभूतिगता एवेति तैरपि तस्यैवोत्कर्षः । वितस्त्यादिभिः प्रस्थतुलादिभिश्च परिच्छेदो देशपरिच्छेदान्तर्गत [3]एवेति[3] तन्निषेधेन सोऽपि निषिद्धः । 'वस्त्वन्तरशून्यत्वाद्वा, सर्ववस्तुस्वरूपैक्याद्वा वस्तुपरिच्छेदाभावः' इति पक्षौ तु सर्वप्रमाणविरुद्धौ अनन्तपदपूर्वापरश्रुतिविरुद्धौ च ।

---

1. अनिष्टनिवर्तकत्वमिष्टप्रापकत्वञ्चेत्यर्थः - अ । 2. अर्थात्सिद्धम् - आ । 3. इति - आ ।

एकरूपाचिन्त्य-[1]दिव्या[1]द्भुत-नित्य-निरवद्य

श्रु.भा. - एकरूपत्वम् - उभयलिङ्गत्वप्राप्यत्वोपास्यत्वैः । तर्कागोचरत्वम् **अचिन्त्य**त्वम् । **दिव्य**शब्दद्वयम् द्रव्यसंस्थानवैलक्षण्यपरम् । **अद्भुत**त्वं प्रतिक्षणमपूर्वत्वम् । नित्यसंस्थानत्वं - **नित्य**त्वम् । दौर्लभ्यावद्यराहित्यम् **निरवद्य**त्वम् ।

र.र. - यद्यपि दिव्यात्मस्वरूपापेक्षया सर्वेषामाधेयत्वं समानम् । यद्यपि च विग्रहस्य गुणनियाम्यतया गुणानामन्तरङ्गत्वम् । तथाऽपि स्वरूपवद्भूषणास्त्रस्वरूपनिखिलजगदाधारत्वेन तदनुरूपत्वात्तादृशस्वरूपस्य व्यञ्जकत्वात्, सालम्बनयोगविषयत्वेन मुमुक्षूणां शुभाश्रयत्वाच्च प्राधान्यं दर्शयितुं गुणेभ्योऽपि पूर्वं विग्रहमाह - **स्वाभिमतानुरूप** इति । निरवधिकानन्दरूपस्य स्वस्याप्यभिमतमनुरूपञ्च, [2]दिव्यरूपम्[2] । स्वरूपस्य नित्यनिरवधिकानुकूलत्वमन्याभिमतिं न बाधते । सर्वस्य सर्वदा [3]विशिष्टैकानुभव[3]गोचरत्वेन प्रमाणसिद्धत्वात् । सा चाऽभिरूपस्याभरणाभिमतिवन्न स्वरूपानुकूल्यबाधिका ।

एवं भूषणादावप्यभिमतत्वाविरोधः । अनिष्टावहशरीरादिव्यावर्तकैः अप्राकृतत्वध्येयत्वप्राप्यत्वादिभिरपि विग्रहादेरानुरूप्यम्; सर्वदोक्तप्रकारविशिष्टत्वमेकरूपत्वम् [4]नानारूपेष्वपि[4] व्यूहविभवार्चावतारेषु अप्राकृतत्वशुभाश्रयत्वादिकम् 'समस्ताश्शक्तयश्चैताः', (वि.पु.६-७-७०) 'समस्तशक्तिरूपाणि,' (वि.पु.६-७-७१)

> 'बिम्बाकृत्यात्मना बिम्बे समागत्यावतिष्ठते ।
> अर्चाऽपि लौकिकी या सा भगवद्भावितात्मनाम्' ।।
> 'मन्त्रमन्त्रेश्वरन्यासात्सापि षाड्गुण्यविग्रहा' । (सा.सं.६-२२,२३)

इत्यादिभिरुच्यते । परव्यूहादिविग्रहवत्तत्तद्विग्रहानुप्रवेशादर्चाऽपि षाड्गुण्यप्रकाशकशुद्धसत्वद्रव्यमयीत्यर्थः । देवतिर्यङ्मनुष्यादिविचित्रावतारदशायामपि 'आदित्यवर्णं तमसः परस्तात्' (तै.आर.३-४०-१३) इत्यादिप्रसिद्धस्य परमपदनिलयविग्रहस्य सन्निवेशैकरूप्यं वा विवक्षितम् । चिन्त्यत्वेन चोदितस्यापि अचिन्त्यत्वोक्तिः इतरसजातीयतया चिन्तयितुमशक्यतामाह । तेनानित्यत्वादिसाधकसावयवत्वाद्यनुमानानां धर्मिग्राहकमानबाधोऽभिप्रेतः ।

---

1. दिव्यदिव्या - इ । 2. दिव्यविग्रहस्वरूपम् - अ । 3. विशिष्टैकानुकूलानुभव - आ ।
4. नानारूपेष्वपि हि - अ ।

निरतिशयौज्ज्वल्य-सौन्दर्य-सौगन्ध्य-सौकुमार्य-लावण्य-

श्रु.भा. - सौन्दर्यम् - अवयवशोभा । **लावण्यम् -** अवयविशोभा ।

र.र. - [1]दिव्यशब्दौ[1] द्रव्यतस्सन्निवेशादिभिश्च वैलक्षण्यपरौ; अप्राकृतस्थानवर्तित्वा-प्राकृतत्वपरौ वा । 'रूपं विशिष्टं दिवि संस्थितञ्च', (म.भा.मौ.५-३४) 'न भूतसंघसँस्थानो देहोऽस्य परमात्मनः', (म.भा.शां.२०६-६०) 'न तस्य प्राकृता मूर्तिः मांसमेदोऽस्थिसंभवा' (वरा.पु.७५-४४) इत्यादिभिस्तथोक्तेः । **अद्भुत**त्वम् 'तस्य ह वा एतस्य पुरुषस्य रूपं यथा महारजनं वासः' (बृ.उ.४-३-६) । 'सर्वाश्चर्यमयं देवम्', 'तेनाश्चर्यवरेणाहम्', 'अपूर्वरूपसंस्थानम्' इत्यादिप्रसिद्धनिरतिशयवैचित्र्यवत्त्वम् ।

नित्यत्वम् अपि 'नित्याऽलिङ्गा स्वभावसंसिद्धिः' (र.आ.), 'नित्यं नित्याकृतिचरम्' इत्यादिभिरुक्तम् । तेन [2]शुभाश्रयपरविग्रहस्य[2] कल्पितत्वकृतकत्वादिपक्षाः प्रतिक्षिप्ताः । अवतारविग्रहाणामपि सत्यानामेव तत्रैव विभागाविभागावुपदिष्टौ; तेषां प्रत्येकमपि [3]नित्येच्छाधीनतां[3] केचिदाहुः ।

निरवद्यत्वं क्षेत्रज्ञशरीरवत् कर्ममूलत्वदुःखावहत्वादेरभावात् । दिव्यात्मस्वरूपे प्रक्रान्तयोगपुरुषापेक्षयोक्तमनालम्बनत्वरूपमप्यवद्यं दिव्यविग्रहे नास्ति, तस्य यथाश्रुतं यथादर्शनं च सुखानुसन्धेयत्वात् । इह खल्वीश्वरापेक्षया न किञ्चिदपि प्रतिकूलम्, सर्वस्य तदनुकूलतयैव प्रमाणसिद्धत्वात् । तस्य तु परप्रतिकूल[4]सर्वाश्रयस्यापि[4] स्वप्रतिकूललेशर-हिततया समस्तहेयरहितत्वोक्तिः ।

एवं मुक्तनित्यापेक्षयापि न कस्यचित्प्रातिकूल्यम्, तेषामीश्वरेण समानभोगत्वात् । अचेतनापेक्षया तु प्रतिकूलानुकूले कदाचिदपि न स्तः । अत एव तस्य हेयमुपादेयं च नास्ति । तस्य सावद्यत्वोक्तिस्तु चेतनविशेषप्रतिकूलस्वभावयोगितया तदपेक्षा । क्षेत्रज्ञानान्तु स्वप्रतिकूलदुःखतत्कारणसम्बन्धात् सावद्यत्वम् । ईश्वरबुद्धिविशेषरूपस्य क्षेत्रज्ञकर्म-साध्यनिग्रहस्यापि कर्मवश्यगोचरतया तद्दोषत्वमेव । ईश्वरस्य तु असौ प्रशासनरूपतया गुण एव । एवं स्थिते दिव्यविग्रहस्य **निरवद्य**त्वोक्तिः ईश्वरापेक्षया तदाश्रितापेक्षया च शरीरत्वादिशङ्कितप्रतिकूलस्वभावराहित्यपरा ।

---

1. **दिव्याद्भुत**शब्दौ - अ । 2. शुभाश्रयाद्भुतपरविग्रहस्य - अ । 3. नित्येच्छासिद्धतां - आ ।
4. सर्वाश्रयस्य - आ ।

यौवनाद्यनन्त[1]गुणनिधि[1]-दिव्यरूप! स्वाभाविकानवधिकातिशय-

श्रु.भा. - आदिशब्दार्थः - पीनवृत्तायतभुजत्वादि । अथ दिव्यात्मगुणाः । **स्वाभाविक** इत्यादि स्फुटम् ।

र.र. - निरतिशयत्वमौज्वल्यादिषु सर्वेष्वप्यन्वीयते । तच्च तदपेक्षयोत्कृष्टाभावात् अनुत्तमत्ववत् । **औज्वल्यम्** - 'आदित्यवर्णं' (तै.आर.३-४०-१३) 'दिवि सूर्यसहस्रस्य' (भ.गी.११-१२) इत्यादिषूक्तं भास्वरतमत्वम् । **सौन्दर्यम्** - अवयवशोभा; येन 'साक्षान्मन्मथमन्मथः' (भाग.१०-३२-२) इत्युच्यते । 'सर्वगन्धः' (छां.उ.३-४-२१) इति श्रुतिः अनुकूलगन्धविषया; स्रक्चन्दनादि च अत्र कृतकरमित्यभिप्रायेण **सौगन्ध्य**शब्दः । **सौकुमार्यम्** - महाबलत्वेऽपि 'पुष्पहासः' (श्रीरं.स्त.१-८८) इति नाम दुहानं मार्दवम् । यथोक्तम् - 'सुकुमारौ महाबलौ' (रा.अर.१९-१४) इति । **लावण्यम्** - समुदायशोभा ।

'भूयिष्ठं तेज एवाद्भिर्बहुलाभिर्मृदूकृतम् ।
चक्षुरानन्दजननं लावण्यमिति कथ्यते' ।। (अहि.सं.५२) इत्याहुः ।

यौवनं इह न कालकृतावस्था; किन्तु तादृशो विग्रहस्वभावः । तद्यौवनस्य नित्यत्वात् । अन्येषामपि हि यौवने कौमारानन्तरभावित्वमुपलक्षणमात्रमेव । युवतयैव केषाञ्चिदुत्पत्तिश्रवणात्, **आदि**शब्देन शुभाश्रयादिप्रकरणोक्तसर्वगुणसंग्रहः, तत एवाऽनन्त्यम् । **निधि**शब्द इह आश्रयपरो निरतिशयभोग्यत्वव्यञ्जकश्च ।

एवमुपकारकतमत्वाद्यभिप्रायेण गुणेभ्यः पूर्वं विग्रह उक्तः । अथ ईदृशविग्रहाभिव्यङ्ग्य-प्रकृष्टगुणभूयिष्ठतामाह - **स्वाभाविक** इति । अत्र सर्वगुणकन्दभूतैराश्रितानाश्रितगोचरव्यापार-भेदसाधारणैर्ज्ञानादिभिः परत्वम्, आश्रितरक्षणैकान्तैः सौशील्यादिभिस्सौलभ्यञ्च व्यज्यते । **स्वाभाविक**शब्देन नित्यत्वमनन्याधीनत्वं च अत्र विवक्षितम् । ताभ्यां [2]मुक्तनित्य[2]ज्ञानादिभ्यो व्यवच्छेदः । तद्बलादिभ्यो व्यवच्छेदस्तु **अनवधिकातिशय**त्वादपि । **अनवधिकातिशय**-शब्दः - पूर्ववत् । 'पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च' (श्वे.उ.६-८) इत्याम्नातं स्वाभाविकत्वं परत्वञ्च [3]सर्वेषु गुणेषु[3] योज्यमिति भावः ।

---

1. कल्याणगुणनिधि - इ । 2. नित्यमुक्त - आ । 3. सर्वगुणेषु - अ ।

ज्ञान-बलैश्वर्य-वीर्य-शक्ति-तेजः-

श्रु.भा. - षाड्गुण्यम् - साधारणम् ।

र.र. - संकर्षणादिव्यूहत्रयाभिव्यक्तिक्रमेण ज्ञानादिगुणद्वन्द्वत्रिकोक्तिः । प्रत्येकं च गुणद्वन्द्वेषु पौर्वापर्यहेतुर्भगवच्छास्त्रोक्तः । यथा -

'बलं वीर्यं तथा तेज इत्येतत्तु गुणत्रयम् ।
श्रमाद्यवद्याभावाख्यं ज्ञानादेरुपसर्जनम्'।। इति ।

[गुणक्रमोक्तेस्तात्पर्यम्]

ज्ञानम् इह सर्वसाक्षात्काररूपम्, 'यः सर्वज्ञः सर्ववित्' (मुं.उ.१-१-९) 'सर्वदर्शी स्वाधीनोऽनादिः सर्वेश्वरस्सर्वदृक्' (रहस्याम्नायम्) इत्यादिभ्यः । उक्तञ्च नाथमुनिभिः - 'यो वेत्ति युगपत्सर्वं प्रत्यक्षेण सदा स्वतः' (न्या.त.) इति । **बलं** नाम - श्रमप्रसङ्गरहितं सर्वधारणसामर्थ्यम्, 'एष सेतुर्विधरणः', (बृ.उ.४-४-४२) 'यत्र विश्वं भवत्येकनीळम्', (महाना.उ.१-३) 'तत्सवितुर्वरेण्यम्' 'ध्रुवमचलममृतं विष्णुसंज्ञं सर्वाधारं धाम', (मै.उ.६-३४) 'यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः', (भ.गी.१५-१७) 'परमात्मा च सर्वेषामाधारः परमेश्वरः' (वि.पु.६-४-४०) इत्यादिसिद्धम् । **ऐश्वर्यम्** - 'एष सर्वेश्वरः', (बृ.उ.४-४-४२) 'सर्वेश्वरेश्वरः कृष्णः' (वि.ध.७४-४४) इत्यादिषूक्तमव्याहतेच्छं सर्वनियन्तृत्वम् । 'अजस्सर्वेश्वरः' (म.भा.आनु.सहस्रनामाध्यायः) इति च तन्नामपाठः ।

वीर्यम् - सर्वोपादानत्वे, सर्वधारणे, सर्वनियमनेऽपि विकाररहितत्वम् । यथोक्तम् - 'विकारविरहो वीर्यं प्रकृतित्वेऽपि मे सदा' (ल.तं.२-३०) इत्यादि । **शक्तिः** - स्वेतरसर्वनिर्वाहिका, 'जगत्प्रकृतिभावो मे यस्सा शक्तिरितीर्यते' (ल.तं.२-२८) इत्यादिषु उक्ता सर्वोपादानत्वात्मिका । यद्वा, यदन्यैरशक्यत्वादघटितमिव भाति, तद्घटनसामर्थ्यरूपा । **तेजः** - अस्वाधीनसहकार्यनपेक्षत्वम् । तदुक्तम् - 'तेजस्त्वन्याऽनपेक्षता', इति ।

'सहकार्यनपेक्षा मे सर्वकार्यविधौ हि या ।
तेजष्षष्ठगुणं प्राहुस्तमिमं तत्ववेदिनः' ।। (ल.तं.२-३३) इति च ।

'न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः', (मुं.उ.२-२-१०) 'ज्योतींष्यादित्यवद्राजन् कुरून् प्रच्छादयन् श्रिया' (म.भा.उद्यो.९२-३२) इत्यादिनिदर्शितं 'पराऽभिभवनसामर्थ्यं तेजः केचित्प्रचक्षते' । लोके कश्चित् स्वापाद्यवस्थायां स्वविभूतिं

सौशीली-वात्सल्य-

श्रु.भा. - सौशील्यादिद्वादशम् - भक्तरक्षणासाधारणम् । **सौशील्य** इत्यादि - **शीलं** हि नाम - महतो मन्दैस्सहनीरन्ध्रेण संश्लेषस्वभावत्वम् । तस्य च प्रयोजनान्तरौपयिकत्वाभावात्, **सौशील्यम्** । यद्वा ईश्वरत्वबुद्ध्या यथा आश्रितानां साध्वसं न स्यात्, यथा च स्वयमपि न स्वस्य परत्वबुद्ध्या विलक्षणस्स्यात्, तथा शीलत्वम् - **सौशील्यम्** । **वात्सल्यम्** - दोषेऽपि गुणत्वबुद्धिः । यथा सद्यः प्रसूतायाः धेनोर्वत्से; इदञ्च [1]क्षमाकाष्ठारूपम्[1] । अत एव हि पृथगनुक्तिः क्षमायाः ।

र.र. - न जानाति, जानन्नपि न धारयति; ज्ञात्वा धारयन्नपि न सर्वदा नियन्तुं शक्नोति; शक्तोऽपि धारणनियमनाभ्यां ग्लानो भवति; अग्लानोऽपि न तत्सत्तास्थितिहेतुस्स्यात्; तद्धेतुश्च पराधीनसहकारिसापेक्षस्स्यात्; नैवमसाविति गुणक्रमोक्तितात्पर्यम् ।

अथ - 'तवानन्तगुणस्यापि षडेव प्रथमे गुणाः ।
यैस्त्वयेव जगत्कुक्षावन्येप्यन्तर्निवेशिताः' ।। (षाड्गुण्यविवेकः)

'प्रकृष्टं विज्ञानम्' (व.स्त.१५) इत्याद्युक्तषाड्गुण्यविततिरूपा आश्रितसंग्रहणरक्षणयोर्विशेषत उपयुक्ता गुणा उच्यन्ते । तत्र **सौशील्यम्** - शोभनशीलत्वम्; तच्च अत्र अतिमहीयसोऽप्यतिहीनेषु गुहगोपालादिष्वपि साध्वसप्रशमनाऽनन्यप्रयोजननीरन्ध्र-संश्लेषस्वभावत्वम् । यथोक्तं - 'गुहेन सहितो रामः,' (रा.बा.१-३०) 'अहं वो बान्धवो जातः' (वि.पु.५-१३-१२) इत्यादि । **'वात्सल्यम्'**[१] 'शरणागतवत्सलः' (रा.सुं.२१-२०) इत्याद्यभिप्रेता स्वरक्षरणीयतयाऽभिमतेषु दोषतिरस्कारिणी प्रीतिः । '[2]दोषाणां[2] गुणत्वेन दर्शनम्' इति तु अतिवादः । क्षमाकाष्ठाभूतवात्सल्यकथनेन क्षमाऽप्युक्ता भवति ।

---

१. **वात्सल्यम्** - 'वत्सांसाभ्यां कामबले' (पा.सू.५-२-९८) इत्यनेन कामवति बलवति च लच् प्रत्ययो भवति । 'कामबलशब्दौ' सूत्रे अर्शआद्यजन्ताविति भावः । **वत्सलः** - स्नेहवानित्यर्थः (त.बो.) । एतदभिप्रेत्य दोषतिरस्कारिणी प्रीतिरिति व्याख्यातम् । 'अन्तरधिकरणश्रुतप्रकाशिकायाम्' - **वात्सल्यं** - दोषानादर हेतुः स्नेहः । यथा - मातुः पुत्रे इत्युक्तम् । 'जिज्ञासाधिकरण'श्रुत प्रकाशिकायान्तु (कृत्युद्देश्यत्वविचारावसरे) एवमुक्तम् । सम्बन्धविशेषान्वितेषु प्रीतिः स्नेहः, यस्य विपाकाः अस्थानभयशङ्कित्वम्, दोषानवभासः, 'दोषेऽपि गुणबुद्धिः, इत्यादयः' इत्युक्तम् । अनेन स्नेहस्य विपाकदशा प्रादर्शि - अत्रोक्तान्तिमदशा स्वीकृता प्रथम - व्याख्यातृभिरिति ज्ञायते । अनेन व्याख्यानभेदेन 'बलविषये स्नेहविशेषः परमात्मनो वर्तते' इत्येव पर्यवसन्नम् ।

1. क्षमाकाष्ठानुरूपम् - इ । 2. दोषाणामपि - अ ।

मार्दवार्जव-सौहार्द-साम्य-

श्रु.भा. - आश्रितविरहासहत्वं - **मार्दवम्** । तेष्वस्थानभयशङ्कित्वं वा । मनोवाक्कायैकरूप्यम् - **आर्जवम्** । यथा 'ऋजुबुद्धितया सर्वमाख्यातुमुपचक्रमे' इति । **सौहार्दम्** - तेषामभिमतश्रेयोभिध्यायित्वम्; स्वसत्तानपेक्षतद्रक्षापरत्वं वा । **साम्यम्** - जन्मवृत्तगुणवैषम्यमनपेक्ष्य सर्वेषां समाश्रयणीयत्वे स्वीकृतानां तेषां सम्भावनाविशेषेषु मनसा - तद्विषयादरे च समत्वम्; तारतम्यधीरहितत्वम् ।

र.र. - 'अपि चेत्सुदुराचारो भजते मामनन्यभाक् ।
साधुरेव स मन्तव्यस्सम्यग्व्यवसितो हि सः' ।। (भ.गी.९-३०)

'अपि पापेष्वभिरता मद्भक्ताः पाण्डुनन्दन! ।
मुच्यन्ते पातकैस्सर्वैः पद्मपत्रमिवाम्भसा' ।। (म.भा.आश्व.९६-४६)

इति च आह ।

मार्दवम् - 'तं विना कैकयीपुत्रम्' (रा.यु.१२४-६) इत्यादिवादिन आश्रितविरहाक्षमतया सुप्रवेशत्वम्, 'सापराधेषु शासनोन्मुखस्यापि सामप्रधानत्वं वा', यदाह - 'सामोपहितया वाचा रूक्षाणि परिवर्जयन्' (रा.कि.३१-८) इति ।

आर्जवम् - 'ऋजुबुद्धितया सर्वमाख्यातुमुपचक्रमे' (रा.अर.१७-१५) इत्यादिषु उक्तं मनोवाक्कायव्यापाराणां मिथस्संवादित्वम् । तेन संश्रितेषु विप्रलिप्सानुदयः ।

सौहार्दम् - 'सुहृदं सर्वभूतानाम्', (भ.गी.५-२९) 'उरसा प्रतिजग्राह पार्थं संछाद्य माधवः' (म.भा.द्रो.२८-१७) इत्यादिप्रसिद्धं सामान्यतो विशेषतश्च हितैषित्वम् । तच्च - विषयभेदात् क्वचित् 'एष एवासाधु कर्म कारयति तम्' (कौषी.उ.३-९) इत्याद्युक्ताधोनिनीषया न विरुद्ध्यते ।

साम्यम् - जातिगुणवृत्तादिनिम्नोन्नतत्वानादरेण सर्वैराश्रयणीयत्वम् । यथा 'शबर्या पूजितस्सम्यक्', (रा.बा.१-५८) 'धन्योऽहमर्चयिष्यामि इत्याह माल्योपजीवनः' (वि.पु.१९-२१) इत्यादि । अत एव 'समोऽहं सर्वभूतेषु' (भ.गी.९-२९) इत्याह । एतेन स्वतोऽपक्षपातित्वम्, आश्रितेषु यथार्हमादरसंभावनाक्रमवैषम्यरहितत्वं च सिद्ध्यति । यथा कर्मफलदायिन ईश्वरस्याश्रयणौपाधिकपक्षपातोऽपि समत्वाविरोधी ।

कारुण्य-माधुर्य-गाम्भीर्य-औदार्य-[1]चातुर्य[1]-

श्रु.भा. - कारुण्यम् - [2]स्वार्थाऽनपेक्षा[2] परदुःखाऽसहिष्णुता । **माधुर्यम् -** हन्तुं प्रवृत्तावपि रसापहत्वम् यथा 'एह्येहि फुल्लाम्बुजपत्रनेत्र!' (म.भा.भी.५९-९८) इति ।

गाम्भीर्यम् - आश्रितविषये 'एवमनेन चिकीर्षितम्' इति परिच्छेत्तुमशक्यत्वम्; दीयमानगौरवसम्प्रदानलाघवाऽनपेक्षत्वं वा । **औदार्यम्** - 'अन्यस्मै ददामि' इत्यभिमानविरहेण 'पुत्रवत्प्राप्तं भुङ्क्ते' इति बुद्ध्या दातृत्वम् । इदमियद्दत्तं मयेत्यस्मरणशीलत्वं वा । यद्वा सर्वं दत्वापि 'ऋणं प्रवृद्धमिव मे' इत्यतृप्तत्वम् - **औदार्यम् । चातुर्यम्** - आश्रितार्थेष्वजडक्रियत्वम् । यथा साऽनुबन्धरावणवधेन विभीषणाऽभिषेकः । यद्वा आश्रितदोषगोपनं वा - **चातुर्यम्,** यथा पित्रादेरिव ।

र.र. - कारुण्यम् - अनुद्दिष्टस्वप्रयोजनान्तरा परदुःखनिराकरणेच्छा । परदुःखदुःखित्वादिकं तु न लक्षणम्; अव्याप्तेरतिव्याप्तेश्च । सर्वप्रशासितुस्स्वापराधनिग्रहस्यापि शास्त्रसिद्धत्वात्तदविरोधेन कारुण्यं नियन्तव्यम्, लोकेऽपि तथैव व्युत्पत्तेः ।

माधुर्यम् - क्षीरवदुपायभावेऽपि स्वादुत्वम् । तच्च 'माधुर्यं परम्' इत्यादिषूक्तम् । द्वेषवतां जिघांसितानामपि दृष्टिचित्तापहारित्वेन रसावहत्वं वा । येन शिशुपालस्य तादृशी चरमदशा । अनन्यमनसाम् - 'मच्चित्ता मद्गतप्राणाः' (भ.गी.१०-९) इत्याद्युक्तावस्था च । वधोद्योगप्रदर्शनेऽपि हि सौम्यत्वम् 'एह्येहि फुल्लाम्बुजपत्रनेत्र!' (म.भा.भी.५९-९८) इत्यादिषु प्रसिद्धम् ।

गाम्भीर्यम् - भक्तानुग्रहवदान्यत्वादेः आमूलतो दुरवगाहत्वम् । आश्रितापराधेषु प्रतिग्रहीतृनिकर्षादिषु च सतोऽपि स्वज्ञानस्य गोपनेन [3]दुर्ज्ञानत्वं[3] वा । तदभिप्रायेण हि सर्वज्ञस्याप्यविज्ञातृत्वोक्तिः ।

औदार्यम् - पात्रलाघवं देयगौरवं च अनादृत्य दायविभागन्यायेन प्रत्युपकारादिनिरपेक्षं वितरणरसिकत्वम्, प्रभूतं दत्वाप्यतृप्तत्वं च । अत एव हि अर्थिनस्सर्वान् स्वयमुदारानाह ।

चातुर्यम् - रक्षणीयेषु 'जनयन् प्रत्ययं तदा' (रा.बा.१-६५) इत्यादिप्रसिद्धमतिशङ्काशमनदोषगोपनादिरूपमजडक्रियत्वम् । येन विभीषणसुमुखादिषु विरुद्धानप्यनुकूलयति, शुभाश्रयस्वाकारप्रदर्शनाद्ययत्नोपायैः विषयवैराग्यादिकं च जनयति ।

---

1. 'चातुर्य' इति पदं नास्ति - इ । 2. स्वार्थानपेक्षया - इ । 3. दुर्ग्रहत्वं - अ ।

स्थैर्य-धैर्य-शौर्य-पराक्रम-सत्यकाम-

श्रु.भा. - स्थैर्यम् - 'न त्यजेयं कथञ्चन' (रा.अयो.१०-३) इत्यभिसन्धिमत्त्वम् । भक्तरक्षोपयोगिगुणाः द्वादश । अथ तत्रैव रक्षणे विरोधिनिरसनौपाधिकं त्रिकम् । **धैर्यम् -** स्वस्मिन् प्रतिपक्षागमे सत्यविकृतत्वम् । यथा - 'जटा[1]चूड[1]ग्रन्थिं दृढयति' इति । स्वगृह इव परबले प्रवेशसामर्थ्यम्- **शौर्यम् ।** प्रवेशे सति तन्निरासकौशलं - **पराक्रमः ।** यथा - 'छिन्नं, भिन्नम्' इत्यादि ।

अथ भोग्यगुणयुगम् । **सत्यकाम** इति नित्यविभूतिमत्त्वम् 'काम्यस्स्पृहा स्मरः कामः' इत्यनेकार्थः ।

र.र. - स्थैर्यम् - शरणागतसंग्रहे दोषप्रदर्शकैः अन्तरङ्गैरपि अकम्पनीयत्वम् । तथा च आह - 'मित्रभावेन संप्राप्तं न त्यजेयं कथञ्चन' (रा.यु.१८-३) इत्यादि ।

धैर्यम् - 'अप्यहं जीवितं जह्यां त्वां वा सीते! सलक्ष्मणाम्' (रा.अर.१०-१९) इत्यादिषूक्तमत्यन्ताभिमतवियोगप्रसङ्गेऽपि अभिन्नप्रतिज्ञत्वम् । भीष्माद्याश्रितप्रतिज्ञारक्षणाय स्वप्रतिज्ञा[2]भङ्गेऽप्येतादृश[2]प्रतिज्ञासिद्धिः । अत एव -

'द्यौः पतेत्पृथिवी शीर्येत् हिमवान् शकलीभवेत् ।
शुष्येत्तोयनिधिः कृष्णे! न मे मोघं वचो भवेत्' (म.भा.उ.८१-४८)

इत्यादिभिः अविरोधः । व्यत्ययेन वा **स्थैर्यधैर्ये** व्याख्यातव्ये । अतर्कितोपनतेऽपि [3]बलवति[3] प्रतिपक्षे सावज्ञदृढचित्तत्वं वा **धैर्यम् ।** यथाऽहुः - 'कपोले जानक्याः' (ह.ना.१-१९) इत्यादि । जीवत्यपि महाबले रावणे सागरेप्यलङ्घिते विभीषणमभिषिञ्चता दर्शितोऽयं गुणः ।

शौर्यम् - असहायस्यापि भीमे परबले स्वबल इव निर्भयप्रवेशसामर्थ्यम् । यथा जनस्थानयुद्धमूलबल[4]निबर्हणा[4]दिषु ।

पराक्रमः - प्रविष्टस्य परसैन्ये 'छिन्नं भिन्नं शरैर्दग्धम्' (रा.यु.९३-२२) इत्याद्युक्तो व्यापारः । 'अभियाता प्रहर्ता च' (रा.बा.१-३०) इत्याद्युक्ताविमौ द्वौ गुणावाश्रितविरोधिभङ्गार्थौ; धैर्यादयस्त्रयो वा ।

अथेष्टप्रापणार्थौ गुणावाह - **सत्यकामसत्यसङ्कल्प** इति । [5]इह एतौ शब्दौ[5] भावप्रधानौ कर्मधारयवृत्तौ वा ।

---

1. जूट - इ । 2. भङ्गेपि तादृश - अ । 3. बल्वते - आ । 4. निरसना - अ । 5. इहैतौ - आ ।

सत्यसङ्कल्प-कृतित्व-कृतज्ञतादि-

श्रु.भा. - सत्यसङ्कल्प इति लीलाविभूतिमत्त्वम्, स्वसङ्कल्पाऽनुवृत्युभयविभूतिमत्त्वं वा ।

अथ भक्तरक्षाविषयं उक्तद्वादशकादि[1]विलक्षणं[1] गुणद्वयमाह - **कृति** इति । आश्रितकार्यपूरणेन कृतार्थत्वम् - **कृतित्वम्** । यद्वा कृतम् - क्रिया, तद्वत्त्वम् । आश्रितकर्तव्यस्य स्वयं कर्तृत्वम् । यथा 'अहं स्मरामि' इति । कृतमेव जानाति, न तु करिष्यमाणांशमकृतमिति **कृतज्ञः** । यद्वा, स्वल्पमप्याश्रितैर्यत्साधुकृतम्, तदेव जानाति; आश्रितकृतं दोषं स्वकृतं श्रेयश्च न स्मरतीति **कृतज्ञः** ।

र.र. - काम्यन्त इति [१]**कामाः**[१] - स्वेन स्वाश्रितैश्च भोग्या विभूतयः, ते च **सत्याः** - नित्या इत्यर्थः । अमिथ्याभूतकामत्वमप्रतिहतेच्छत्वं, च नैरर्थक्यपुनरुक्तिभ्यां नात्र विवक्षितम् ।

सत्यसङ्कल्पत्वम् - स्वावताराद्यपूर्वभोग्यान्तरसृष्टौ जगद्व्यापारमोक्षप्रदानादिषु चाऽमोघसङ्कल्पत्वम् । तेन तत्सङ्कल्पादभिमतलाभे निस्संशयत्वं स्यात् ।

उक्तगुणवर्गादधिकोपकारकं गुणद्वयमाह - **कृतित्व-कृतज्ञता** इति । [२]कृतमिहोपकारः[२] - कृतज्ञादिशब्दे तथा दृष्टेः । तद्वत्त्वं **कृतित्वम्,** उपकर्तृत्वमित्यर्थः । यद्वा - 'अभिषिच्य च लङ्कायाम्' (रा.बा.१-८५) इत्याद्युक्तं आश्रितकार्यपूरणेन कृतकृत्यत्वम् - कर्तव्यशेषरहितेषु कृतिशब्दप्रयोगात् । 'न मे पार्थास्ति कर्तव्यम्' (भ.गी.३-२२) [2]इत्युक्तं[2] विहितानुष्ठान-नैरपेक्ष्यं धर्मप्रवर्तनार्थानुष्ठानत्वं वा विवक्षितम्, तेनापि परोपकारार्थमेव प्रवृत्तत्वमुक्तं भवति । श्रूयते च 'न कर्मणा वर्धते नो कनीयान्' (तै.ब्रा.३-१२-५५) इति । तथा च श्रुत्यन्तरम् 'स न साधुना कर्मणा भूयान् नो एवासाधुना कनीयान्' (बृ.उ.६-४-२२) इति अथवा 'आदिकर्मणि क्तः' (पा.सू.३-४-७१) कृतं कर्तव्यत्वेनोपक्रान्तमाश्रितानां यद्धितं, तत्सर्वं पूर्वमेवाऽनेन प्रयोजककर्त्रा प्रारब्धमित्यर्थः । स्वेन कृतं परोपकारं प्रत्यपि स्वस्यैव शेषित्वं वा **कृतित्वम्** ।

---

१. **कामाः** - अत्र कर्मणि प्रत्ययः । भोग्यविभूतिः विवक्षिता । भावार्थत्वे सङ्कल्पवाचित्वेन पुनरुक्तिः स्यादिति भावः ।

२. **कृतमिहोपकारः** - अत्र 'तयोरेव कृत्यक्तखलर्थाः' इत्यनेन भावार्थे क्तप्रत्ययः ।

1. लक्षणम् - इ । 2. इत्याद्युक्तं - अ ।

असङ्ख्येय-कल्याण-गुणगणौघ-महार्णव!

श्रु.भा. - 'एकैक [1]गुणेष्व[1]नेकान्तर्भावाऽभिप्रायः **गण**शब्दः । स एव **ओघः** - प्रवाहः, तस्य **महार्णवः,** न गुणायत्तं महत्वम्; गुणास्तु स्वावस्थाऽवस्थानाय भगवत्स्वरूपगताः । अन्यथा न स्थातुं शक्नुवन्तीति भावः ।

र.र. - **कृतज्ञता** - परैः कृतस्यानुकूल्यलवस्य पश्चात्तैरनन्तापकारकरणेऽपि स्वयं च अनन्तप्रत्युपकारकरणेऽपि अकृतप्रत्युपकारवत्तदनुबन्धिपर्यन्तसंरक्षणाय तस्यैवानुदर्शनम् । यथोक्तं -

'न स्मरत्यपकाराणां शतमप्यात्मवत्तया ।
कथञ्चिदुपकारेण कृतेनैकेन तुष्यति' ।। (रा.अयो.११-१) इति ।

'गोविन्देति यदाक्रन्दत् कृष्णा मां दूरवासिनम्', (म.भा.उ.४७-२२) 'त्वदङ्घ्रिमुद्दिश्य' (स्तो.र.२८) इत्यादि च । एतेन संश्रितानां पश्चाद्दोषसम्भवेऽपि हितैषिणा शिक्षणमात्रप्रवृत्तत्वं सिद्ध्यति । अथवा, अर्थिषु नियमान्तरानुसारेण स्वकृतं तादात्विकप्रत्याख्यानमकृत्यवत् जानातीति **कृतज्ञः** । यदूचे - 'शिरसा याचतस्तस्य वचनं न कृतं मया' (रा.यु.२४-२१) इति । इदञ्च प्राप्तावसरे भरतस्येवापेक्षापूरणाय स्यात् ।

आदिशब्देन 'आनृशंस्यमनुक्रोशः' (रा.सुं.३८-४१) इत्यादि प्रसिद्धसर्वगुणसंग्रहः ।

असङ्ख्येय शब्दः -

'यथा रत्नानि जलधेरसङ्ख्येयानि पुत्रक! ।
तथा गुणा ह्यनन्तस्याप्यसङ्ख्येया [2]महात्मनः'[2] ।। (वाम.पु.४-४०)

इत्यादिवचनस्मारकः । आश्रितविरोधिनिरसनार्थतया क्रोधादेरपि [3]**कल्याण**[3]शब्देन संग्रहः । 'चतुर्मुखायुर्यदि कोटिवक्त्रः,' (वरा.पु.७३-७५) 'वर्षायुतैर्यस्य गुणा न शक्याः' (म.भा.कर्ण.९१-१७) इत्यादि प्रसिद्धापरिच्छेद्यगुणानन्त्यं तापत्रयप्रशमनत्वं दुरवगाहत्वं च व्यनक्ति **गुणगणौघमहार्णव** इति । एकैकगुणस्यावान्तरानेकगुणगर्भत्वं **गण**शब्देन व्यज्यते । **गुणगणा** एव **ओघाः** - जलप्रवाहाः, तेषां **महार्णव** इवायमेकाश्रयभूत इति भावः ।

स्वोचित-विविध-विचित्रानन्ताश्चर्य-नित्य-निरवद्य-निरतिशयसुगन्ध-निरतिशयसुखस्पर्श-निरतिशयौज्वल्य-किरीट-मकुट-

श्रु.भा. - अथ भूषणानि, कटक-मकुटादि जातिभेदो वैविध्यम् । एकैकाऽवान्तरभेदपरः **विचित्र**शब्दः । **अनन्ताश्चर्य**म् निरतिशयाश्चर्यम् । उत्तरोत्तरं **निरवद्यत्व**मनुसन्धेयम् । विग्रहचिन्तायामपि पूर्वभाविनी हि दिव्याभरणचिन्ता । **निरतिशयसुगन्ध**त्वादिकम् - इतरभूषणवैलक्षण्यम् । 'सर्वगन्धस्सर्वरसः' (छां.उ.३-४-२१) इत्यादिवत् ।

मकुटम् - किरीटाग्रावयवो नायकाधारः । यद्वा, **मकुटम्** शिरोभूषणमात्रम् । यथा - 'ना कुण्डली ना मकुटी' (रा.बा.६-१०) इति । किरीटरूपं मकुटम् - **किरीट-मकुटम्** । **दिव्य**शब्दः सर्वत्राऽप्राकृतपरः ।

र.र. - अथ स्वरूपस्य विग्रहवद्गुणवच्च विग्रहस्य शोभातिशयहेतुभूतानि भूषणान्युच्यन्ते - **स्वोचित** इति । उक्त स्वरूपरूपगुणवतस्स्वस्यानुरूपत्वं **स्वोचितत्वम्**; किरीटत्वादिभेदस्य तत्तत्स्वरूपोपादानसिद्धत्वात्, आश्चर्यत्वस्य पृथगुक्तेश्चात्र **विविधविचित्र**शब्दौ हेमरत्नमुक्तादिमयत्वेन तत्तदवान्तरशिल्प[1]विशेषैश्च[1] प्रत्येकं वैषम्यं ब्रूतः । **अनन्त**शब्दश्चाश्चर्यविशेषकः । असङ्ख्येयत्व विवक्षायामपरिमितशब्दः पृथुतरत्वपरः ।

नित्यनिरवद्यत्वाभ्यां प्राकृतभूषणव्यावृत्तिः । 'स्रग्वस्त्राभरणैर्युक्तम्' (पौ.सं.) इति हि नित्यं रूपं प्रतिपाद्यते । सर्वदा निरवद्यत्वेन वा कादाचित्कावद्यशङ्काव्युदासः । सर्वगन्धस्यापि दिव्यरूपस्यामोदातिशयहेतुतया **निरतिशयसुगन्धत्वम्** । अनभिमत-काठिन्याद्यभावात् **निरतिशयसुखस्पर्शत्वम्** । सूर्यादि तेजोऽभिभावुकदिव्यविग्रहतेजसापि अनभिभूतत्वात् **निरतिशयौज्वल्यत्वम्** ।

कर्णिकामकुटव्यावृत्त्या सर्वाधिपत्यसूचनार्थं **किरीट**शब्देन **मकुट**विशेषणम् । धारकपुरुषभेदेन हि **मकुट**द्वैविध्यं शिल्पशास्त्रादिप्रसिद्धम् । [2]यद्वा[2] - 'ना कुण्डली ना मकुटी' (रा.बा.६-१०) इति प्रयोगात् शिरोभूषणमात्रे **मकुट**शब्दः । अथवा किरीटस्योर्ध्वभागो **मकुट**शब्देन उच्यते ।

---

1. विशेषभेदैश्च - अ । 2. अथवा - अ ।

चूडाऽवतंस-मकरकुण्डल-ग्रैवेयक-हार-केयूर-कटक-श्रीवत्स-कौस्तुभ-
मुक्तादामोदरबन्धन-पीताम्बर-काञ्ची-गुण-नूपुराद्यपरिमित-दिव्यभूषण!
स्वानुरूपाचिन्त्यशक्ति-शङ्ख-चक्र-गदाऽसिशार्ङ्गाद्यसङ्ख्येय-

श्रु.भा. - अथ दिव्यायुधानि । एकैकायुधस्य सर्वायुधकार्यशक्तिमत्त्वम् - **अचिन्त्य[1]शक्तित्वम्[1]** । यथा -

[2]"सहायकृत्यं किन्तस्य[2] येन सप्तमहाद्रुमाः ।
शैलश्च वसुधा चैव बाणेनैकेन दारिताः' ।। (रा.कि.३६-८) इति ।

परशुटङ्कखनित्रादिकार्यम्, एकेन सालगिरिरसातलभेदिना शरेण हि कृतम् ।

र.र. – मकरसन्निवेशं कुण्डलं **मकरकुण्डलम्;** अविभक्तलक्षणरूपस्यापि श्रीवत्सस्य भूषणसमानतया **भूषण**त्वोक्तिः । तादृशपृथक्संस्थानयोगाच्च; भूषण[3]देवताध्याने[3] तदभिव्यक्तिः । **मुक्तादामानि** एकावलीत्रिसरादीनि । **पीताम्बरस्य** भूषणतया उक्तिः शोभातिशयहेतुत्वमहार्घत्वाद्यभिप्राया । यथा -

'अतसीपुष्पसंकाशः पीतवासा जनार्दनः ।
व्यभ्राजत सभामध्ये हेम्नीवोपचितो मणिः' ।। (म.भा.उद्यो.९४-६५) इति ।

आदिशब्देन च हस्तबन्धाङ्गुळीयकादिसङ्ग्रहः । उक्तगुणोत्कर्षहेतुभूतद्रव्यवैलक्षण्यज्ञापनाय भूषणायुधयोः **दिव्य**शब्दः ।

एवमाश्रितानाम् अनुभवार्थानि भूषणान्युक्त्वा तदनुभवतद्रक्षणयोः उपयुक्तानि दिव्यायुधान्याह - **स्वानुरूप** इति । पूर्वोक्तविग्रहादिविशिष्टापेक्षया **स्व**शब्दः । तत्तदानुरूप्यं यथोचितं ग्राह्यम् । सर्वेषाम् आयुधानां सर्वायुधकार्य[4]करत्वात्[4] **अचिन्त्यशक्ति**त्वोक्तिः । कुठारटङ्ककुद्दालादिकार्यं सालशैलवसुधातलभेदनमेकेन हि शरेण कृतमुच्यते, 'बिभेद च पुनस्सालान्', (रा.बा.१-६७) 'सहायकृत्यं किन्तस्य' (रा.कि.३६-८) इत्यादिभिः ।

---

1. शक्तिमत्त्वम् - इ । 2. साहाय्यार्थकृतं तेन - इ । 3. देवताध्यानेन - अ । 4. शक्तत्वात् - अ ।

नित्य-निरवद्य-निरतिशयकल्याण-दिव्यायुध!
स्वाभिमत-नित्य-निरवद्यानुरूप-स्वरूप-रूप-गुण-विभवैश्वर्य-
शीलाद्यनवधिकातिशयासङ्ख्येय-कल्याणगुणगण-श्रीवल्लभ!

श्रु.भा. - निरवद्यत्वम् - पूर्ववत् । **निरतिशयकल्याण**त्वम् - शोभनावहत्वम् । तान्याभरणकोटावपि हि निविशन्ते । अथ दिव्यमहिषीविशेषणानां [1]पूर्ववदर्थः[1] ।

र.र. - यद्वा, नित्यसूरिसमाविष्टतया तदिच्छानुगुणविचित्रकार्यसामर्थ्यमिह विवक्षितम् । उक्तं च उत्तरश्रीरामायणे -

'शरा नानाविधाश्चापि धनुरायतविग्रहम् ।
अन्वगच्छन्त काकुत्स्थं सर्वे पुरुषविग्रहाः' ।। (उ.रा.१०९-७) इति ।

चक्रस्य हेतिराजत्वेऽपि शङ्खस्य पूर्वोक्तिः, सर्वशक्तेर्भगवतो मोक्षप्रदानशक्तिसूचकतया अभ्यर्हितत्वाभिप्राया । यथोक्तं परमसंहितायाम् -

'सृष्टिबीजं तथा पद्मं चक्रं स्थितिनिबन्धनम् ।
गदा संहारबीजन्तु शङ्खं मुक्तिनिबन्धनम्' ।। (परम.सं) इति । एवमन्यत्रापि ।

अत्र पञ्चानां कण्ठोक्तिः प्राधान्यात् । पञ्चायुधानि पञ्चभूतशक्तिरूपाणीति [2]भागवते[2] प्रोक्तम्; अस्त्रभूषणाध्यायादिषु महदादितत्त्वरूपाणीति; तदुभयं तात्पर्यभेदादविरोधेन नेयम् । **आदि**शब्देन हल-मुसलादि संग्रहः । सहस्रभुजविश्वरूपादिविग्रहेषु आयुधानाम् असङ्ख्येयत्वम् । 'अनेकदिव्याभरणं दिव्यानेकोद्यतायुधम्' । (भ.गी.११-१०) इत्यादिभिः सुव्यक्तम्; **नित्यनिरवद्य**त्वं पूर्ववत् । शुभलक्षणपौष्कल्यादाभरणकोटावपि निविश्य शोभातिशयहेतुत्वात् अनुकूलतमस्वभावत्वात्, मुमुक्षुध्येयविग्रहविशेषणतया मोक्षोपयोगित्वाच्च **निरतिशयकल्याण**त्वम् ।

अथ एवंविधभूषणायुधादिविशिष्टस्य निरुपाधिकभोग्यस्य भर्तुः प्रधानभोक्तृत्वेन अवस्थिता देवीः प्रतिपादयन् प्रथमं व्याख्येये प्राप्यप्रापकदशयोर्नित्यान्वितत्वेन निर्दिष्टां

1. प्राग्वदर्थः - इ । 2. भारते - अ ।

एवम्भूत-भूमि-नीळा-नायक!

श्रु.भा. - अथातिदेशः - **एवम्** इति । लक्ष्म्यपेक्षया भूम्यादीनामपि शेषत्वाभिप्रायेण पृथगुक्तिः, यथा, 'याभिस्त्वं स्तनबाहुदृष्टिभिरिव स्वाभिःप्रियं श्लाघसे' इति ।

र.र. - श्रियमादरातिशयादुक्तप्रकारविशिष्टत्वे प्रमाणदार्ढ्यद्योतनाय पूर्ववत्पुनराह - **स्वाभिमत** इति । श्रियो वल्लभ इति विग्रहे । 'नित्यानुकूलं स्वतः' (च.श्लो.२) इत्यादि प्रसिद्धस्वभावायाः श्रियोऽप्यसौ नित्यनिरतिशयभोग्य इति दर्शितं स्यात्, श्रीर्वल्लभा यस्येति विग्रहे तु, प्रियतमया तया निवेदितं न प्रत्याख्यातीति फलति । ईदृशं च अभिमतत्वम् 'न जीवेयं क्षणमपि विना तामसितेक्षणाम्', (रा.सुं.६६-१०) 'न त्वहं तां विना सीतां जीवेयं हि कथञ्चन', (रा.अर.६२-१७) 'कच्चिन्न तद्धेमसमानवर्णम्', (रा.सुं.३६-२८) 'कुशली यदि काकुत्स्थः', (रा.सुं.३६-१३) 'मत्कृते काकमात्रे तु', (रा.सुं.३८-३९) 'यदि रामस्समुद्रां ताम्', (रा.सुं.१६-१३) 'दुष्करं कृतवान् रामः' (रा.सुं.१५-५३) इत्यादिभिः तात्पर्यवृत्त्या व्यज्यते ।

नित्यनियतप्राधान्यतारतम्यक्रमेण श्रिया सह एकासनस्थे देव्यौ तच्छायासंकाशतया दर्शयति - **एवंभूत** इति । तदाहुः - 'देवि! त्वामनु नीळया सह मही देव्यस्सहस्रं तथा' (श्रीगु.र.को.२६) इति । उपदिश्यमानधर्माधारादतिदिश्यमानधर्माधारस्य स्वतः प्राप्तवैषम्याविरोधेन साम्यं व्यवस्थाप्यम् । पररूपेऽपि देवीत्रयसम्बन्धः प्रमाणसंमतः । यथोक्तं बलपौष्करे -

'देवो वैकुण्ठनाथस्तु अनन्तासनसंस्थितः ।
सेव्यः श्रीभूमिनीलाभिः प्रादुर्भावैस्तु चाखिलैः ।।
शङ्खचक्रधरो नित्यं जानुन्यस्तैकहस्तवान् ।
अभयप्रदहस्तश्च नीलजीमूतसन्निभः ।।
ध्यातव्यो नित्यलोकस्थो भुक्तिमुक्तिफलप्रदः' ।। (ब.पौ.) इति ।

नित्यग्रन्थोक्त ध्याने तु 'नागभोगे विन्यस्तवामभुजम्', (नि.ग्रं.) इत्येतत्संहितान्तरमूलम् । एतेन वर्णभुजादिविप्रतिपत्तिरपि निरस्ता । अचिन्त्यशक्तेरीश्वरस्य स्वच्छन्दवृत्तेः परसंज्ञितरूपेऽपि तत्तत्प्रतिपत्त्यर्थं तत्तत्संहितोक्ता विशेषा नान्योन्यं बाधमर्हन्ति, यथा नरसिंहरूपे सप्तसप्ततिभेदाः; यथा च 'कृष्णरूपाण्यनन्तानि' (पाञ्चरात्रम्) इत्युच्यते, एवं परव्यूहादिष्वपि यथोपदेशं सर्वस्य सत्यत्वम् । गीयते च - 'पश्य मे पार्थ! रूपाणि शतशोऽथ सहस्रशः' (भ.गी.११-५) इति ।

स्वच्छन्दानुवृत्ति-स्वरूप-स्थिति-प्रवृत्तिभेद-
अशेष-शेषतैकरतिरूप-नित्य-निरवद्य-निरतिशय-ज्ञान-क्रियैश्वर्यादि-

श्रु.भा. - अथ परिजनः, - सजातीय-विजातीयव्यावर्तकाकारविशिष्टं - **स्वरूपम्;** तस्य प्रतिनियतकालसम्बन्धः - **स्थितिः,** ईश्वरेच्छां ज्ञात्वानुवर्तते नित्यसिद्धाः, संसारिणस्तु तदनभिज्ञाः, तत्सङ्कल्पात्प्रवर्तन्त इति भिदा अभिप्रेता । **भेदः** - स्वरूपस्थितिप्रवृत्तिविशेषः, यद्वा संसारिभ्यो नित्यानां व्यावर्तकधर्माः, **स्वच्छन्दानुवृत्तिस्वरूपस्थितिप्रवृत्तय** इत्यर्थः **नित्यनिरवद्य** इति मुक्तव्यावृत्तिः । **क्रिया** - कैङ्कर्यम् । **ऐश्वर्यम्** - देहेन्द्रियादि नियमनम् ।

र.र. - क्वचिद्वल्लभतया क्वचिन्नायकतया निर्देशस्य तत्तद्देव्यनुगुणं तात्पर्यं ग्राह्यम् । एवं देवीपर्यन्तैः आम्रेडितातिशयस्य परमभोग्यस्य अरण्यचन्द्रिकात्वव्युदासाय नित्यभोक्तृवर्गमाह **स्वच्छन्द** इति । [1]सूरयो हि[1] स्वाम्यभिमतं स्वयं साक्षात्कृत्या आत्मात्मीयं सर्वं तदर्थं विनियुज्य तमनुवर्तन्त इति ज्ञापनाय **स्वच्छन्दानुवृत्ति** इत्युक्तम् । **स्व**शब्दः पूर्वोक्तवदीश्वरविषयः । स्थितिः इह स्वरूपस्य सर्वकालानुवृत्तिः । **प्रवृत्तिः** एषां कैङ्कर्यरूपो व्यापारः । स्वरूपादीनां **भेदः** तत्तत्प्रतियोग्यपेक्षया विलक्षणव्यवहारहेतुभूताकारः ।

अशेष इत्यादिकं व्याख्यातम् । स्वरूपनित्यत्वे सर्वात्मसाधारणेऽपि सूरिषु विशेषत उक्तेन [2]सदा[2] सर्वज्ञत्वलक्षणेन नित्यत्वेन मुक्तव्यावृत्तिः, नित्यनिरवद्यतया वा । **निरवद्य**त्वं हि दुःखादिदोषगन्धरहितत्वम् । यथोक्तम् 'हताखिलक्लेशमलैस्स्वभावतः' (स्तो.र.४१) इति । ज्ञानादिविशेषणं वा **नित्यनिरवद्य**त्वम्; तेन कैङ्कर्ये स्वाधीनस्वार्थ[3]कर्तृत्वभोक्तृत्व[3]-भ्रमराहित्यसिद्धिः ।

ज्ञानस्य निरतिशयत्वं ईश्वरज्ञानवत्सर्वविषयत्वम् । क्रियाया ऐश्वर्यस्य च निरतिशयत्वं कैङ्कर्यमात्रे स्थाप्यम् । सर्वविषयत्वे तु परवत्सर्वशरीरत्वादिप्रसङ्गः । अत [4]एव[4] शक्तानामपि जगद्व्यापारेषु उदासीनत्वमित्यापातास्तिकपक्षोऽपि निरस्तः । **प्रवृत्ति**शब्देन क्रियायाः पृथङ्निर्दिष्टत्वात् अत्र क्रियाविषयम् ऐश्वर्यम् इति वा योज्यम् । तदप्येषां परार्थं पराधीनञ्च । **आदि**शब्देन कैङ्कर्यानुगुणबलवीर्यादिसंग्रहः ।

---

1 सूरयोऽपि - आ । 2. सर्वदा - अ । 3. कर्तृत्व - आ । 4. एव हि - अ ।

अनन्त[1]कल्याण[1]गुणगण-शेष-[१]शेषाशन[१]-गरुड-प्रमुख-नानाविधानन्त-परिजन-परिचारिका-परिचरित-चरणयुगल!
परमयोगिवाङ्मनसापरिच्छेद्य-स्वरूप-स्वभाव-

श्रु.भा. - शेषाशनः - सेनापतिः । छत्रचामरपादुकापतद्ग्रहधारणादिभेदेन **नानाविधाः ;** तत्र एकैककोटिनिविष्टाश्च **अनन्ताः ।** विमलाद्यभिप्रायेणोक्तम् **परिचारिका** इति ।

उक्तस्वरूपरूपगुणविभूषणादीनां परत्वसौलभ्यसाधारणत्त्वात्; दिव्यलोकविशेषात्पूर्वं तदुभयमाह - **परम** इति । **परमस्वरूपम् -** नियन्तृस्वरूपम्; **परमस्वभावः -** सौलभ्यम् । निरूपकादन्यो निरुपाधिकधर्मः - **स्वभावः ।** परमयोगि इत्यादिकं देशविशेषणं वा । तथा श्रीवैकुण्ठ-गद्योक्तेः । तदा, **स्वरूपं -** सन्निवेशविशेषविशिष्टद्रव्यम् । तस्य भोग्यताप्रकारः **स्वभावः ।**

र.र. - तत्तत्सेवाविशेषनियतासङ्ख्यातावान्तरेच्छादिवैचित्र्याभिप्रायेण **अनन्तगुणगण**शब्दः । शेषादीनां विशेषाः 'तया सहासीनम्' (स्तो.र.३९) इत्यादि श्लोकेषु द्रष्टव्याः । आसन-वाहन-सेनेश-द्वारपालादिभेदेन **नानाविध**त्वम् । **अनन्त**त्वं इहासङ्ख्यातत्वम् । इह **परिजनाः -** छत्रधारकादयः । **परिचारिकाः -** अनुग्रहविमलाद्याः । तथा कान्तिवारुणीसूत्रवतीरुद्रासुकीर्तिप्रभृतयः शेषादिपत्न्यः । ता अपि हि तेषां यथार्हं सान्तःपुरस्वामि[2]सेवाविशेषार्था एव[2] । एवं 'गुणैर्दास्यमुपागतः' (रा.कि.४-१२) इति न्यायेन स्वामिविग्रहगुणैरपि कैङ्कर्ये प्रेरितत्वमभिप्रेत्याह **परिचरितचरणयुगल** इति ।

एवन्नित्यविग्रहादियुक्तस्य नित्यसूरिसेव्यस्य मुक्तगम्यनिवासस्थानमाह - **परम** इति । **परमयोगिवाङ्मनसापरिच्छेद्यस्वरूपस्वभाव** इति सम्बुध्यन्तं केचिद्व्याचक्षते; तदा पूर्वोक्तानां सर्वेषां परत्वसौलभ्योपयोगित्वज्ञापनाय तदुभयं स्वरूपस्वभावशब्दाभ्यां विवक्षितम्; स्वरूपनिरूपकं निरूपितस्वरूपविशेषकञ्चेति धर्मवर्गद्वयं वा । एवं सति पूर्वोक्तमेव मुखान्तरेण अनवसरे निगमितं स्यात् । इतो वरमनुक्तपरमव्योमप्रकर्षकथनम् ।

---

१. शेषाशनः - 'त्वदीय भुक्तोज्झित शेषभोजिना' इति हि प्रसिद्धिः स्तोत्ररत्ने ।

1. 'कल्याण' इति नास्ति - आ । 2. सेवार्थाः - आ ।

स्वाभिमत-विविध-विचित्रानन्त-
भोग्य-भोगोपकरण-भोगस्थान-समृद्ध,अनन्ताश्चर्य-
अनन्तमहाविभव-अनन्तपरिमाण-

श्रु.भा. - विविधत्वं जातिभेदः । [1]एकैकस्य[1] व्यक्त्यानन्त्यं **अनन्त**शब्दार्थः । आश्चर्यतारूपेण आनन्त्यं वा । **विभवः** - आयतनाद्बहिः भोग्यसमृद्धिः । स्रक्चन्दनादिव्यतिरिक्त[2]रथादि[2]-समृद्धिर्वा ।

र.र. - तथा च तद्विशेषणतयैव सप्तम्यन्तत्वेन श्रीवैकुण्ठगद्येऽपि एतत्पठितम् । परमयोगिनः साक्षात्परब्रह्मस्वरूपाः श्वेतद्वीपवासिनः ।

'ये तु मुक्ता भवन्तीह नरा भरतसत्तम! ।

तेषां लक्षणमेतद्धि यच्छ्वेतद्वीपवासिनाम्' ।। (म.भा.शां.३३५-१४) इति हि स्मर्यते । परमव्योम्नस्स्वरूपं शुद्धसत्वमयम् । तमसः परस्यापि परमव्योम-स्वरूपस्यापरिच्छेद्यत्वमूर्ध्वादिभागेन व्यवस्थाप्यम् । तत्स्वभावो भोग्यतमत्त्वादिरूपः । **विविध**शब्दो भोग्यप्रभृतिषु त्रिष्वप्यन्वेतव्यः । **भोग्यम्** अप्राकृतं स्वाश्रयं शब्दादि । तदुपस्थापकतया स्वीकृतानि **भोगोपकरणानि । भोगस्थानानि** क्रीडापर्वतादीनि । स्वरूपगुणसंस्थानादि वैचित्र्यातिशयेन नित्यमपूर्ववदनुभाव्यतया **अनन्ताश्चर्यत्वम् ।**

प्रत्येकं महद्भिरसङ्ख्यातैश्च रत्नभूषणभद्रासनादिभिर्योगात् **अनन्तमहाविभव**त्त्वम् । पर्यङ्कविद्यादिषु हि विचित्रनदीहृदसभादिविशिष्टं मुक्तगम्यं स्थानमुपदिश्यते । 'सहस्रस्थूणे विमिते दृढ उग्रे यत्र देवानामधिदेव आस्ते' (जै.ब्रा.४-३८४) इति च तलवकाराः अधीयते । पूर्वोक्तापरिच्छेद्यत्वे हेतुरनन्तपरिमाणत्वम् । अनित्यसावद्यस्थानान्तरव्यवच्छेदार्थमिह **नित्यनिरवद्य**त्वोक्तिः । अत्र पञ्चोपनिषत्प्रतिपाद्यानां भूतानां तत्सङ्घातरूपाणाञ्च केषाञ्चिद्भगवन्नित्येष्टत्वेन नित्यत्वमविरुद्धम् । त्रिगुणवत्कर्मिणां भगवत्स्वरूप-तिरोधानादिहेतुत्वाभावान्निरवद्यत्वम् ।

---

1. एकत्र - इ । 2. धनादि - इ ।

नित्य-निरवद्य-निरतिशय-श्रीवैकुण्ठनाथ!

श्रु.भा. - नित्यं - नित्यसंस्थानम् । **निरवद्य** इति [1]अवद्यादयो[1] न तत्रत्यानामित्यर्थः । **निरतिशय** इति अनुत्तमवत् ।

र.र. - निरतिशयत्वं स्थानगुणैस्सर्वैः सर्वस्थानातिशायित्वम् । यथोक्तं महाभारते - 'रम्याणि कामचाराणि विमानानि सभास्तथा' (म.भा.शां.१९६-४) । इत्युपक्रम्य 'एते वै निरयास्तात! स्थानस्य परमात्मनः' (म.भा.शां.१९६-६) इति ।

'आत्मा केवलतां प्राप्तो यत्र गत्वा न शोचति ।
ईदृशं परमं स्थानं निरयास्ते च तादृशाः' ।। (म.भा.शां.९६-११) इति च ।

'कुठि - गतिप्रतिघाते' (धा.पा.६५) इति धातुः, गतिरवगतिः, ज्ञानप्रतिघातककर्मप्रसङ्गरहिता नित्यसूरयो विकुण्ठाः, तैस्सम्बन्धादत्र **वैकुण्ठ**शब्दः अप्राकृतस्थानपरः ।

'विज्ञानसारथिर्यस्तु मनःप्रग्रहवान्नरः ।
सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्' ।। (कठ.उ.१-३-९)

इत्यादिभिस्तत्सिद्धिः । अत्र हि व्यतिरेकविभक्तिस्वारस्यात् 'परमे व्योमन्' (तै.आर.२-८,९-६) इत्यादिभिः ऐकार्थ्याच्च परमपदशब्दो न परमात्मस्वरूपपरः । 'नाकस्य पृष्ठमारुह्य गच्छेत् ब्रह्म सलोकताम्', (महाना.उ.५-२०) 'दिव्यं स्थानं अजरञ्चाप्रमेयम्', (म.भा.मौस.५-२७) 'एकान्तिनः' इत्यारभ्य 'तेषां तत्परमं स्थानं यद्वै पश्यन्ति सूरयः' (वि.पु.१-६-३९) इत्यादिभिः स्थानविशेषस्य स्पष्टोक्तेः, न चैतेषां अण्डान्तर्वर्तिभगवल्लोकविषयत्वम्; तदन्तर्वर्तिनां सर्वेषां उत्पत्तिविनाशश्रवणात्, एतस्य च नित्यत्वाक्षरत्वाजरत्वोक्तेः, 'अण्डं भित्वा तथोद्गता' (ल.तं.) इत्यादिभिरण्डबहिर्भूतत्वसूचनाच्च । तथाऽपि त्रिगुणान्तर्भावो अस्त्विति चेन्न; तमस्तत्वादर्वाचां सुबालोपनिषदि प्रलयप्रतिपादनात्, मुक्तगतौ शीर्षकपालप्रभृति तमःपर्यन्तं तत्त्वभेदेन गन्तव्यदेशाभिधानात् । 'आदित्यवर्णं तमसः परस्तात्'; (तै.आर.३-४०-१३) 'तमसः परमो धाता शङ्खचक्रगदाधरः' (रा.यु.११८-१५) इत्यादेश्च । **नाथः** - ईश्वरः । 'नाथृ नाधृ याच्ञोपतापैश्वर्याशीःषु' इति नाथतेरैश्वर्यार्थत्ववचनात् तस्मिन् दिव्यदेशे भगवत ऐश्वर्यं स्वेनाप्यपन्होतुमशक्यमिति भावः ।

---

1. अविद्यादयो - इ ।

स्वसङ्कल्पानुविधायि-स्वरूप-स्थिति-प्रवृत्ति-

श्रु.भा. - अथ लीलाविभूतिः - [1]नियमनञ्च धारणसिद्धम्[1], **स्वसङ्कल्प** इति । शेषत्वमाह- **स्व** इति । कालस्य प्रकृत्यनन्तरानुक्तिः प्रकृतिपुरुषयोस्संयोग वियोगहेतुत्वात् । 'तस्यैव तेऽन्येन धृते वियुक्ते रूपान्तरम्' इति ह्युच्यते ।

र.र. - एवं नित्यविभूतियोग उक्तः; अथ तत्प्रतिद्वन्द्विलीलाविभूतियोगं वदन् 'कारणं तु ध्येयः' (अथर्व.२) 'यो ब्रह्माणं विदधाति पूर्वम्' (श्वे.उ.६-१८) इत्यादिप्रसिद्धस्य मुमुक्षुसमाश्रयणीयस्य 'यतो वा इमानि भूतानि जायन्ते', (तै.उ.भृ.१) 'जन्माद्यस्य यतः' (ब्र.सू. १-१-२) इत्याद्युक्तं लक्षणमप्याह - **स्वसङ्कल्प** इति । बद्धानां ईश्वराभिमतापरिज्ञानेन प्रायशः **प्रवृत्तिः** इति ज्ञापयितुं अचित्समभिव्याहारेण सर्वचिदचित्सा[2]धारणं[2] **सङ्कल्पानुविधायित्वम्** उक्तम् । प्रकृत्यादीनां स्वरूपस्थित्योरीश्वरनित्येच्छावशेन नित्यसिद्धत्वमिहाभिप्रेतम् । प्रवृत्तिषु तु सङ्कल्पजन्यत्वम् । प्रकृतेस्स्वरूपं त्रैगुण्येन निरूप्यम् । संसारिपुरुषस्य तु सङ्कुचितज्ञानत्वेन । कालस्य तु कलामुहूर्तादिमयत्वेन । त्रयाणां स्थितिः पूर्ववत् । **प्रवृत्तिः** व्यापारः । अत्र प्रकृतिग्रहणं प्राकृतानामप्युपलक्षणम् । तेन नारायणशब्देन 'नराज्जातानि तत्त्वानि' (म.भा.आनु.१८६-७) इत्याद्युक्तनिरुक्तिस्सूच्यते । प्रकृत्यात्मक जगदुक्त्या वा कार्यतत्वसङ्ग्रहः । लीलाविभूतेरशेषत्वान्यशेषत्वभ्रमसम्भवस्थानत्वात् तदपनोदनायाऽत्र स्वशेषतैकस्वभावत्वमुक्तम् । शेषत्वस्य शरीरलक्षणत्वसिद्ध्यै यावत्सत्ताकत्वमिह विवक्षितम् । तथा निरुपाधिकान्यशेषत्वराहित्यं च । अत्र शरीरस्वभावेष्वाधेयत्वादिषु सङ्कल्पानुविधायित्वोक्त्या नियाम्यत्वं शाब्दम् । आधेयत्वमप्यभिप्रेतम् ।

प्रकृत्यात्मकत्वं **भोग्यभोगोपकरणदौ ।** समष्टिव्यष्टिपुरुषविभागरूपतया पुरुषात्मकत्वं भोक्तृवर्गे । अत्र भोक्तृत्वं कर्मोपाधिकम् । परमपदे तु निरुपाधिकभोक्तॄणां सतामप्यनुक्तिः तत्रत्यानां स्वाधीनस्वार्थभोक्तृत्वभ्रमराहित्याभिप्रायेण ।

---

1. निगमनं धारणं च - इ । 2. धारणं परिज्ञानेन - आ ।

स्वशेषतैकस्वभाव-प्रकृति-पुरुष-कालात्मक-विविध-विचित्रानन्त-भोग्य-भोक्तृवर्ग-भोगोपकरण-भोगस्थानरूप-निखिल-जगदुदयविभवलयलील!

श्रु.भा. - शब्दस्पर्शादिरूपेण **वैविध्यम्** । तदवान्तर[1]भिदया[1] **विचित्र**त्वम् । **निखिल**शब्देन ब्रह्मादिव्यावृत्तिः ।

र.र. - क्षणलवादिषु कालावच्छेदेषु **कालात्मक**त्वम् । तेषां जगच्छब्देन ग्रहणं अभूदस्ति-भविष्यतीत्यादिरूपेण जगद्विशेषणत्वप्रतीत्यनुसारात् । व्याप्तस्यापि कालस्य लीलाविभूतिमात्रे पठनम् । 'कालं स पचते तत्र न कालस्तत्र वै प्रभुः' (म.भा.मोक्ष.१९६-९) 'कलामुहूर्तादिमयश्च कालो न यद्विभूतेः परिणामहेतुः' (वि.पु.४-१-८४) इति नित्यविभूतेरकालकाल्यत्वज्ञापनार्थम् । तत्र तत्तदनित्यसद्भावेऽपि लीलाविभूतिवत्कालनियमो नास्तीति विशेषः । भोग्यप्रभृति सर्वं प्रत्येकं **विविधम्** । तत्तदवान्तरविशेषविवक्षया विचित्रत्वोक्तिः; आश्चर्यतया वा; 'जगदेतन्महाश्चर्यं रूपं तस्य महात्मनः' (वि.पु.५-११-७) इति ह्युच्यते । एकैकवर्गव्यक्तीनां असङ्ख्यातत्वादनन्तत्वम् । **भोग्यभोगोपकरणा**दीनि पूर्ववत् । प्राकृतत्वादिरिह **विशेषः** । भोगश्चात्र सुखदुःखानुभवात्मकः ।

महदादीन्यनन्तब्रह्माण्डादीनि च सङ्गृह्णता **निखिल**शब्देन कतिपयजगत्कारण-विरञ्चादिव्यावृत्तिः । **निखिलजगदुदयादेः** एकैकस्यैव ब्रह्मलक्षणत्वे सम्भवत्यपि व्यष्टिसृष्ट्यादिनीत्या संभवन्तीं भिन्नकर्तृकत्वशङ्कां निरसितुं इह त्रितयोक्तिः । जगन्निष्ठानामुदयविभवलयानां परमपुरुषलीलात्वोक्तिः सर्वशरीरतया तत्तद्विशिष्टरूपेण तत्तदवस्थो भवतीत्युपादानत्वसूचनार्था । परिपूर्णतया प्रयोजननिरपेक्षस्य कथं जगद्व्यापार इति शङ्कानिरसनाय **लीला**शब्दः । 'क्रीडतो बालकस्येव', (वि.पु.१-२-१८) 'क्रीडा हरेरिदं सर्वम्', (म.भा.शां.२०६-५९) 'हरे! विहरसि क्रीडाकन्दुकैरिव जन्तुभिः', (म.भा.सभा.९०-३१) 'लोकवत्तु लीलाकैवल्यम्' (ब्र.सू.२-१-३३) इत्यादिभिस्तत्सिद्धिः । लीलारूपप्रयोजनवतोऽपि अवाप्तसमस्तकामत्वं सर्वत्राविहतेच्छत्त्वम् ।

---

1. भिदा - इ ।

सत्यकाम! सत्यसङ्कल्प! परब्रह्मभूत! पुरुषोत्तम!

श्रु.भा. - अथ उक्ताकारेषु समाख्याष्टकं प्रमाणयति! **सत्यकाम** इति - नित्यविभूतिमत्त्वसिद्धिः । **सत्यसङ्कल्प** इति लीलाविभूतिमत्त्वसिद्धिः । निमित्तमात्रत्वं सत्यसङ्कल्पतया सिद्धमिति उपादानतामप्यभिप्रयन्नाह **परब्रह्मभूत** इति । उपादानत्वेऽपि चिदचिद्गतदोषास्पृष्टत्वमाह - **पुरुषोत्तम** इति ।

र.र. - एवं नारायणशब्दोक्तं शरण्यत्वं यथानिरुक्ति सम्बोधितम् । अथ **सत्यकाम** 'इत्यादेः पूर्वापरपुनरुक्तिपरिहाराय' 'प्रागुक्तेष्वेवार्थेषु इदं समाख्याष्टकं प्रमाणीक्रियते', इति केचित् व्याचख्युः । तत्र चतुर्णां समाख्यात्वं व्यक्तम् । **सत्यकामा**दिशब्दानां कथञ्चित्समाख्यात्वं कल्प्यम् ।

परब्रह्मभूत इत्यत्र तु '**ब्रह्म**'शब्दमात्रं समाख्या । अन्यथाऽपि नामत्वकल्पने गौरवं स्यात् । अत्र **पर**शब्देन विशेषणन्त्वौपचारिकप्रयोगव्यवच्छेदार्थम् । **सत्यकाम-सत्यसङ्कल्प**शब्दौ पूर्वं विशेषणमात्रपरतयोक्तौ । इह तु तत्प्रमाणतया यथाश्रुतितत्तद्विशिष्टविषयतयेति विशेषः । **लीला**पदसूचितं जगन्निमित्तत्वमपि **सत्यसङ्कल्प**त्वेन स्थापितम् । जगुदुदयादिलीलात्वद्योतितमुपादानत्वन्तु **परब्रह्मभूत** इत्यनेनाभिप्रेतम् । 'सर्वं खल्विदं ब्रह्म तज्जलान्' (छां.उ.३-१४-१) इत्याद्यनुसारात् । एवमभेदश्रुतिबलादुपादानत्वेन अभिमतस्य ब्रह्मणस्स्वरूपपरिणामपक्षेण चिदचिद्गतसर्वदोषान्वयश्शंक्येत इति तत्परिहाराय स्वयमेव गीतं श्रुत्यर्थमाह **पुरुषोत्तम** इति । अत्र पञ्चम्यादि[1]विभक्तित्रयेऽपि[1] समासो द्रष्टव्यः ।

---

१. **ब्रह्म** - अनेन ब्रह्मशब्दो यौगिक इति स्पष्टम् । 'बृहत्वात् बृंहणत्वाच्च तद्ब्रह्मेत्यभिधीयते' । इत्युपबृंहणानुसारात् 'बृंहेर्नोच्च' इत्युणादि सूत्रेण वृद्ध्यर्थक 'बृहि' धातोः इदित्वान्नुमागमे तस्याकारादेशः, मन् प्रत्ययश्च । ततः यणादेशे 'ब्रह्म'शब्दः निष्पन्नः । इदञ्च सूत्रमुपलक्षार्थं बृहधातोरपि, अगागम मन् प्रत्यययोः ।

अत्र श्रीभाष्यम् - 'बृहत्त्वञ्च स्वरूपेण, गुणैश्च यत्र अनवधिकातिशयं, सोऽस्य मुख्योऽर्थः । स च सर्वेश्वर एव । अतो ब्रह्मशब्दः तत्रैव मुख्यवृत्तः । तस्मादन्यत्र तद्गुणलेशयोगादौपचारिकः' (जिज्ञासाधिकरणे) इति योगरूढपक्षः निरस्तः ।

तदुक्तं श्रुतप्रकाशिकायाम् - ब्रह्मशब्दप्रयोगविषयपञ्चष-(जीव-जाति-कमलासन-मूलप्रकृति-प्रभृति) व्यक्तिषु, अनुवृत्त अन्यव्यावृत्ताकारादर्शनात् अनेकशक्तिकल्पने प्राप्ते, अनन्यथासिद्धस्य प्रयोगस्य शक्तिकल्पकत्वात् ब्रह्मशब्दप्रयोगविषयेष्वन्येषु च बृहत्वगुणलेशयोगेन प्रयोगस्यान्यथासिद्धत्वाच्च न अनेकशक्तिकल्पनं युक्तम् । तस्मात् पुरुषोत्तम एव प्रवृत्तिनिमित्तपौष्कल्यवति मुख्यत्वम् । अन्यत्र औपचारिकत्वञ्च इति ।

1. विभक्तिषु त्रिष्वपि - आ ।

महाविभूते!
श्रीमन्! नारायण! वैकुण्ठनाथ!

श्रु.भा. - उपादनभूतस्य कथं जगद्वैलक्षण्यं इति शङ्कायां घटकमर्थमाह - **महाविभूते** इति । शरीरकतया विभूतिमत्त्वमभिप्रेतम् । विभूतिं प्रति शेषत्वं द्विनिष्ठं इत्यभिप्रायेणाह - **श्रीमन्** इति । **महविभूते** इति शरीरकतया विभूतिमत्त्वसाधारणोक्तमर्थं विविच्य दर्शयिष्यन् दोषास्पृष्टत्वसिद्धये लीलाविभूतिशरीरकत्वमाह - **नारायण** इति ।

'नराज्ञातानि तत्त्वानि नाराणीति ततो विदुः' इति निर्वचनमिहाभिप्रेतम् । नित्यविभूतियोगे समाख्यां स्पष्टयति - **वैकुण्ठनाथ** इति । 'कुठि-गतिप्रतिघाते' (धा.पा.३४३) इति धातुः । ज्ञानप्रतिघातिकर्मादिरहितास्सूरयो विकुण्ठाः, तत्सम्बन्धिदेशो **वैकुण्ठा**ख्यः ।

र.र. - नन्वेवं भेदाभेदश्रुत्योः विरोधादन्यतरबाधस्स्यादित्यत्र घटकश्रुतिसिद्धमाह - **महाविभूते** इति । **विभूति**शब्दोऽत्र नियन्तव्यपरः । 'यदण्डम्' (स्तो.र.१७) इति श्लोकार्थो इहानुसन्धेयः । शरीरतया विभूतित्वादत्र स्वरूपभेदेऽपि सामानाधिकरण्यं मुख्यमिति भावः । एवं सर्वविलक्षणस्य सर्वनियन्तुर्जगद्व्यापार[1]लीलायां[1] स्ववल्लभासामरस्यमभिप्रेत्याह - **श्रीमन्** इति । 'विभूतिं प्रति शेषित्वं द्विनिष्ठम्' इत्यभि[2]प्रयन्नाह[2] - **श्रीमन्** इति; इति व्यासार्याः । विभूतीनामाधेयत्त्वादिनियमैः शरीरत्त्वं व्यञ्जयितुमाह - **नारायण** इति ।

ननु स्वरूपतो बृहत्वमेव निमित्तमस्तु; किं गौरवेण इति चेत् - न ; ब्रह्मगुणादेरपि (धर्मभूतज्ञानस्य) स्वरूपेण बृहत्त्वात् ब्रह्मशब्दवाच्यत्वप्रसङ्गात् । तर्हि गुणतो बृहत्त्वमेव अस्तु; निमित्तमिति चेन्न; शब्दशक्तेरसङ्कोचस्य स्वतः प्राप्तत्वात् । स्वरूपे च बृहत्त्वसद्भावात् 'सत्यं ज्ञानमनन्तं ब्रह्म' इति हि श्रुतिः । गुणतो बृहत्वं नाम सद्वारकं बृहत्त्वम् । गुणद्वारा हि वत् । (श्रु.प्र.)

अन्तरत्वाधिकरणे स्पष्टमेव भाषितम् । (३-३-३५) 'यत्साक्षादपरोक्षात् ब्रह्म य आत्मासर्वान्तरः' इति श्रुति-व्याख्याने ब्रह्मशब्दस्य परमात्मासाधारणत्वेऽपि प्रत्यगात्मन्यपि क्वचित् उपचरितप्रयोगदर्शनात् तद्व्यावृत्त्या परमात्मप्रतिपत्तये 'यत् साक्षाद्ब्रह्म' इति विशेषणं क्रियते इति । पङ्कजशब्दे पङ्कजनिकर्तृत्वरूपप्रवृत्तिनिमित्तस्य अन्यत्र सद्भावात् रूढिनिमित्तं पद्मत्वञ्च आश्रीयत इति स शब्दः योगरूढः । प्रकृते स्वरूपतो गुणतश्च बृहत्त्वं मूलप्रकृति जीवचतुर्मुखादिषु नास्त्येव । प्रवृत्तिनिमित्तैकदेशबृहत्त्वमात्रमादाय प्रयोगोपपत्तेः नात्यन्तमुख्यता । नापि लक्षणा 'गंगायां घोषः' इत्यादाविव सर्वथा प्रवृत्तिनिमित्तस्यात्यागात् । किन्तु, प्रवृत्तिनिमित्तैकदेशमादायैव पञ्चसु व्यक्तिषु प्रयोगः । अतोऽत्र ब्रह्मशब्दस्य नात्यन्तमुख्यतेति सिद्धान्तिनाम् आशयः ।

1. लीलायाः - आ । 2. प्रायेणाह - अ ।

र.र. - नित्यविभूतियोगं शुद्धसृष्ट्युपादानत्त्वञ्च प्रभूतोपकारकत्त्वज्ञापनाय विशेषतस्सूचयति - **वैकुण्ठनाथ** इति । इदं सम्बुद्धिद्वयं वा; तदा तु तत्त्वादिसाक्षात्कारप्रतिघातकरहितदेशादि-सम्बन्धी **वैकुण्ठः ।** अपेक्षितसिद्ध्यर्थं सर्वैरपि याचनीयस्तत्प्रदानादौ ईश्वरश्च **नाथः ।**

एतत् 'सत्यकाम' इति पदाष्टकं प्राप्याकारनिष्कर्षार्थमिति पक्षमपि प्रगुणीकुर्मः । 'सोऽश्नुते सर्वान् कामान् सह । ब्रह्मणा विपश्चिता' (तै.उ.आन.१) इति कामशब्दोदितानां ब्रह्मगुणानामपि प्राप्यतोक्तिमभिप्रेत्याह - **सत्यकाम** इति । प्राप्यानुप्रविष्टनित्यविग्रह-विभूतिद्वययोगेऽपि केचित् **सत्यकाम**शब्दं प्रमाणयन्ति । यद्वा, मुमुक्षूणां भोक्तव्यसृष्टेः भोगस्य चोपकरणतया मता नित्याः पदार्था अस्य सन्तीति भावः । प्राप्तिदशायां विभूतिद्वयेऽप्यपूर्वानन्तभोग्यस्रष्टृत्वमाह - **सत्यसङ्कल्प** इति । प्रकृष्टभोग्यतयाऽपि निरतिशय-बृहत्त्वमाह - **परब्रह्म** इति । 'ब्रह्म वेद ब्रह्मैव भवति' (मुं.उ.३-२-९) इत्यादिभिरभेदापत्तिशङ्कां परिहरन् बद्धमुक्तविलक्षणतया कैङ्कर्योद्देश्यत्वसम्भवमाह - **पुरुषोत्तम** इति । कैङ्कर्यस्थानोपकरणादि[1]समृद्धिमत्व[1]माह - **महाविभूते** इति । सपत्नीकस्य कैङ्कर्योद्देश्यत्वं सूचयति - **श्रीमन्** इति । सम्बन्धगुणविभूतिव्यापारैः सर्वैरपि भोग्यत्वातिशयं प्रकाशयितुमाह - **नारायण** इति । सूरिसेव्य[2]विग्रहविभूतिविशिष्टस्य[2] देवयानपथिकविश्रमस्थानत्वमभिसन्धायाह - **वैकुण्ठनाथ** इति ।

अत्र तृतीयमपि पक्षं ब्रूमः - प्रकृतस्य शरण्यस्य स्वीकृतसर्वभरनिर्वहणक्रमः सत्यकामादिभिरष्टभिः पदैरेव बोध्यते । **सत्यकाम! -** काम इह प्रपन्नेभ्यो निरतिशयानन्द-प्रदानेच्छा । तस्याः सामर्थ्याविनाभावात् सत्यत्त्वं, तच्चामोघत्त्वम् । सत्यसङ्कल्पोऽत्र प्रतिबन्धनिवर्तनविषयः । 'सर्वपापेभ्यो मोक्षयिष्यामि' (भ.गी.१८-६६) इति हि त्वमेवात्थेति भावः । **परब्रह्मभूत! -** निरतिशयबृहत्त्वविशिष्टस्त्वं स्वाश्रितानपि ज्ञानतो भोगतश्च परमसाम्यपर्यन्तं बृंहयिताऽसि । **पुरुषोत्तम! -** 'यो मामेवमसम्मूढः' (भ.गी.१५-१९) इत्यादिना [3]त्वद्विदाम्[3] कृतकृत्यत्वोक्त्या त्वन्निर्वाह्यसर्वभरत्वं त्वयैव सूचितम् । 'यद्वा षणुदाने' (धा.पा.१४६५) पुरु सनोतीति पुरुषः । बहुप्रदेभ्यस्सर्वेभ्य उत्तमत्त्वात् **पुरुषोत्तमः ।**

महाविभूते! विभूतिरिह विभवनम्, प्रभवनं, नियमनमित्यर्थः । तस्य महत्वं अपरिच्छिन्नत्वम्; संश्रितान् संसारकारागृहान्निर्गमय्य तदर्थतया सर्वं नियच्छसीति भावः ।

---

1. महत्त्व - आ । 2. विग्रहविशिष्टस्य - आ । 3. तत्त्वविदां - आ ।

अपार-कारुण्य-सौशील्य-

श्रु.भा. - एवम् उपायोपेयत्त्वसाधारणाकारा उक्ताः । अथ उपायत्वैकान्तगुणा उच्यन्ते **अपार** इत्यादिना । कारुण्याद्यगोचरे मय्यपि कार्यकरं कारुण्यादिकमिति अपारशब्दस्य भावः । **कारुण्या**दिकं पूर्ववत् ।

र.र. - 'अनन्तो देशकालादिपरिच्छेदविवर्जितः ।
महाविभूतिरित्युक्तो व्याप्तिस्सा महती यतः' ।। (पाञ्चरात्रम्) इत्यत्रापि नियन्तृत्वेन व्याप्तिर्विवक्षिता । **श्रीमन्!** श्रिया नित्यसंयुक्तस्त्वं त्वदभिमतमाश्रितकृत्यं निर्वहसि । **नारायण**सम्बन्धमनुसन्धाय दायविभागन्यायेन स्वामितया स्वार्थं स्वयं स्वात्मानं प्रापयितासीति भावः । **वैकुण्ठनाथ!** दिव्यपर्यङ्कसुखासिकायां निजपादमूलसेवां दातुमवस्थितोऽसीति त्रिष्वपि पक्षेषु मुखभेदैः पुनरुक्तिपरिहारः सिद्धः ।

अथ शरणस्य समर्पितसर्वभरस्वीकरणानुगुणाः स्वस्य चाधिकारोपायनिष्पादका उक्ताश्चानुक्ताश्चाकारा अष्टादशभिः पदैः निष्कृष्यानुसन्धीयन्ते; तत्र स्वापराध-स्वनिकर्ष-स्वहेयसम्बन्ध-स्वरक्षण-विसंवादादिदोषपरिहारोपयुक्तानां गुणविशेषाणां प्रकर्षः प्रथममुच्यते- **अपार** इति । कारुण्यस्यापारत्वम् अवश्यदण्डनीयेष्वस्मादृशेष्वपि प्रवृत्तेः । यथा 'वधार्हमपि काकुत्स्थः कृपया पर्यपालयत्' (रा.सुं.३८-३४) इति । स्वेनाप्युक्तं 'मच्छरैस्त्वं रणे शान्तस्ततः पूतो भविष्यसि' (रा.यु.४१-६९) इति, 'गच्छानुजानामि रणार्दितस्त्वम्' (रा.यु.५९-१४४) इत्यादि च ।

न्यूनाधिकत्वदर्शनजनितावज्ञासाध्वसपरिहारार्थमिह **सौशील्यो**क्तिः । तस्याऽपारत्वं विशेषज्ञेषु विरिञ्चादिषु विष्ण्वाद्यवतारैः, अनभिज्ञेषु च मत्स्यकूर्मादिषु तत्तत्स्वरूपैरवतारैः निर्विशेषनीरन्ध्रसंश्लेषात् ।

वात्सल्यस्यापारत्वं 'रिपूणामपि वत्सलः' (रा.यु.५०-५६) इत्युक्तम् । **औदार्य**स्यापारत्वं अर्थिषु उदारत्ववचनहेतुभूतमर्थितप्रदाने स्वप्रयोजनाभिसन्धिमत्त्वम्, संश्रितेभ्यः सविभूतिकं स्वात्मानं दत्वा तदनुबन्धिषु पशुमनुष्यपक्ष्यादिष्वप्यविश्रान्तत्वं वा ।

वात्सल्य-औदार्य-ऐश्वर्य-सौन्दर्य-महोदधे !

श्रु.भा. - 'संसारिणां स्वरक्षण[1]विघातकत्वे[1]ऽपि तान् स्वातन्त्र्येण नियम्य रक्षितुं शक्तः' इत्यभिप्रेत्य **ऐश्वर्यम्** इत्युक्तम् । **ऐश्वर्यं** - नियन्तृत्वम् । संसारिचित्तवशीकरणोपायतया **सौन्दर्यम्** उक्तम् । यथा 'पुंसां दृष्टिचित्तापहारिणम्' (रा.अयो.३-२९) इति । 'जितन्ते' (जि.स्तो.१) इति च ।

र.र. - श्रूयते हि 'नास्यावरपुरुषाः क्षीयन्ते' (छां.उ.४-१२-२) इति, 'नास्याब्रह्मवित्कुले भवति' (मुं.उ.३-२-९) इति च ।

ऐश्वर्यस्य कथनमिह अनादिकालं स्वरक्षणविपरीतवृत्तान् केनचिद्व्याजेन स्वयमेव नियम्याभिमुखीकरोतीति ज्ञापयितुम् । तस्य अपारत्वम् 'संसारन्यूनताभीतास्त्रिदशाः परिपन्थिनः' (वि.ध.२-२५) इति न्यायेन ब्रह्मादिषु देवेषु, सुग्रीवादिषु सुहृत्सु वा [2]विरुन्धानेषु[2] तानपि शरणागतानुगुणीकर्तुं समर्थत्वम् । **सौन्दर्य**स्यापारत्वं विरुद्धप्रकृतीनां शूर्पनखादीनां, सत्त्वस्थानामृषीणामाप्यविशेषेण दृष्टिचित्तापहारितया तुष्टूषाजनकत्वम्, असद्वासनादिशामकत्वञ्च । यथोक्तं श्रीपौष्करे, अर्चावतारप्रकरणे -

'सन्दर्शनादकस्माच्च पुंसां संमूढचेतसाम् ।
कुवासना कुबुद्धिश्च कुतर्कनिचयश्च यः' ।।
'कुहेतुश्च कुभावश्च नास्तिकत्वं लयं व्रजेत्' ।। (पौ.सं.१-३१,३२) इति ।

अतिसुन्दरनित्यविग्रहेण भगवतः परत्वानुसन्धानं तत्सान्निध्यकारणमिति च तत्रोक्तम् -

'नित्यसिद्धे तदाकारे तत्परत्वे च पौष्कर !।
यस्यास्ति [3]सत्ता[3] हृदये तस्यासौ सन्निधिं व्रजेत्' ।। (पौ.सं.३८-३८) इति ।

तत्सूचनार्थं **ऐश्वर्यसौन्दर्ययोः** इहाव्यवहितपठनम् ।

'सर्वस्य शरणं सुहृत्', (श्वे.उ.३-१७) 'सुहृदं सर्वभूतानाम्' (भ.गी.५-२९) 'सर्वलोकशरण्याय', (रा.यु.१७-५५) 'सर्वयोग्यमनायासम्' (वि.ध) इत्यादि प्रसिद्धस्वभावस्य

1. विभूतिकत्वे - इ । 2. निरुन्धानेषु - अ। 3. सक्तिः - अ ।

अनालोचितविशेषाशेष-लोकशरण्य! प्रणतार्तिहर!
आश्रितवात्सल्यैकजलधे! अनवरतविदित-निखिल-भूतजात-याथात्म्य!

श्रु.भा. - उक्तविशेषणफलमाह - **अनालोचित** इति । **विशेष:-** जन्मवृत्तगुणतारतम्यम्; 'लोकस्तु भुवने जने' (अ.को.३) एवं गुणवत्तां निश्चित्याह **प्रणतार्तिहर** इति । स्वस्यैवं-विधबुद्धियोगप्रदं वरदमभिप्रेत्यैवमुक्तम् । तस्मिन् विशेषतः आविर्भूतं स्वस्मिन् विशेषतः कार्यकरञ्च गुणमाह **आश्रित** इति । उपायत्वौपयिकगुणेषु वात्सल्यगुणो हि स्वस्मिन् विशेषतः कार्यकरोऽभिमतः, तथापि त्वय्यपि किञ्चित्कारोऽवश्यमपेक्षित इति भगवदाशयं बुध्वाऽऽह - **अनवरत** इति । 'तव सार्वज्ञं न कतिपयविषयम्, नापि कादाचित्कञ्च, कथं ममाशक्तत्वमविदितम्' इति भावः ।

र.र. - वायस-वानर-राक्षसादिविशेषानादरेणाङ्गीकुर्वतस्ते मादृशजनेऽपि गुणवृत्तादिनिकर्षो न त्यागकारणमित्याह - **अनालोचितविशेष** इति । अत्र विशेषशब्दविवक्षितं **अनालोचितगुणगण!** इति श्रीवैकुण्ठगद्ये व्यञ्जितम् । प्रपत्तेस्सर्वाधिकारत्वमपि अनेनैव प्रकाशितम् ।

'दुर्गसंसारकान्तारमपारमभिधावताम् ।
एकः कृष्णनमस्कारो मुक्तितीरस्य देशिकः' ।। (वि.ध.१-१८)

'प्रणम्य कृष्णं सहसा' (वि.ध.४-३५) 'एकोऽपि कृष्णे सुकृतप्रणामः' (म.भा.आ.४६-१२३) इत्यादिषूक्तं अल्पयत्नसाध्यत्वमाह - **प्रणतार्तिहर!** इति । अनेन स्वस्यैवं विधावस्थाहेतुरवतार-विशेषोऽप्यनुसंहितः । उक्तं हि स्वयमेव, 'निरस्तेतरभोगाशो वरदं शरणं गतः' (हस्तिगिरिमाहात्म्यम्) इति । अत्र **प्रणत**शब्दः प्रकृतानुगुण्यात्, 'प्रपन्नार्तिहरं विष्णुं' (वि.पु.१-९-३७) इत्याद्यनुसाराच्च प्रकृष्टप्रह्वीभावयुक्तप्रपन्नविषयो वा ।

प्रस्तुतावतारे व्यक्ततमं स्वस्मिन्नुपकारकतमञ्च वात्सल्यगुणं पूर्वं द्विरुक्तमपि 'मित्रभावेन सम्प्राप्तम्' (रा.यु.१७-८३) 'दोषो यद्यपि तस्य स्यात्' (रा.यु.१७-८३) इत्यादिस्मरणाय पुनराह - **आश्रित** इति । वात्सल्यगुणोदधौ निग्रहादिकं निमग्नं भवतीत्यभिप्रायेणैकशब्दः, अत एव हि सर्वज्ञत्वादौ स्थितेऽप्यविज्ञातृत्वाद्युक्तिः । उपायान्तरं स्वीक्रियतामित्यत्र 'अस्मान्वेत्थ परान्वेत्थ' (म.भा.उद्यो.७२-१०१) इति प्रकारेण मादृशानामकिञ्चनानां अधिकर्तव्यं

[1]अशेष[1]-चराचरभूत-निखिल-नियमन-निरत!
अशेष-चिदचिद्वस्तु-शेषिभूत! निखिल-जगदाधार!

श्रु.भा. - आनुकूल्याभावेऽपि प्रातिकूल्यनिवृत्तिरपेक्षितेति भगवदाशयं बुद्ध्वाऽऽह - **अशेष** इति । तन्निवृत्तिरपि त्वदायत्तेति भावः ।

ननु 'किं' भवद्रक्षणमावश्यकृत्यम् इति शङ्कायामाह - **अशेषचिदचित्** इति । [2]रक्ष्यापेक्षापि[2] त्वदधीनेत्याह - **निखिल** इति 'कस्यापेक्षया चिदचिद्वस्तुजातं धृतम्' इति भावः ।

र.र. - हिततमं त्वमेव जानासि; त्वदायत्तानुकूल्यस्य 'शेषवृत्तिविधानेऽपि [3]न त्वं सुप्तो न वा मृतः[3]' (वि.ध.) सर्वज्ञस्य ते, 'त्वयाऽपि लब्धं भगवन्निदानीं', (स्तो.र.-३४) 'यदि मे न दयिष्यसे' (स्तो.र.-५०) इत्यादिकं न विज्ञापनीयमित्यभिप्रायेणाह - **अनवरत** इति । **अनवरतनिखिल**शब्दाभ्यां ज्ञानस्य कालतो विषयतश्च सङ्कोचो व्युदस्तः ।

'त्वमेवैवं कुरुष्व माम्', 'कुरुष्व मामनुचरम्' (रा.अयो.३१-२४) इत्यादिन्यायेन त्वदधीनव्यापारस्य मे त्वयैव प्रातिकूल्यनिवर्तनादिकमपि कार्यमित्याह - **अशेषचराचर** इति । **निखिल**शब्दः स्वरूपस्थित्यादिनियन्तव्यकात्स्न्र्यपरो सार्वकालिकनियमनकात्स्न्र्यपरो वा । आगमैः आचार्यादिभिः अन्तरात्मतया च बहुप्रकारं हि नियमनम् । न ह्यविधेयं ते किञ्चित्, येन मे अभिमतं प्रतिबन्धाद्विलम्बेत, अलभ्यं वा स्यादिति भावः । परिपूर्णस्य मे त्वदङ्गीकारेण किञ्चित् प्रयोजनमित्यत्राह - **अशेषचिदचित्** इति । न हि मदेकवर्जं तव सर्वशेषित्वम्, अतो ममाप्यतिशये 'तव चार्थः प्रकल्पते' (रा.अयो.३१-२४) इति भावः ।

तथाऽपि यथावस्थितरक्षापेक्षा तव नास्ति, अतः कथं त्वं रक्षणीयः? इति शङ्कायामाह - **निखिलजगदाधार!** इति । गुणादिवत् त्वदपृथक्सिद्धविशेषणस्य ममापेक्षामन्तरेणैव मत्सत्तादिकं त्वयैव रक्ष्यते, तत्साफल्यार्थं रक्षापेक्षादिकमपि त्वयैव कारयितव्योऽहम्; न हि त्वदधीनसत्ताकस्य मे त्वन्निरपेक्षप्रवृत्तिः संभवतीत्यभिप्रायः ।

---

1. अखिल - इ । 2. रक्षापेक्षादिकम् - इ । 3. किं त्वं सुप्तोऽथ वा गतः - अ ।

अखिलजगत्स्वामिन्! अस्मत्स्वामिन्!
सत्यकाम! सत्यसङ्कल्प! सकलेतरविलक्षण!

श्रु.भा. - नैसर्गिकशेषत्वे सत्यपि जगतः स्वगुणैर्भूयः शेषत्वमापादितम् इत्याशयेनाह **अखिल** इति । यथा 'गुणैर्दास्यमुपागतः' (रा.कि.४-१२) इति । न केवलं सामान्येन शेषत्वम् । किन्तु जन्मविशेष[1]रुचिविशेष[1]प्रदानादिभिर्मम एवमवस्थत्त्वं त्वयैवोपपादितमित्यभिप्रायेणाह - **अस्मत्स्वामिन्** इति । **सत्यकाम** अकिञ्चनरक्षणं हि परिपूर्णकृत्यमिति भावः । तच्च अनायाससाध्यमित्याह - **सत्यसङ्कल्प** इति । **सकलेतरविलक्षण -** एवम्भूतस्त्वं न रक्षसि चेत् कस्तवान्येभ्योऽनीदृग्भ्यो विशेष इत्याशयः ।

र.र. - एवमेव हि शेषभूतानां स्वतन्त्रस्वामिना त्वयैव यथेष्टं स्वमुद्दिश्य विनियोगः क्रियते इत्याह - **अखिलजगत्स्वामिन्** इति । इष्टानिष्टप्रदानसाधारणेऽस्मिन् मद्विनियोगे किं तवायातमित्यत्राह - **अस्मत्स्वामिन्** इति । मदाचार्यसन्ततिसाम्मुख्येन मम एवंविधत्वत्सम्बन्धज्ञानाद्यवस्थाप्रदानरूपोपकारे प्रवृत्तेन त्वया शेषपूरणं कार्यमिति भावः ।

परिपूर्णतया पूर्वोपकारप्रत्युपकारनिरपेक्षस्य तव अकिञ्चननित्यसापेक्षसंश्रितरक्षणमात्मीयनित्य[2]गुणपरित्राण[2]मिति सूचयति - **सत्यकाम!** इति । सर्वशक्तेस्तव नित्यसूरिवर्गे मन्निवेशनमीषत्करम्; 'न हि त्वद्गतं केनापि [3]हन्तुं[3] शक्यं' इत्याह - **सत्यसङ्कल्प!** इति । तथाऽपि अपेक्षितार्थमन्यः कश्चिदाश्रियतामित्यत्राह - **सकलेतरविलक्षण!** इति । 'विष्णुपोतं विना नान्यत्किञ्चिदस्ति परायणम्' (वि.ध.१-५९) 'भवतां कथ्यते सत्यं विष्णुरेकः परायणम्' (वि.ध.१-५९) इत्यादिभिरन्येभ्यस्तव मोक्षप्रदत्वादिरूपं विशेषं पश्यन्नहं मुमुक्षुः कमन्यं आश्रयेयम् । न हि परतन्त्रः कश्चित् स्वतन्त्रकृत्यं प्रार्थनीयः, न च त्वं परतन्त्र इति भावः ।

यद्यर्थिनं मां नाद्रियसे; कथं तवौदार्यप्रथा जीवेदित्यभिप्रायेणाह - **अर्थिकल्पक** इति । अर्थी च कल्पकश्चेति विग्रहः । अर्थिनां कल्पद्रुम इति वा । उक्तं हि; 'स सर्वानर्थिनो दृष्ट्वा समेत्य [4]प्रतिनन्द्य[4] च' (रा.अयो.१६-२७) इति ।

---

1. 'रुचिविशेष' इति अत्र नास्ति - इ । 2. गुणत्रयपरित्राण - आ । 3. विनिहन्तुम् - आ ।
4. प्रतिवन्द्य - आ ।

अर्थिकल्पक! [1]आपत्सख[1]! श्रीमन् ! नारायण!

अशरण्यशरण्य! अनन्यशरणः,

श्रु.भा. - अर्थिकल्पक-कर्मधारयसमासः । यथा 'समेत्य प्रतिनन्द्य च' (रा.अयो.१६-२७) इति । 'उदारास्सर्व एवैते' (भ.गी.७-१८) इति च । अन्यथा तवेयं [2]प्रथापि[2] विहन्येतेति भावः । गजेन्द्रादीनामिव आपन्नत्वमेव रक्ष्यत्वे हेतुमाह - **आपत्सख** इति । उक्तहेत्वभावेऽपि मातरमपेक्ष्य रक्षितव्यमित्याह - **श्रीमन्** इति । तया उपेक्षितोऽपि त्वामपेक्ष्य रक्षणीय इत्याह - **नारायण** इति । सम्बन्धाभावेऽपि रक्षकान्तराभावात् रक्षणीयोऽहम् । त्वं हि अगतीनां गतिरित्याह - **अशरण्य** इति । ततः किं भवत इत्याह **अनन्यशरण** इति ।

र.र. - 'अर्थिनः कल्पद्रुमा यस्य सः **अर्थिकल्पक**' इति वा विवक्षितम्; यद्गीयते - 'उदारास्सर्व एवैते' (भ.गी.७-१८) इति । अभिमतपुरुषार्थदानार्थमर्थिनामुत्पादकः, शास्त्रादिमुखेन अर्थित्वापादकश्चेति वा । एवं पूर्वोक्तस्याप्यौदार्यस्य अतिशयप्रदर्शने तात्पर्यादपुनरुक्तिः ।

'ज्ञातं मया वसिष्ठेन' (म.भा.स.९०-४२) इत्यादिकमनुसन्दधानः पाञ्चालीगजेन्द्रादिवदापन्नस्य अनन्यगतिकस्य ममैतामापदम् [3]अवेक्ष्य[3] रक्षितुमर्हसीत्याह - **आपत्सख!** इति । आपदि सखिवत्संरक्षकेत्यर्थः । विश्वसनीयत्वस्नेहविषयत्वादिसूचनाय सखिशब्दः । शत्रुमपि हि 'तस्मात्परिश्रान्त इति **व्यवस्य** न त्वा शरैर्मृत्युवशं नयामि' (रा.यु.५९-१४३) इत्यवोचत् । एवं द्वाभ्यां इष्टप्रापकत्वमनिष्टनिवर्तकत्वञ्च दर्शितम् । अथ तत्र समानाभिप्रायतया [4]नित्य[4]मुक्तामखिलजगन्मातरं पुरस्कुर्वतो मे महान्तोऽप्यपराधाः क्षन्तव्या इत्याह - **श्रीमन्!** इति ।

सम्बन्धगुणविभूति[5]प्रयोजनव्यापारास्ते[5] मदुपेक्षया मन्दफला मा भूवन्, अतः आत्मानं नातिवर्तेथाः इत्याह - **नारायण!** इति । उत्तरखण्डस्थापेक्षया पूर्वं **श्रीमन्!** इत्याद्युक्तम्; इह तु पूर्वखण्डस्थापेक्षया उक्तैस्स्वभावैः फलितमाह - **अशरण्यशरण्य** इति । स्मर्यते हि 'अगतीनां गतिर्भवान्' (वि.ध.४-४९) इति । अत एव अनालोचितेत्यादिना न पुनरुक्तिः । तत्र हि तारतम्यानादरे तात्पर्यम् । एतत्सर्वं व्याख्येयविवक्षितप्राप्यप्रापकाकारप्रपञ्चनम् ।

---

1. आपत्सख! काकुत्स्थ! - इ । 2. प्रथा - इ । 3. अपेक्ष्य - आ । 4. त्वया नित्य - आ । 5. प्रयोजन इति नास्ति - आ ।

त्वत्पादारविन्दयुगलं शरणमहं प्रपद्ये ।। ५ ।।

[द्वयमन्त्रेण भगवच्छरणागतिः भगवत्प्राप्तिविरोधिदूरीकरणम्, भगवत्प्रसादनं च]

[१]अत्र द्वयम्[१]- ।। ६ ।।

श्रु.भा. - त्वत् शब्देन प्रागुक्ताकारविशिष्टतया योग्यत्वमभिप्रेतम् । अवश्यकर्तव्यत्वाय पादग्रहणम् । **अरविन्द**शब्दश्च इह भोग्यत्वाय । [1]**युगल**शब्देन[1] द्विवचनाख्यानम् । 'अहमस्म्यपराधानामालयोऽकिञ्चनोऽगतिः' (अहि.सं.३७-३०) इत्यादिकमभिप्रेत्याह **अहम्** इति । **प्रपद्ये** इत्यन्तेन पूर्वखण्डो व्याख्यातः ।

र.र. - अस्म्यहमेवम् । एतावताऽपि किं त्वया लब्धम्? सर्वत्र हि शास्त्रार्थे अधिकारोऽपेक्षित इत्यत्राह - **अनन्यशरण** इति ।

तत्त्वविदोऽनन्यप्रयोजनस्य मम सिद्धोपायान्तरं नास्ति; 'अहमस्म्यपराधानाम्', (अहि.सं.३७-३०) 'न धर्मनिष्ठोऽस्मि' (स्तो.र.२२) इत्याद्युक्तावस्थाविशेषविदश्च मे साध्योपायान्तरमपि नास्तीति प्रतिबुद्धोऽस्मि; अयमेव हि ममात्राधिकार इति भावः ।

इदन्तु व्याख्येयस्थोत्तमपुरुषाभिप्रेतमिति ज्ञापनाय, 'अहमपि न [2]मम[2] शरणम्' इति [3]व्यञ्जनाय[3] च अधिकोऽहंशब्दः । अथवा **अनन्यशरण** इत्युपायान्तरशून्यत्वम्, **अहं** इति उपायभीरुत्वम्, अतिशङ्का[4]राहित्यम्[4] प्रयोजनान्तरतदुपायपरित्यागित्त्वम्, मोक्षार्थप्रपत्त्युन्मुखत्वञ्च व्यज्यते । एतत्सूचितः कार्पण्यविस्तरः प्रतिवचनवाक्येषु गद्यान्तरयोश्च द्रष्टव्यः । **त्वत्** इत्यादिना पूर्वखण्डपदक्रमानुसरणम् । **त्वच्छब्दः** शरण्यत्वोपयुक्तसर्वाकारवैशिष्ट्यपरः । **पादे**त्यादिकं प्रागुक्तार्थम् ।

अत्र द्वयम् - इत्यस्य व्याख्यातप्रायमिति शेषः । तात्पर्यन्तु पूर्वमेवोक्तम् । यद्वा, द्वयम् अर्थानुसन्धानेन सह एवमुक्तमिति वा; वक्तव्यमिति वा विवक्षितम् । वाक्यान्तरैः 'पुनःपुनः प्रपद्यते' इति तु नाशङ्कनीयम् । एकसाध्यसिद्ध्यर्थं प्रपत्त्यावृत्तेः प्रतिषेधात्, इह साध्यान्तरायोगाच्च ।

---

१. **अत्र द्वयम्** - अत्र 'द्वयमन्त्रं' अनुसन्धेयमिति भावः ।

1. युगलशब्दः - इ । 2. मे - आ । 3. ज्ञापनाय - आ । 4. रहितत्वम् - आ ।

पितरं मातरं दारान् पुत्रान् बन्धून् सखीन् गुरून् ।
रत्नानि धन-धान्यानि क्षेत्राणि च गृहाणि च ।।

श्रु.भा. - अथ **अनन्यशरणः शरणमहं प्रपद्ये** इति शब्दानामर्थं विवृणोति पौराणिक[1]वचनमुखेन[1] **पितरम्** इत्यादिना । गुरुपर्यन्तानां साधनत्वमुत्कटम् । **दाराश्च** दृष्टसाधनम् । **रत्ना**दीनामुपेयत्वमुत्कटम् ।

र.र. - पितरम् इत्यादिकन्तु स्ववाक्यवन्निबन्धनसंवादमुखेन अनन्यशरणत्वादिकं विशदीकृत्य वक्ष्यमाणफलप्रार्थनाप्रस्तावनात्मकमिति द्वयार्थस्य समुदितोक्तिः । तथा ह्यत्र सोपाधिकभोग्यतदुपायत्यागं निरुपाधिकभोग्यतदुपायविशेषपरिग्रहं च स्पष्टयित्वा 'प्रसादय' इत्यादिना 'सोढुम्' इत्यन्तेन [2]उत्तरखण्डस्य[2]दोषनिवृत्तिप्रार्थना संगृह्यते । पित्रादीनां त्यागोक्त्या भृत्यादिचेतनान्तरत्यागः कैमुत्यसिद्धः । **बन्धु**शब्दः इह सम्बन्ध्यादिपरः । **रत्नानि** इत्यादिकमुत्कटभोग्यत्वभोगसाधनत्वानाम् अचेतनान्तराणामुपलक्षणम् । **च**कारेण वा अनुक्तसमुच्चयः । प्रियेषु हितेषु च मोक्षतदुपाय अनुपयुक्तेषु कुत्रचित् सङ्गोऽपि न युक्तः इति ज्ञापनाय **पितरम्** इत्यादिविविधोक्तिः ।

एवं लोकसिद्धप्रियहितान्युदाहृत्य **सर्वधर्मान्** इत्यादिना शास्त्रवेद्यानि साधनानि साध्यानि च आह । तत्र **सर्वधर्म**शब्दः सिद्धसाध्यरूपसपरिकरधर्मकात्स्न्र्यपरः । **सर्वकामान्** इति हिरण्यगर्भादिपदपर्यन्तकाम्यविषयः । **अक्षर**शब्द इह आत्ममात्रानुभवगोचरः । धर्माणां कामानां च उपयोगित्वेन वा पित्राद्युदाहरणम् । तच्च यथासंभवं द्रष्टव्यम् । पित्रादीनां त्यागश्चात्र काम्यधर्मोपयोगितया अर्थकामोपयोगितया च अनुपादानम् । अत एव 'मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव', (तै.उ.शि.११) 'वृद्धौ च मातापितरौ' (रा.अयो.६३-३२) इत्याद्युक्तभगवदाज्ञानुपालनं न विरुध्यते । **सर्वधर्म**शब्देन मोक्षसाधनभूतोपासनवर्गसङ्ग्रहेऽपि तन्निवृत्तौ 'विहितत्त्वाच्चाश्रमकर्मापि' (ब्र.सू.३-४-३२)

---

1. वचनेन - इ । 2. खण्डस्थ - अ ।

सर्वधर्मांश्च सन्त्यज्य सर्वकामांश्च साक्षरान् ।
लोकविक्रान्तचरणौ शरणं तेऽव्रजं विभो! ।। ७ ।। (विह.सं. - जि.स्तो.)

श्रु.भा. - आमुष्मिकं साधनं साध्यञ्चाह - **सर्व** इति । **अक्षर**शब्देन केवलात्मनि पर्यवसानम् । **लोकविक्रान्त**विभुशब्दौ सौलभ्यपरत्वपरौ । **शरण**शब्दं विवृणोति **त्वमेव** इति ।

र.र. - इति न्यायेन वर्णाश्रमधर्माणामनिवृत्तिः । तदिह त्रैवर्गिकधर्मेषु प्रयोजनान्तरेषु मोक्षोपायान्तरेषु च साधारणं नैराश्यं त्यागः । तत्र पुरुषार्थान्तरेष्वल्पास्थिरत्वादिदोषदर्शनान्नैराश्यम् । तत एव तदुपायेष्वपि मुक्तिसाधनेष्वन्येषु स्वावस्थादर्शनेन दुष्करत्वादिना नैराश्यमिति विशेषः । **संत्यज्य** सम्यक् त्यक्त्वा, सवासनं परित्यज्य इत्यर्थः । यद्वा पञ्चाङ्गसंयुक्तायाः प्रपत्तेरङ्गत्वेनाङ्गित्वेन वा अनुपादानमिह धर्माणां त्यागः । सोऽयं प्रपत्त्युपकारकत्वबुद्धिविरहः संप्रतिपन्नेषु पुरुषार्थान्तरतदुपायेषु मुक्त्युपायान्तरेषु नित्यनैमित्तिकेषु च समान इति सहोक्तिः ।

लोकविक्रान्तचरणौ इति चरणे लोकविक्रान्तत्ववचनम् अनाश्रितानामप्यात्मप्रकाशनेन सौलभ्यादिव्यञ्जकम् । **लोकविक्रान्त** इति व्यस्तं वा; तदा तु लोकेषु विक्रान्तः अधिष्ठातेत्यर्थः ।

ते - [1]स्वतन्त्रस्वामिनः[1] परमप्राप्यस्य च। **विभु**शब्देन फलप्रदानौपयिकपौष्कल्यं व्यज्यते । यद्वा **विभु**शब्देन परत्वम्, **ते** इत्यनेन सौलभ्यञ्च [2]संगृह्यते[2] । **अव्रजं -** व्रजामीत्यर्थः । अनद्यतनत्वम् अत्राविवक्षितम् । भूतत्वेन निर्देशस्तु कर्तव्यशेषनैरपेक्ष्यव्यञ्जनपरः । त्याज्यानां त्यागस्य पूर्वमस्पष्टत्वादिह तत्प्रपञ्चने तात्पर्यम् ।

उपायत्वमुपेयत्वञ्च 'माता पिता भ्राता' (सु.उ.६) इत्यादि श्रुतिसिद्धसर्वविधबान्धवस्य नारायणस्यैवेत्यभिप्रायेण त्यक्तं सर्वं त्वमेवेत्याह - **त्वमेव** इति । **त्वत्पाद** इत्यत्र त्वच्छब्दाभिप्रेतं च अनेन विशदीकृतम् । सर्वेषां जन्तूनां सर्वेषु जन्मसु सर्वविधोपकारकत्वं

---

1. स्वामिनः - आ । 2. गृह्यते - आ ।

त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च गुरुस्त्वमेव ।
त्वमेव विद्या द्रविणं त्वमेव त्वमेव सर्वं मम देवदेव ।। ८ ।।
पिताऽसि लोकस्य चराचरस्य
त्वमस्य पूज्यश्च गुरुर्गरीयान् ।
न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यो
लोकत्रयेऽप्यप्रतिमप्रभाव! ।। ९ ।। (भ.गी.११-४८)

श्रु.भा. - पित्रादिकार्यरक्षणस्य अस्मिन्नेव पुष्कलत्वादयमेव **बन्धुः**, न तु पित्रादय इत्यभिप्रायेण **त्वमेव** इत्यावृत्तिः । न परं मम, सर्वलोकस्य चेत्याह - **पितासि** इति रक्षकत्वे समाभ्यधिकराहित्यमुक्तम् । सौलभ्ये वा । **अप्रतिमप्रभाव** इति - परत्वस्योक्तिः ।

र.र. - त्वयि समुच्छ्रितमित्यभिप्रायेण प्रत्येकं **त्वमेव** इति साधारणावृत्तिः । मातापित्रादयो हि तत्प्रयुक्तास्तत्सहकृताश्च तदभिमतयत्किञ्चित्करणेनोपकुर्युः, अयं च अनन्यप्रयोज्यो निरपेक्षश्च स्वेच्छयैव सर्वप्रकारेणोपकरोति ।

माता - प्रलयदशायामुदरे स्थापयित्वा प्रसवनात् । प्रियप्रवर्तकत्वादिभिश्च **पिता;** 'अहं बीजप्रदः पिता' (भ.गी.१४-४) इति ह्याह । हितप्रवर्तकश्च **बन्धुः** - संबन्धान्तरेणाप्यहित-निवर्तनार्हः । **गुरुः** - 'गुशब्दः' इत्याद्युक्तान्धकारनिरोधित्वात्; तत्र च असौ गुरुशरीरकः, आदिगुरुश्च । **विद्या** - उपायभूतविद्याप्रवर्तकत्वात्, तत्फलपदत्वाच्च, अकिञ्चनानाम् उपासनरूपविद्यायाः स्थाने निवेशाद्वा । **द्रविणम्** - 'अमृतं साधनं साध्यं यं पश्यन्ति मनीषिणः' (पाञ्चरात्रम्) इत्युक्तात् साधनत्वात्, साध्यत्वाच्च । **त्वमेव सर्वम्** इति उक्तानुक्तसर्वकात्स्न्र्यपरम् । **मम** - तत्त्वविदोऽकिञ्चनस्य त्यक्तान्यसाध्यसाधनस्य त्वयि न्यस्तभरस्य च । **देवदेव** इति - सर्वप्रकारोत्कर्षपरम् ।

एवं स्वविषयेऽनुसंहितस्य सर्वविधबन्धुत्वस्य सर्वविषयत्वेन निरुपाधिकत्वं सूचयति - **पिताऽसि** इति । **लोकस्य** - हिरण्यगर्भादिजन्तुजातस्य । **पूज्यश्च** - पितृत्वगुरुत्वादिभिः सर्वकर्माराध्यत्वश्रुतेश्च समाराध्यः । 'गरीयान् ब्रह्मदः पिता' इत्युक्तमाह- **गरीयान्** इति । **'गरीयान्** - पूज्यतमः' इति तु भाष्योक्तम् (भ.गी.भा.११-४३)। **लोकत्रये** - बद्धमुक्तनित्यरूपचेतनवर्गत्रये । यद्वा, **लोकत्रयशब्देन** सर्वलोकवर्तिनां लक्षणा । प्रभावतोऽप्रतिमत्वस्य कण्ठोक्तत्वात् **न त्वत्समोऽस्ति** इत्यादिकमिह कारुण्यादिषु योजितम् ।

तस्मात्प्रणम्य प्रणिधाय कायं प्रसादये त्वामहमीशमीड्यम् ।

पितेव पुत्रस्य सखेव सख्युः प्रियः प्रियायाऽर्हसि देव! सोढुम् ।। १० ।। (भ.गी.११-४४)

श्रु.भा. - प्रपत्तिं विवृणोति **तस्मात्** इति । **ईशमीड्यम्** - 'न तस्येशे कश्चन, तस्य नाम महद्यशः' (महाना.उ.१-१-२) इतिवत् । पित्रादयस्तत्तत्सम्बन्धाद्धि क्षमन्ते । अतः सर्वविधसम्बन्धात् त्वया क्षन्तव्यमित्यर्थः । प्रार्थनापर्यन्तमहाविश्वासः प्रपत्तिः । महाविश्वासपूर्विका प्रार्थना वा ।

र.र. - **तस्मात्** [1]तवैव[1] सर्वविधबन्धुत्वात्, प्रभावतः कारुण्यादिगुणैश्च सर्वाधिकत्वात्, त्वद्विषयापराधस्य पित्रादिसर्वविषयापराधरूपत्वात् सर्वविषयापराधानां त्वदाज्ञातिलङ्घनरूपत्वेन त्वदपराधत्वाच्चेति भावः ।

प्रणम्य इत्यादिकं **प्रपद्ये** इत्यस्य विवरणम् । प्रकृष्टः प्रह्वीभावश्चात्र प्रकरणात् प्रपत्तिरूपः । स च पूर्वकृत एव फलविशेषप्रार्थनार्थमिहानूद्यते । **कायप्रणिधानम्** - अत्र स्वरक्षणार्थस्वव्यापारान्तरनिवृत्तिव्यञ्जकमात्रम् । **प्रणम्य प्रसादये** - प्रपदनरूपं प्रसादनं अनुतिष्ठामि । भक्तिवत् प्रपत्तिरपि प्रसादनविशेषः । मदिष्टविघातानिष्टप्राप्तिहेतु-भूतमत्कृतापराधजनिताप्रीतिरूपकालुष्यरहितं करोमीत्यर्थः । **त्वाम्** - स्वतः सर्वभूतानां सुहृदं मदपराधात् कलुषितबुद्धिम् । **अहम्** - अकिञ्चनोऽनन्यगतिः त्वत्पत्न्या दत्तवरः त्यक्तत्वदितरसाध्यसाधनश्च । **ईशम्** - सापराधनिग्रहादिसमर्थम् । **ईड्यम्** - क्षमादिभिः स्तुत्यम् । 'न तस्येशे कश्चन तस्य नाम महद्यशः' (महाना.उ.१-१-२) इति श्रुत्युक्तमनेन पदद्वयेन दर्शितम् । क्षुद्रोऽपि जन्तुः संबन्धविशेषात् अपराधं सहते, किं पुनस्त्वमित्यभिप्रायेण पित्रादिदृष्टान्तः ।

प्रियः प्रियाय - मत्प्रीतिविषयस्त्वं त्वत्प्रीतिविषयाय मह्यम् । 'प्रियो हि ज्ञानिनोऽत्यर्थं अहं स च मम प्रियः' (भ.गी.७-१७) इति हि स्वयमेवात्थ । **अर्हसि देव सोढुम्** इति वक्ष्यमाणसङ्ग्रहः । संसारमोचनमपि ते लीलैवेति **देव**शब्दाभि[2]प्रायः[2] । एतावदन्तं पूर्वखण्डविवरणमिति केचित् ।

---

1. तवैवं - अ ।   2. प्रेयः - आ ।

[भगवत्प्रपदन-प्रसादनविरोधि-विविधापचार-क्षमायाचना]

मनोवाक्कायैः अनादिकालप्रवृत्तानन्त-
अकृत्यकरण-कृत्याकरण-

श्रु.भा. - अथोत्तरखण्डं विवृण्वन् इष्टप्राप्तेरनिष्टनिवृत्तिपूर्वकत्वरूपार्थक्रमात् प्रथमं नमश्शब्दार्थमाह - **मन** इत्यादिना । **अनादिकालप्रवृत्त**त्वमानन्त्यहेतुः । प्रथमम् **अनन्त**शब्दः सामान्यापराधविशेषणम् । सामान्यापराधमुक्त्वा विशेषापराधमाह - **भगवत्** इति ।

र.र. - अथोत्तरखण्डस्थस्यापि सविशेषण **नारायण** शब्दस्य पूर्वमेव व्याख्यातत्वात्, अवशिष्टयोश्च चतुर्थीनमसोः पाठक्रमादर्थक्रमस्य बलीयस्त्वात् प्रथमं **मनोवाक्कायैः** इत्यादिभिस्त्रिभिर्वाक्यैरिष्टप्राप्तेः पूर्वभाविनीं ममकारनिवृत्तिवाचि नमःशब्दविवक्षितां सर्वानिष्टनिवृत्तिं प्रार्थयते । तत्र सर्वस्य चानिष्टस्येष्टविघातस्य च कर्ममूलत्वात् तन्निवृत्तिः पूर्वमभ्यर्थ्यते । मानसादिभेदेन त्रिविधः पापराशिः, तद्विपाकश्च मन्वादिभिर्विभक्त इति ज्ञापनाय करणत्रयोपादानम् ।

अकृत्यकरणादेः अहेतुकत्वमन्योन्याश्रयादिकं च परिहर्तुमाह - **अनादिकालप्रवृत्त** इति । हितप्रवृत्तियोग्यैः करणैरेतावन्तं कालमहिते प्रवृत्तोऽस्मीति निर्वेदश्चात्र व्यञ्जितः । 'यद्ब्रह्मकल्प' (वै.स्त.६२) इत्यादिप्रक्रियया **अनादिकालप्रवृत्तम्,** अत एव **अनन्तम्** । प्रथमोऽनन्तशब्दः **अकृत्यकरण-कृत्याकरण**रूपसामान्यापचारयोः अन्वेतव्यः । द्वितीयस्तु **भगवदपचारादौ** । **अकृत्यकरणादि**पञ्चकमुत्तरोत्तरं क्रूरतरम् । यद्यपि केषाञ्चित् कृत्यानामकरणम् **अकृत्यकरणा**त्मकम्, तथाऽपि शरणागतरक्षणादि**कृत्याकरणं** महत्तरपातककोटौ स्मर्यत इति ज्ञापयितुमकृत्य[1]करणादुत्तरं[1] **कृत्याकरणोक्तिः** । **अकृत्यकरण** [2]अन्तर्गतस्यापि[2] भगवदपचारादेः 'ब्राह्मणपरिव्राजक'न्यायेन प्रकृष्टत्वज्ञापनाय पृथगभिधानम् ।

---

1. करणानन्तरम् - अ । 2. अन्तर्भूतस्यापि - अ ।

भगवदपचार-भागवतापचार-
असह्यापचाररूप-नानाविधानन्तापचारान्;

श्रु.भा. - भगवदपचारः - शिशुपालादिकृतः । **भागवतापचारः** तु भागवतविषये अर्थादिनिमित्तान्तरेण कृतः । **भागवतापचारः - भगवदपचारः** । भगवदपचारो - भागवतापचार इति । भागवतभक्तविषयापचारः - **असह्यापचारः**, आचार्यविषयापराधो वा । भागवते अभागवतत्वनिमित्ता[1]पराधो[1] वा । अर्चावतारविग्रहस्य अवैलक्षण्य-प्रतिपत्तिर्वा । ऐकैककोट्यवान्तरभिदापरो **नानाविध**शब्दः ।

र.र. - यद्यपि **अकृत्यकरणादेः** अपि आज्ञातिलङ्घनरूपतया **भगवदपचारत्वम्**, तच्चात्र **अपचारान्** इति विशेष्यनिर्देशेन व्यज्यते; तथाऽपि शिशुपालादीनामिव अव्यवधानेन भगवत्परिवादादिकमिह **भगवदपचार**शब्दोक्तम् । **अकृत्यकरण**शब्देन तु स्वस्ववर्णाश्रमादि-निषिद्धानुष्ठानमात्रम् । **कृत्याकरण**शब्देन स्ववर्णादिनियतधर्मस्य प्राप्तकाले शक्तेन अननुष्ठानम् । **भगवदपचाराश्च** द्वात्रिंशदपचारादिप्रकरणेषु द्रष्टव्याः । भगवदीयेषु वस्तुषु स्वीयत्वबुद्धिः, अर्चावतारपर्यन्तेष्ववतारेषु प्राकृतत्वबुद्धिः इत्यादयोऽपि **भगवदपचाराः** । त्वदपचारेति वक्तव्येऽप्यत्र **भगवदपचार**शब्दस्तत्तत्प्रमाणोपात्त-प्रकारसूचनार्थः ।

अयथाशास्त्रमर्थाद्युपाधिभिर्भागवतविरुद्ध आचरणमिह **भागवतापचारः** । इमौ विपर्यासेन केचित् वर्णयन्ति । एतयोरेवापचारवर्गयोः 'न क्षमामि' (वरा.पु.) इत्यादिभिर्विशेषिताः केचित् पूर्वोक्तन्यायात् **असह्यापचारा** इति विभज्यन्ते । ते च 'विद्याचोरो गुरुद्रोही', 'एकाक्षरप्रदातारम्', (अत्रि.स्मृ.१-१०) 'यः शूद्रं भगवद्भक्तम्', (इ.स.२६-२६) 'मयि द्वेषानुबन्धोऽभूत् संस्तुतावुद्यते तव,' (वि.पु.१-२०,२१) इत्यादिषु द्रष्टव्याः । एवं निर्निबन्धनभगवद्भागवतद्वेषावज्ञापरिहासादयश्च यथालोकं **असह्यापचारा** इत्यनुशिष्यन्ते । एते पञ्चापि प्रत्येकमवान्तरोपाधिभिः **नानाविधाः**, तत्तद्विधास्वपि अवान्तर[2]व्यक्तिभेदै[2]रनन्ताः ।

---

1. पचारो - इ । 2. वृत्तिभेदै - अ ।

आरब्धकार्यान्-अनारब्धकार्यान्;

कृतान्-क्रियमाणान्-करिष्यमाणांश्च-सर्वान् अशेषतः क्षमस्व ।। ११ ।।

श्रु.भा. - सर्वशब्दः अपराधव्यक्तिकात्स्न्र्यपरः । कर्मणां वैदिककर्मानर्हतापादनशक्तिः, प्रत्यवायकरत्वशक्तिः वासनाजनकत्वशक्तिश्चास्ति । तत्र अन्यतमशक्तिमात्रं **क्षमा**विषयो माभूदिति **अशेषत** इत्युक्तम् ।

र.र. - आरब्धकार्यान् - जात्यायुर्भोगरूपविपाकसंज्ञफलप्रदाने प्रवृत्तान् । यद्यपि, 'अनारब्धकार्य एव तु पूर्वे तदवधेः' (ब्र.सू.४-१-१५) इति उपासने सूत्रितम्, तथाऽपि 'साध्यभक्तिस्तु सा हन्त्री प्रारब्धस्यापि भूयसी' (सा.तं.) इति प्रपत्तौ विशेषवचनात् अत्रारब्धकार्योपादानम् । अर्थितार्थप्रदस्य शरण्यस्य प्रपत्तॄणामार्तितारतम्यानुसारेण यथाप्रार्थितफलप्रदानात् तदिष्ट[1]देहा[1]द्यनुवृत्तौ न प्रत्यक्षादिविरोधः । **अनारब्धकार्यान् -** प्रारब्धकार्यकर्मनिरुद्धावसरतया अनुपक्रान्तफलान् । द्विविधानपि **कृतान्** इत्यवच्छिनत्ति । **क्रियमाणान् -** आनुकूल्यसङ्कल्पादिमत्त्वेऽपि देशकालादिवैगुण्यात् पूर्वनियुक्त-दूरस्थदुर्निवारभृत्त्यादिमुखेन वा उपक्रान्तान् अपरिसमाप्तान् । **करिष्यमाणान् -** तद्वदनुबन्धादिमुखेनागत्या प्रमादाद्वा संपतिष्यतः । बुद्धिपूर्वोत्तराघानां पश्चादेव प्रायश्चित्त विधानात् । तेषामपि अत्र सङ्ग्रहे तु यथार्हं प्रायश्चित्तप्रेरणं क्षमाफलं ग्राह्यम् ।

सर्वान् अशेषत इति व्यक्तिशक्तिकात्स्न्र्यपरम् । सन्ति हि पापानां बह्व्यः शक्तयः तत्त्वतिरोधायकत्वम्, प्रत्यवायजनकत्वम्, कर्मान्तरानर्हतापादकत्वम्, सजातीय-पापारम्भरुचिजनकत्वं चेति । एतास्वन्तिमा वासनेत्युच्यते । सा च प्रत्युत्तरे व्यक्तमनुवदिष्यते । पापशक्तिश्च निग्रहसंज्ञः परमपुरुषबुद्धिविशेष एवेति **क्षमस्व** इत्यनेन व्यज्यते । निग्रहनिवृत्तिरूपो हि प्रसादविशेष इह **क्षमा ।** अत्र भागवतापचारेषु तद्विदितेषु तत्प्रसादनमुखेन भगवतः प्रसादनम्, 'मया त्वं परुषाण्युक्तस्तच्च त्वं क्षन्तुमर्हसि' (रा.कि.३६-२०) [2]इति[2]न्यायात् । तदविदितेषु तु अव्यवधानेन, रहस्यप्रायश्चित्तन्यायात् ।

---

1. भोगा - अ । 2. इत्यादि - अ ।

[भगवत्प्रपदनविरोधि विपरीतज्ञान-विपरीतवर्तनयोः क्षमाप्रार्थना]

अनादिकालप्रवृत्तं विपरीतज्ञानम् आत्मविषयम् -
कृत्स्नजगद्विषयं च विपरीतवृत्तं च अशेषविषयम्;
अद्याऽपि वर्तमानं वर्तिष्यमाणं च सर्वं क्षमस्व ।। १२ ।।

श्रु.भा. - अथ मोक्षविरोधि [1]पुण्यपापरूपम्[1] क्षामयति- **अनादि** इति । आत्मनो जगतश्च स्वातन्त्र्यधीः, देवतान्तरशेषत्वधीः भगवच्छेषवस्तुनि, स्वशेषत्वधीश्च **विपरीतज्ञानम् ।** पुण्यञ्च स्वतन्त्रात्मधीमूलत्वात् भ्रान्तिमूलम् । भगवद्भागवतदेवतान्तरभजनरूपं स्वार्थं स्वपुत्राद्यर्थञ्च यत्पुण्यं तत् - **अशेषविषयम्** विपरीत[2]वृत्तम्[2] [3]इत्युच्यते[3] । आचार्यसेवादिना शास्त्रजन्यज्ञाने सम्पन्नेऽपि वासनावशात् अनुवर्तमानम् इत्यभिप्रायेणोक्तम् **अद्यापि वर्तमानम्** इति ।

र.र. - एवं निषिद्धक्षमा प्रार्थिता । अथ सहेतुककाम्यक्षमा प्रार्थ्यते - **अनादिकाल** इति । क्षुद्रपुरुषार्थकामनाया विपरीतज्ञानसापेक्षतया अपचाराणामिव शास्त्रार्थज्ञानपूर्वककाम्यानामपि मात्रया भ्रान्ति[4]हेतुत्वं[4] व्यञ्जयितुमिह विशेषतो **विपरीतज्ञान**स्य सहोक्तिः । यथावस्थित-विषयविरुद्धाकारावगाहिज्ञानमिह **विपरीतज्ञानम् ।** तच्चात्र 'योऽन्यथासन्तमात्मानम् अन्यथा प्रतिपद्यते,' (म.भा.उद्यो.४२-३५) इत्यादिभिरुक्तः स्वात्मनो जगतश्च स्वनिष्ठत्व-स्वतन्त्रत्व-शेषत्व-भगवदन्यनिष्ठत्वादिभ्रम इत्यभिप्रायेणाह - **आत्मविषयं कृत्स्नजगद्विषयं** चेति ।

वृत्तशब्दस्य शास्त्रीये प्रसिद्धिप्रकर्षमुपजीव्य **विपरीतवृत्तम्** इति बन्धकं काम्यकर्मोच्यते; अन्यथा पूर्वोक्तेन पुनरुक्तिप्रसङ्गात् । काम्यस्य च **विपरीतवृत्त**त्वं सात्त्विकत्यागसमदर्शित्वादिविशिष्टहिततमधर्मविपरीतत्वात् । विपरीतवृत्तेऽपि स्वविषयतया पुत्रादिविषयतया च [5]वैविध्यं[5] दर्शयति - **अशेषविषयम्** इति । **अद्यापि वर्तमानं वर्तिष्यमाणं च ।** सद्गुरूपदेशादिभिः परोक्षसम्यक्ज्ञाने निष्पन्नेऽपि बाधितानुवृत्त्यादि-नयाद्वासनारागादिभिः अनुवर्तमानमित्यर्थः । अत्र चकारेण पूर्वकृत**विपरीतवृत्त**समुच्चयः । **अद्यापि** इत्यनेन च अनादिविपरीतवृत्तसन्ततिः सूच्यते । अत्रापि **सर्व**शब्दः पूर्ववत् कार्त्स्न्यपरः । **अशेषत** इति चानुसन्धेयम् ।

---

1. पुण्यरूपंपापम् - इ । 2. विषयम् - इ । 3. उच्यते - इ । 4. हेतुकत्वम् - अ ।
5. द्वैविध्यं - अ ।

[तत्त्वतिरोधायकस्वभावमायातारणप्रार्थना]

मदीयानादिकर्मप्रवाहप्रवृत्ताम्,

श्रु.भा. - अथ प्रकृतिः, **मदीय** इति । बीजांकुरन्यायात् **अनादिता** ।

र.र. - इह यथाधिकारं यथाचोदितमनुतिष्ठितानमपि संसारहेतुधर्माणामभिचाराणामिव अनर्थपर्यवसायितया मुमुक्ष्वपेक्षया पापत्वोक्तेः, स्वर्गादिहेतुभूतस्वतन्त्रसंकल्पेऽपि निग्रहहेतुत्वबुद्ध्या काम्यक्षमाप्रार्थनं युक्तम् । यद्यप्येवं पूर्वकृतेषु काम्येषु गतिः, तथाऽपि वर्तमानवर्तिष्यमाणकाम्यक्षमार्थिनां स्वयं तदारम्भ एव न संभवतीति कथं तत्क्षमाप्रार्थनम्? इत्थम् । अज्ञातयादृच्छिकसुकृतन्यायात् सुहृज्जनबुद्ध्या वा संभवत्सु नेदं चोद्यम् । स्वबुद्धिपूर्वमपि वर्तमानेषु काम्येषु मध्ये निर्विण्णानामपि प्रक्रान्तसमापनमन्तरा लब्धवृष्टेः कारीरीशेषसमापनन्यायेन स्यात् । तत्र पश्चिमांशस्य आज्ञासिद्धत्वान्न काम्यत्वदोषः । पूर्वांशस्य तु क्षुद्रफलकामनामूलस्य तत्फलजनकत्वाभावेऽपि तादृशवासनाजनकत्वसंभवात् कर्मयोगस्यैव 'नेहाभिक्रमनाशोऽस्ति' (भ.गी.२-४०) इति न्यायेन केषांचित् कर्मणाम् असमाप्तानां कृतांशस्य विलम्बकारिसाधनान्तरपर्यवसितफलजनकत्वात् तत्क्षान्तिः प्रार्थनीया । अत्र पूर्वापरांशयोरधिकारभेदेऽप्यासमाप्तेरैककर्म्यात् वर्तमानव्यपदेशोऽपि युक्तः । उत्तरकालेऽपि केनचिद्धेतुना निर्वेदविच्छेदात् नित्यत्वभ्रमात् स्वप्रदोषाद्वा काम्यं संभाव्यते । तस्यानुत्पन्नस्यापि क्षमावेक्षणं शीघ्रं स्वोचितप्रायश्चितप्रेरणार्थम्, सौभर्यादिन्यायेन क्रमेण वैराग्यजननार्थं वा । उक्तं हि प्रपन्नमधिकृत्यैव -

'अथोपायप्रसक्तोऽपि भुक्त्वा भोगान् अनामयान् ।
अन्ते विरक्तिमासाद्य विशते वैष्णवं पदम्' ।। (ल.तं.१७-१०३) इति ।

एवं कर्मनिवृत्तिः प्रार्थिता; अथ कर्महेतुप्रकृतिसंबन्धनिवृत्तिः कर्मनिवृत्त्यैव भवन्त्यपि सर्वेश्वरबुद्धिविशेषाधीनेति ज्ञापयितुमभ्यर्थ्यते - **मदीय** इति । ईश्वरस्य वैषम्यनैर्घृण्यपरिहारार्थं **मदीय** इत्युक्तम् । [1]अन्योन्याश्रय[1]निवारणाय बीजाङ्कुरादि-न्यायमभिप्रेत्याह - **अनादिकर्मप्रवाहप्रवृत्ताम्** इति । प्रकृतिस्वरूपस्य पुरुषवत् अनादित्वात् तत्प्रवृत्तिमात्रे कर्महेतुकत्वमुक्तम् ।

---

1. अन्योन्याश्रयादि - अ ।

भगवत्स्वरूपतिरोधानकरीं, विपरीतज्ञानजननीं,
स्वविषयायाश्च भोग्यबुद्धेर्जननीं, देहेन्द्रियत्वेन-
भोग्यत्वेन-सूक्ष्मरूपेण चावस्थिताम्, दैवीं, गुणमयीं,

श्रु.भा. - 'गुणमाया समावृतः' (जि.स्तो.१-३) इत्यस्य अर्थमाह - **भगवत्स्वरूप** इति । **विपरीतज्ञानं** - देहे अहं धीः । भोग्यभोगोपकरण[1]रूपत्व[1]माह **देह** इत्यादिना । **दैवीं** - [2]त्वल्लीलार्थम्[2] ।

र.र. - तत्र च, 'गुणमायासमावृतः' (जि.स्तो.१-३) इत्यादिप्रसिद्धंप्रतिकूलप्रवृत्तित्रयं **भगवत्स्वरूप** इत्यादिभिराह । **भगवत्स्वरूपतिरोधानं** नाम क्षेत्रज्ञानां भगवत्स्वरूपविषयज्ञान-प्रसरनिरोधः । तथा च अत्यन्ततिरोधानादसत्वबुद्धिम्, सामान्यतो विदितेऽपि [3]भगवति[3] सर्वाश्रयत्वादिधर्मतिरोधानादरत्वादिबुद्धिम्, तदन्येषु स्वनिष्ठत्वादिबुद्धिं च करोतीत्याह - **विपरीतज्ञानजननीम्** इति । इदं च जीवस्वरूपतिरोधानतन्मूलदेहात्मभ्रमादेः उपलक्षणम् । एवं तत्त्वत्रयतिरोधानफलभूतं विपरीतज्ञानान्तरमाह - **स्वविषयाया** इति । प्रकाशमानेषु वस्तुषु **तिरोधानं** नाम तत्तद्भेदकधर्मग्रहणनिवारणम् । इदमेव हि सर्वत्र भ्रान्तेर्निदानम् । उक्तस्या[4]प्याकार[4]त्रयस्य हेतुभूतमवस्थाचतुष्टयं **देह** इत्यादिभिरुच्यते । **देहेन्द्रियत्वेन** भोगायतनतया भोगोपकरणतया च । **भोग्यत्वेन** - शब्दादिगुणविशिष्टभूतपञ्चकरूपत्वेन । **सूक्ष्मरूपेण** - देहादिपरिणामरहितांशेन । सेयं प्रकृतिरिदानीं चतुर्भिरपि अंशैरपकरोति । प्रलयदशायां तु सूक्ष्मरूपेणैव तिरोधानमात्रं करोतीति व्यवस्था 'देहयोगाद्वा सोऽपि' (ब्र.सू.३-२-५) इति 'सूत्रभाष्ये' द्रष्टव्या ।

ईदृश्याः प्रकृतेः दुरत्ययत्वं स्वतन्त्रलीलाप्रवृत्ततयेति 'दैवी ह्येषा गुणमयी' (भ.गी.७-१४) इत्यादिना त्वयैव गीतमिति सूचयति **दैवीम्** इति । तिरोधानादिहेतुभूतैरवस्थाचतुष्टयानुवृत्तेः बन्धहेतुभिः सत्त्वादिगुणैः प्रचुरतामाह - **गुणमयीम्** इति । 'सत्वादिगुणसमुदाय एव प्रकृतिः,' इति सांख्यपक्षस्तु, 'गुणाः प्रकृतिसंभवाः,' (भ.गी.१४-५) 'प्रकृतेर्गुणसंमूढाः' (भ.गी.३-२९) इत्यादिव्यधिकरणप्रयोगबलात् निरस्तः ।

---

1. रूप - इ । 2. त्वल्लीलार्थाम् - इ । 3. भगवतः - अ । 4. पकार - आ ।

मायाम्; दासभूतः,

'शरणागतोऽस्मि; तवाऽस्मि दास' इति वक्तारं मां तारय ।। १३ ।।

श्रु.भा. - दासभूतं - माम् इति सम्बन्धः । [1]शरणागतोऽस्मि[1] **तवास्मि** इति पूर्वोत्तरखण्डार्थः । **वक्तारम्** - 'भवशरणमितीरयन्ति' (वि.पु.३-७-३३) इति हि उच्यते ।

र.र. - क्वचित्तु सत्वरजस्तमःशब्दानां द्रव्यपर्यन्तः प्रयोगः 'तद्गुणसारत्वात्तु तद्व्यपदेशः' (ब्र.सू.२-३-२९) इति न्यायेन नेतव्यः । एवमनन्तैर्विभागैर्व्यापारैः परिणामैः गुणैश्च प्रख्यातमाश्चर्यत्वं समाख्यविशेषेण आह - **मायाम्** इति । **मायां मां तारय** इति द्विकर्मकतयाऽन्वयः ।

दासभूत इत्यादिभिर्मूलमन्त्रपदत्रयार्थः सूच्यते । 'दासभूताः स्वतः सर्वे' (मं.रा.स्तो.१२) 'आत्मदास्यं हरेः स्वाम्यम्' (वि.त.) इत्यादिप्रसिद्धं स्वभावतो दासत्वं च्विप्रत्ययाभावेन व्यज्यते । द्वयेऽपि नारशब्दवाच्यानां जीवानां तात्पर्यवृत्त्या दासत्वं ग्राह्यम् । दूरं पलायितेऽपि मयि त्वत्सम्बन्धस्तावत् दुस्त्यजः । दास्यप्रतिबोधश्च मे संप्रति जात इति भावः । **शरणागतोऽस्मि तवास्मि दासः** इति पूर्वोत्तरखण्डार्थनिष्ठत्वं समुच्चित्योक्तम् ।

'स्वरूपभरलाभेषु तवैव न ममेति यत् ।
प्रपन्नस्यानुसन्धानं सारं तदिह दर्शितम्' ।।

अस्मि इति प्रार्थनाभिप्रायम् । **दासोऽस्मि** - दासवृत्तिपरः स्यामित्यर्थः । अन्यथा तु **दासभूत** इत्युक्तस्यैव पुनर्वचनमात्रं स्यात् । **शरणागतोऽस्मि तवास्मि दासः** इति निर्देशौ प्रार्थनात्मनिक्षेपपरौ, इति केचित् । आर्तो वा दृप्तो वा द्वयवक्ताऽहं तव दयनीय इत्यभिप्रायेणाह - **इति वक्तारम्** इति । यद्यप्यत्र फलप्रार्थनार्थं प्रपत्तिकर्तृत्वानुवाद एव युक्तः, तथाऽपि तद्वचनकर्तृत्वानुवादः 'भव शरणमितीरयन्ति' (वि.पु.३-७-३३) इत्याद्यभिप्रेत-वचनप्राशस्त्यादिव्यञ्जनार्थः । **माम्** - 'स्वयं मृत्पिण्डभूतस्य' (म.भा.शां.२९४-१९) इत्यादि-प्रसिद्धं स्वरक्षणासमर्थम् । त्रिगुणद्रव्यस्य नित्यतया नाशाभावात् **तारय** इत्युक्तम् । एतेन, 'दुरत्यया' (भ.गी.७-१४) इत्युक्तं स्वयत्नेन दुस्तरत्वम्, 'मामेव ये प्रपद्यन्ते' (भ.गी.७-१४) इत्यादिनाऽभिप्रेतं पराधीनतरणं च गम्यते । एवं नमःशब्दे निवर्तनीयतयाऽभिप्रेतस्य पापस्य भ्रमस्य प्रकृतिसंबन्धस्य च मिथःकार्यत्वं कारणत्वं च यथायोगं द्रष्टव्यम् ।।

---

1. दासभूतोऽस्मि - इ ।

[स्वस्य गीतोक्त-परज्ञानप्रार्थना]

तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते ।
प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः ।। (भ.गी.७-१७)
उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतम् ।
आस्थितः स हि युक्तात्मा मामेवानुत्तमां गतिम् ।। (भ.गी.७-१८)

श्रु.भा. - अथ चतुर्थ्यर्थम् इष्टप्राप्तिं प्रार्थयते - **तेषाम्** इत्यादिना ।

र.र. - अथ निर्वेदमान्द्यात् ईषद्विलम्बक्षमाणामत्रत्यविशदज्ञानभक्त्योरपि कैङ्कर्योपयोगितया चतुर्थ्यभिप्रेतफलकोटिघटितत्वात् स्वयंप्रयोजनं तदुभयं **तेषाम्** इत्यादिना प्रार्थ्यते ।

'तत्पादभक्तिज्ञानाभ्यां फलमन्यत्कदाचन ।
न याचेत् [1]पुरुषो[1] विष्णुं याचनान्नश्यति ध्रुवम्' ।। (पाञ्चरात्रम्)

इति तावन्मात्रप्रार्थना ह्यनुज्ञाता । अत्र परभक्तिवचनं तदनन्तरभाविपरज्ञान-परमभक्त्योरप्युपलक्षणम् । तच्च प्रतिवचनभागे व्यञ्जयिष्यते । **ज्ञानी** - 'प्रकृतिं विद्धि मे पराम्' (भ.गी.७-५) इत्यादिप्रतिपादितभगवच्छेषतैकरसात्मस्वरूपवित् भगवन्तमेव परमप्राप्यं मन्वानः । **नित्ययुक्तः** - ऐश्वर्याद्यर्थिनां स्वाभिलषितप्राप्तौ सिद्धायां भगवता योगो निवर्तते, ज्ञानिनस्तु च तथेति भावः । **एकभक्तिः** - न तु प्रयोजनान्तरविभक्तभक्तिरित्यर्थः ।

एतदुभयं **ज्ञानी विशिष्यत** इत्यस्य हेतुः । **अत्यर्थम्** - अत्यभिधेयम्; सर्वज्ञेन सर्वशक्तिना मयाऽपि दुर्वचमिति भावः । **स च मम प्रियः** इत्यत्रापि **अत्यर्थम्** इत्येतदनुषज्यते । यद्वा, स्वप्रीत्यपेक्षया स्वभक्तप्रीतेः प्रकर्षोक्त्या स्तुतिः ।

आत्मैव - सर्वान्तरात्मनो ममाप्यन्तरात्मैव । नन्विदं प्रमाणविरुद्धमित्यत्राह - **मे मतम्** इति । प्रकृष्टप्रीतिविषयत्वेनातिवादान्न विरोधः । तथाऽत्यादरे हेतुमाह - **आस्थित** इति । **युक्तात्मा** - मद्विरहस्यातिदुःसहतया मयि नित्ययोगप्रवृत्तमनाः । **अनुत्तमां गतिम्** - परमप्राप्यम् ।

---

1. प्रणतो - अ ।

बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते ।
वासुदेवः सर्वमिति स महात्मा [1]सुदुर्लभः[1] ।। (भ.गी.७-१९)
[2]इति[2] श्लोकत्रयोदित-ज्ञानिनं मां कुरुष्व! ।। १४ ।।

[स्वस्य गीतोक्त भक्तिज्ञानसम्पन्नत्वापादनप्रार्थना]

'पुरुषः स परः पार्थ! भक्त्या लभ्यस्त्वनन्यया' । (भ.गी.८-२२)
'भक्त्या त्वनन्यया शक्यः,' (भ.गी.११-५४)
'मद्भक्तिं लभते पराम्' (भ.गी.१८-५४)

श्रु.भा. - परभक्तिस्थाने प्रपदनम् । **परज्ञान परमभक्ती** देहसम्बन्धवेलायाम् उपासकस्य उपायकोटिनिविष्टे । प्रपन्नस्य तु उभयकोटिघटिते । अतः परज्ञानं प्रार्थितं **तेषाम्** इत्यादिना । अथ परमभक्तिप्रार्थनम् - **पुरुषः स पर** इत्यादिना । व्यवहितत्वात् **स्थानत्रय** इत्युक्तं, न तु **श्लोकत्रय** इति ।

र.र. - जन्मनाम् - पुण्यजन्मनाम् । **ज्ञानवान्** - पूर्वोक्तज्ञानवान् । 'वासुदेवः सर्वमिति प्रपद्यते' इत्यन्वयः । **सर्वम्** - प्राप्यप्रापकादि । 'रामस्य व्यवसायज्ञः' (रा.सुं.१६-४) इत्यादिनिदर्शितज्ञानविशेषवत्वात् **महात्म**त्वोक्तिः । 'महामनाः' (भ.गी.भा.७-१९) इति भाष्यम् । **सुदुर्लभः** - मत्तः प्रयोजनान्तरार्थिन आर्तादयोऽपि दुर्लभाः । अयं तु कर्मवश्यमध्ये भक्तलाभार्थिना मया देशिकार्थिभिश्चान्यैः सुदुर्लभः, लब्धश्चेदयमलभ्यलाभ इति भावः । उक्तं हि श्रीपौष्करे -

'दुर्लभा भगवद्योगभाविनो भुवि मानवाः ।
तद्दर्शनात् तदालापात् सुलभं शाश्वतं पदम्' ।। (पौ.सं.) इति ।

माम् - 'अज्ञो जन्तुरनीशोऽयम्' (म.भा.शां.१२-३६) इत्युक्तेषु मूर्धाभिषिक्तम् । **श्लोकत्रयोदितज्ञानिनं कुरुष्व** - क्रियाफलं त्वद्गामीत्यात्मनेपदेन व्यज्यते । अव्यवहितत्वादिह **श्लोकत्रय** इत्युक्तम् । परभक्तिश्लोकानां भिन्नप्रकरणस्थतया **स्थानत्रय** इत्युक्तम् । **माम्** - 'या प्रीतिरविवेकानाम्' (वि.पु.१-१९-२०) इत्युक्तेषु बाह्यविषयसक्तेष्वग्रगण्यम् ।।

1. **'सुदुर्लभः'** इति अत्र नास्ति - इ । 2. इत्यादि - इ ।

इति स्थानत्रयोदित-परभक्तियुक्तं मां कुरुष्व! ।। १५ ।।

परभक्ति-परज्ञान-परभक्त्येकस्वभावं मां कुरुष्व! ।। १६ ।।

[भगवति स्वस्य भक्तिज्ञानादिसहकृतनित्यकिङ्करत्वसम्पत्तिप्रार्थना]

परभक्ति-परज्ञान-परमभक्तिकृत-परिपूर्णानवरत-
नित्य-विशदतम-अनन्यप्रयोजनानवधिकातिशयप्रिय-भगवदनुभवोऽहम्,
तथाविध-भगवदनुभव-जनितानवधिकातिशय-प्रीतिकारित-
अशेषावस्थोचित-अशेष-शेषतैकरतिरूप-नित्यकिङ्करो भवानि ।। १७ ।।

श्रु.भा. - अथ बन्धनिवृत्तेः अनन्तरभाविनीः **परभक्ति-परज्ञान-परमभक्तिः** प्रार्थयते - **परभक्ति** इति । अत एव हि **एकस्वभावम्** इत्युक्तम् । पूर्ववदर्थः ।

अथ [1]भगवज्जनित[1]प्रीतितत्कारितकैङ्कर्याणि प्रार्थयते **पर** इति । पूर्ववदर्थः । **शेषतैकरतिरूप**शब्दः बहुव्रीहिः ।

र.र. - अथ शरीरपातसमयभाविनो बुद्ध्याकारान् अभ्यर्थयते - **परभक्ति** इति । अथवा, मुक्तिदशाभाविनां परभक्त्यादीनामिदमपेक्षणम् । **एकस्वभाव**त्वोक्तिर्हि अत्रत्य **परभक्त्या**दिव्यवच्छेदार्था । उक्तानामेव तत्रत्यपरभक्त्यादीनां सादरानुवादेन कैङ्कर्यपर्यन्ततां याचते - **पर** इति । अत्र त्वदिति वक्तव्ये **भगवत्** शब्दः अनुभाव्यपौष्कल्यस्फुटीकरणार्थः । किङ्करविशेषणे **शेषतैकरतिरूप**शब्दे **शेषतैकरति**रेव **रूपं** निरूपकं यस्येति भाव्यम् ।

भवानि इति प्रार्थना । त्वत्किङ्करभावात् पूर्वमसत्कल्पोऽहं [2]इति च[2] सूच्यते । एवं द्वयार्थो व्याख्यातः ।।

सर्वज्ञेऽपि स्वतो देवे याञ्चाविज्ञापनादिभिः ।
तत्तदिष्टप्रदित्सात्मा प्रीतिरेव प्रसाध्यते ।।
तदेव चोदनोपज्ञम् अपूर्वं तत्त्ववेदिनाम् ।
आराध्येन्द्राद्यपायेऽपि फलदानाय तिष्ठति ।।

---

1. भगवदनुभवजनित - इ ।　2. इति - अ ।

[भगवता स्वानुग्रहेण शरणागते चेतने प्रार्थितार्थनिर्वृत्तिदृढीकारः]

एवम्भूत-मत्कैङ्कर्य-प्राप्त्युपायतया-अवक्लृप्त-समस्त-वस्तु-विहीनोऽपि,
अनन्त-तद्विरोधि-पापाक्रान्तोऽपि, अनन्त-मदपचार-युक्तोऽपि,
अनन्त-मदीयापचार-युक्तोऽपि, अनन्तासह्यापचार-युक्तोऽपि,

श्रु.भा. - अथ [1]भगवद्वाक्यमाह[1]- **एवम्** इत्यादि । वक्ष्यमाणचरमश्लोकप्रथमपदार्थमाह **एवम्भूत** इति । **अवक्लृप्तम्** - विहितम् । **समस्तवस्तु**शब्देन कर्मज्ञानभक्तियोगाः, तदनुगुणाः अमानित्वादिगुणाश्च विवक्षिताः । **विहीन** इति त्यागोऽनूदित इति भावः । **परि** शब्दार्थमभिप्रयन्नाह - **अनन्त** इति । **विरोधि**भूयस्तया कालान्तरेऽपि तन्नैराश्यं हि तदर्थः ।

र.र. - अथैवमभ्यर्थितस्य भगवतस्तदभ्यनुज्ञादिविषयैः प्रपत्तिजनितप्रसादपरिवाहैः प्रतिवचनैः प्रकृतौपयिकवक्ष्यमाणचरमश्लोकार्थोऽपि प्रतिबोध्यते । तथाहि - अत्र **प्रतिहतोऽपि** इत्यन्तेन अशक्तिपूर्त्या अनागतानन्तकालसमीक्षयाऽप्यदृष्टसन्तारोपायतां [2]प्रकाशयता[2] **अनन्यशरणः** इत्युक्तविस्तररूपेण प्रथमपादतात्पर्योक्तिः । **येनकेनापि** इत्यादिना त्वमित्यन्तेन द्वितीयपादोक्ताधिकारिकृत्यलाघवादिव्यञ्जनम् । **केवलम्** इत्यादिना तु 'अहं त्वा' (भ.गी.१८-६६) इति वाक्याभिप्रेतानिष्टनिवृत्तिपूर्वकेष्टप्राप्तिप्रकाशनम् । **एवंभूतोऽसि** इत्यादिभिः प्रपन्नविषयशोकापनोदनवाक्याभिप्रेतप्रपञ्चनमिति [3]विभागः[3] ।

एवम्भूतमत्कैङ्कर्य इति; अत्र **एवम्भूत** इति **कैङ्कर्य**विशेषणम् । **उपायतया** इत्यत्र गद्यान्तरोक्तक्रमेण साक्षात् परम्परया वेति भाव्यम् । **अवक्लृप्तम्** - मन्नित्येच्छानियमितमित्यर्थः, मदादेशात्मकैः शास्त्रैर्विहितमिति वा । **समस्तवस्तु**शब्देन प्रस्तुतप्रपत्तिव्यतिरिक्ताः तत्त्वज्ञानपूर्वकाः कर्मयोगादय उपासनपर्यन्ता निवृत्तिधर्माः, तदुपयुक्ताश्चामानित्वाद्यात्मगुणाः सङ्गृह्यन्ते । एतेन **परि**शब्दद्योतित सपरिकरत्यागव्यञ्जनम् ।

एवं पश्चादपि तदर्हता न सम्भवतीति नैराश्यरूपत्यागसिद्ध्यर्थमाह - **अनन्ततद्विरोधिपापाक्रान्त** इति । उपासनादिविरोधित्वात् प्रवृत्तिधर्मोऽप्यत्र **पाप**शब्देन सङ्गृहीतः । **अनन्तमदपचार** इत्यादिभिः पूर्ववत् विशेषापचाराभिभूतत्वस्य पृथगुक्तिः । एकैकवर्गस्य दुस्तरत्वद्योतनाय प्रत्येकमानन्त्यनिर्देशः ।

---

1. भगवद्वचः - इ । 2. प्रकाश्यता - आ । 3. विषयविभागः - अ ।

एतत्कार्य-कारणभूतानादि-विपरीताहङ्कार-विमूढात्मस्वभावोऽपि,
एतदुभय-कार्यकारणभूतानादि-विपरीत-वासना-सम्बद्धोऽपि,
एतदनुगुण-प्रकृतिविशेष-सम्बद्धोऽपि,

श्रु.भा. - एतत् इति - बीजाङ्कुर[1]न्यायात्[1] कार्यकारणभावः । 'अथातो अहङ्कारादेशः' (छां.उ.७-२५-१) [2]इत्याद्युक्त[2] अहङ्कारव्यावृत्यर्थः **विपरीताहङ्कार**शब्दः, **विमूढात्मस्वभावः -** तिरोहितशेषभावः । **उभय**शब्दः पापाज्ञानपरः ।

र.र. - उक्तानां पापानां निदानं भक्तियोगादिप्रतिबन्धे द्वारभूतम् 'अहङ्कारविमूढात्मा' (भ.गी.३-२७) इत्यादिषु प्रसिद्धं पूर्वं **विपरीतज्ञान**शब्दोपात्तेष्वन्यतममाह - **एतत्कार्येति ।** कार्यस्याप्यहङ्कारस्यानादित्वं बीजाङ्कुरन्यायात् प्रवाहरूपेण भाव्यम् । 'अथातो अहङ्कारादेशः' (छां.उ.७-२५-१) इत्याद्युक्तयथावस्थित अहङ्कारात् व्यवच्छेदार्थं **विपरीत**शब्दः, अनहमर्थे अहंत्वाभिमानात्, स्वातन्त्र्यारोपाच्च **विपरीत**त्वम् । **विमूढत्वम्** इह तिरोहितत्वम् । नित्यं प्रकाशमानस्याप्यात्मनस्तिरोहितत्वम् आधेयत्वविधेयत्वशेषत्वादि-धर्माणामनवभासादिति ज्ञापनाय **स्वभाव**शब्दः ।

पापस्याहङ्कारस्य च प्रवाहनिर्वाहकम् **अशेषत** इति पूर्वत्र संक्षिप्तं विशदमनुभाषते - **एतदुभय** इति । **वासनाया** अपि प्रवाहरूपेण **अनादित्वम् ।** यथावस्थिततत्त्वहित[3]पुरुषार्थ[3]-व्यावृत्त्यर्थोऽत्र **विपरीत**त्वोक्तिः । पापस्य वासना पापान्तरारम्भरुचिजनकनिग्रहांशः, अहङ्कारस्य वासना भूयोभूयस्तादृशभ्रमजनकबुद्धिसंस्कारः ।

भगवत्स्वरूपतिरोधानकरीम् इत्याद्युक्तमनुवदति - **एतदनुगुण** इति । **एतत्** शब्देन पूर्वोक्तपापाहङ्कारवासनारूपत्रितयपरामर्शः । अत्रापि कार्यत्वं कारणत्वं च विवक्षितम् । सात्त्विकप्रकृतिव्यवच्छेदाय **विशेष**शब्दः । **संबद्धः -** दृढबद्धः इत्यर्थः । एतच्च मितगद्ये - 'दुर्विवेच' इति पदेन विवृतम् ।

---

1. नयात् - इ । 2. इत्युक्त - इ । 3. 'पुरुषार्थवासना' - अ ।

एतन्मूल-आध्यात्मिक-आधिभौतिक-आधिदैविक-
सुख-दुःख-तद्धेतु-तदितरोपेक्षणीय-विषयानुभव-ज्ञानसङ्कोचरूप-

श्रु.भा. - सुखदुःखतद्धेतु शब्देन [1]भोग्य[1] विषया विवक्षिताः । ज्ञानस्य सङ्कोचः आत्मपरमात्मविषये । **विषयानुभव**रूपः, **ज्ञानसङ्कोचरूपश्च विघ्नः ।**

र.र. - प्रतिसंबन्धस्याभिमतप्रतिबन्धकत्वे द्वारं प्रपञ्चयति - **एतन्मूल** इति । दुःखस्य संसारोद्वेगजनकत्वमपि संभवति । सुखस्य तु संसाररुचिजनकत्वेन विघ्नत्वम् अधिकमित्यभिप्रायेण पूर्वं **सुख**स्योक्तिः । दुःखवत् सुखमपि **आध्यात्मिका**दिभेदेन त्रिविधम् । **आध्यात्मिकम् -** आत्माश्रित अचित्समुदायप्रधानहेतुकम् । तादृशं दुःखं द्विविधम् - शारीरं मानसं चेति । तत्र शारीरम् '[2]शिरो रोगः[2] प्रतिश्यायः' (वि.पु.६-५-३) इत्यादिनोक्तम् । मानसम् 'कामक्रोधभयद्वेष' (वि.पु.६-५-५) इत्यादिना । **आधिभौतिकं** तु 'पशुपक्षिमनुष्याद्यैः' (वि.पु.६-५-७) इत्यादिना । **आधिदैविकं** च 'शीतोष्ण-वात-वर्षाम्बुवैद्युतादिसमुद्भवम्' (वि.पु.६-५-८) इति ।

अत्र **दुःख**शब्दस्य पूर्वकालिकदुःखविषयत्वात् उत्तरत्र दुःखविघ्नगन्धरहितत्वोक्तेः उत्तरकालस्वास्थ्यपरत्वात् तितिक्षायां वा तात्पर्यादविरोधः । त्रिविधमप्येतत् प्रत्येकमवान्तरहेतुस्वरूपवैषम्यादनन्तप्रकारमिति सूचयितुं **तद्धेतु**शब्दः । सुखदुःखहेतवश्च स्वरूपतो बुद्धिविषयतयाऽपि परभक्त्यादिविघ्नाः । **तदितर** इति उपेक्षणीयविशेषणम् । उपेक्षणीयविषयश्च तृणादिः ; तदनुभवोऽपि अब्रह्मात्मकानुभवरूपत्वेन पूर्वोक्त **विपरीतज्ञान-**विशेषतया स्वरूपतः संस्कारतश्च प्राप्तविषयानुभवविरोधी । **ज्ञानसङ्कोचः -** तर्कोपदेश-सहकृतैः शास्त्रैरपि परावरतत्त्वविषययथावस्थितज्ञानप्रसराभावः । **मच्चरणारविन्दयुगल** इति स्वयमुक्तिरिह न दोषाय, ईश्वरस्य यथाभूतार्थशंसिनः सर्वत्र स्वगुणाविष्क्रियादोष-रहितत्वात्, तेनापि चरणयोः स्वाश्रितरक्षणसाधनतया संप्रीतिविषयत्वेन स्तुत्यत्वोपपत्तेश्च ।

---

1. अभोग्य - इ । 2. शिरो यक्ष्मा रोगः - अ ।

मच्चरणारविन्दयुगलैकन्तिकात्यन्तिक-परभक्ति-परज्ञान-
परमभक्ति-विघ्नप्रतिहतोऽपि ;
येनकेनाऽपि प्रकारेण द्वयवक्ता त्वम् ; केवलं मदीययैव दयया ;
निश्शेष-विनष्ट-सहेतुक-मच्चरणारविन्दयुगलैकान्तिकात्यन्तिक-
परभक्ति-परज्ञान-परमभक्तिविघ्नः ;

श्रु.भा. - येन केनाऽपि प्रकारेण इति 'आर्ततया दृप्ततया वा' इति भावः । **केवल**शब्दः आकाङ्क्षिता[1]नुपपत्ति[1]व्यावृत्यर्थः । **एव**कारः कृपायाः पुष्कलकारणत्वपरः । तत्र हेतुः **मदीय**त्त्वम् ।

र.र. - तथा चाहुः - 'तस्य स्वात्मप्रदाने तु साधनं स्वपदद्वयम्', इति । अत्र **परभक्त्यादि**शब्दैः देहपातात् पूर्वभाविनः, पश्चाद्भाविनश्चावस्थाविशेषाः संगृह्यन्ते । **प्रतिहतोऽपि** इत्यन्तेषु **अपि**शब्दैस्त्यागानुवादो द्योत्यते ।

धर्मान्तरनैरपेक्ष्यविशिष्टविधानमपि **द्वयवक्ता** इत्यनेन सूचितम् । न चैतावता प्रपत्तेस्तदविनाभूताङ्गानां वा निवृत्तिः, **शरणमहं प्रपद्ये** इति पूर्वोक्तानुवादत्वेन प्रपत्युपश्लिष्टस्यैव द्वयवचनस्यात्र विवक्षितत्वात् । **येन केनाऽपि** इत्यस्य तु 'आर्तो वा यदि वा दृप्तः', (रा.यु.१८-२८) 'मित्रभावेन संप्राप्तम्', (रा.यु.१८-३) 'विभीषणो वा [2]सुग्रीव[2] यदि वा रावणः स्वयम्', (रा.यु.१८-३५) इत्याद्युक्ताधिकारिविशेषानियमे तात्पर्यम् । 'शरण्यस्य प्रपन्नेष्वादरातिशयादीदृशव्याजमात्रानुभाषणम्,' इति केचित् । एतेन [3]जीव[3]व्यापारनिरपेक्षमोक्षप्रदानादिपक्षश्च निरस्तः ।

इतः परं त्वत्प्रवृत्त्यन्तरमनपेक्षितमित्याह - **केवलम्** इति । **मदीययैव -** नान्यदीयता, न सहकार्यन्तरसापेक्षयेति भावः । **दया**ऽत्र प्रपत्त्युल्लसिता रक्षणेच्छा । प्रपत्तिजनितप्रसादवैशिष्ट्ये सत्यपि सहजदयायाः प्राधान्यमिह सूचितम् । कर्मणां सुखदुःखजननशक्तिवत् तिरोधायकत्वादिशक्तिरपि निवृत्तेत्यभिप्रायेण **निश्शेष**शब्दः । तेन **अशेषतः** इत्युक्तस्यानूक्तिः । हेतुभूतपापादिसद्भावे पुनरपि विघ्न उत्पद्येतेति तत्परिहारार्थमुक्तम् - **सहेतुक** इति । **विघ्नाः** पूर्वोक्ताः ।

---

1. नुताप - इ । 2. धर्मात्मा - अ । 3. जीवगत - अ ।

मत्प्रसादलब्ध-मच्चरणारविन्दयुगलैकान्तिकात्यन्तिक-परभक्ति-परज्ञान-परमभक्तिः; मत्प्रसादादेव साक्षात्कृत-यथाऽवस्थित-मत्स्वरूप-रूप-गुणविभूति-लीलोपकरणविस्तारः; अपरोक्षसिद्ध-मन्नियाम्यता-मद्दास्यैकस्वभावात्मस्वरूपः;

श्रु.भा. - [1]कदाचित्स्वरूपा[1]द्यनुभवव्युपदासाय **विस्तार**शब्दः । एवं नारायणशब्दार्थानुभव उक्तः । तदन्तर्गतजीवस्वरूपाविर्भावमाह - **अपरोक्ष** इति । व्याप्तिधारणा च नियमनान्तर्गते 'प्रशासने गार्गिः' (बृ.उ.५-८-९) 'अन्तःप्रविष्टः' (तै.आर.३-११-२१) इति श्रुतेः । अतः पृथगनुक्तिः । एतेन स्वाधीन[2]प्रवृत्तित्वान्यशेषत्वाद्यशेषत्वभ्रमः[2] फलितः ।

र.र. - एवमनिष्टनिवृत्तिः उक्ता; अथेष्टप्राप्तिं वदन् प्रथमं 'तेषां ज्ञानी' (भ.गी.७-१७) इत्यादिप्रार्थितज्ञानपूर्वकपरभक्त्यादिप्रदानमाह - **मत्प्रसादलब्ध** इति । इह हि **परभक्त्या**दिवचनं तत्पूर्वभाविज्ञानविशेषस्याप्युपलक्षणम् । अत्र [3]प्रसाद[3]शब्दः प्रपत्तिजनितप्रसादनिरस्त[4]प्रतिबन्ध[4]निरुपाधिकसौहार्दपरः ।

एवं - **मत्प्रसादादेव** इति [5]वक्ष्यमाणेऽप्यवधारणेन[5] सहकारिनैरपेक्ष्यं द्योत्यते । **मत्स्वरूप** इत्यादिकमुत्तरखण्डस्थ**नारायण**शब्दार्थः । **विभूति**शब्दोऽत्र नित्यविभूतिविषयः । उपायदशायां शास्त्रविहिततत्तत्स्थानगुणादिपरिच्छिन्नस्वरूपाद्यनुभवात् तद्व्यावृत्त्यर्थं **यथावस्थितविस्तार** शब्दौ; आरोपशङ्कानिवृत्त्यर्थं वा **यथावस्थित** शब्दः । हेत्वभावात् अत्र भ्रमाभावः ।

एवं सर्वविशिष्टपरमभोक्तव्यसाक्षात्कारे नारशब्दार्थस्वस्वरूपाविर्भावमपि स्वाधीन-स्वार्थ-कर्तृत्व-भोक्तृत्व-भ्रमनिवृत्तिपूर्वक-तद्भोक्तृत्वज्ञापनाय पृथगाह - **अपरोक्ष** इति । **नियाम्य**त्वोक्त्या अत्र व्याप्यत्वधार्यत्वे च आकृष्टे, 'अन्तः प्रविष्टः शास्ता जनानाम्', (तै.आर.३-११-२१,२३) 'एतस्य वा अक्षरस्य प्रशासने गार्गि! सूर्याचन्द्रमसौ विधृतौ तिष्ठतः' (बृ.उ.५-८-९) इति श्रुत्यनुसारात् । एतेन 'स स्वराट्' (छां.उ.७-२५-२) इत्युक्तेऽपि मुक्ते पारतन्त्र्यादेरनपायो दर्शितः ।

---

1. काचित्कस्वरूपा - इ । 2. प्रवृत्तित्वाद्यशेषभ्रमव्युदासः - इ । 3. मत्प्रसाद - अ ।
4. प्रतिबन्धक - अ । 5. वक्ष्यमाणेनाप्यवधारणेन - अ ।

मदेकानुभवः; मद्दास्यैकप्रियः; परिपूर्णानवरत-नित्य-विशदतमानन्यप्रयोजन-अनवधिकातिशयप्रिय-मदनुभवस्त्वम्;
तथाविधमदनुभवजनितानवधिकातिशयप्रीतिकारित-अशेषावस्थोचित अशेषशेषतैकरतिरूप-नित्यकिङ्करो भव! ।। १८ ।।
एवम्भूतोऽसि ।। १९ ।।

श्रु.भा. - [1]आत्मीयाभिमाना[1]नुगुण[2]पुमर्थानुभाव्य[2]माह - **मदेक** इति । **एक**शब्देन अनुभाव्यन्तरव्युदासः । विरूपभर्त्रनुभवसाम्यव्युदासाय आह - **मद्दास्सैक** इति । **एक**शब्देन स्वरूपाननुरूपस्वातन्त्र्यस्य अपुमर्थत्वं अभिप्रेतम् ।

तत्कदेत्यत्राह - **एवंभूतोऽसि** इति । कदा इति त्वरा तव **यदा** स्यात्, **तदा** त्वमीदृ[3]गवस्थितोऽसि[3] । अयं हि तव [4]लाभ[4] इत्यर्थः ।

र.र. - **नियाम्यत्वं** चिदचित्साधारणम्; दासत्वं तु चेतनैकनिष्ठम्; तयोः प्रातिस्विकं प्रयोजनमाह - **मदेकानुभवो मद्दास्यैकप्रिय** इति । ऐश्वर्यकैवल्यपुरुषार्थयोरिव स्वनिष्ठतया स्वतन्त्रतया च स्वात्मानुभवप्रसङ्गोऽपि [5]तदा[5] न संभवतीत्यभिप्रायेण **मदेकानुभव**शब्दः । स्वाम्यनुभवप्रधाने स्वानुभवे स्वप्राधान्यगन्धनिवृत्त्यर्थं **मद्दास्यैकप्रिय** इत्युक्तम् । पूर्वोक्तमेवानुभवं परमपुरुषार्थत्वप्रतिबोधाय पूर्ववत् पौष्कल्यादिभिः विशिनष्टि - **परिपूर्ण** इति । तत्प्रयुक्तप्रीतिं तत्परिवाहं च - **नित्यकिङ्करो भवानि** इत्यन्तेन प्रार्थितं प्रयच्छति - **तथाविध** इति ।

ईदृशस्वकैङ्कर्यसाम्राज्ययोग्यतामलभ्यलाभत्वव्यक्त्या सन्तोषार्थमुत्तरकृत्यविधानार्थं च अनुवदति - **एवंभूतोऽसि** इति । प्रकृत्यात्मविवेकात् धार्मिकः, परावरतत्त्वविवेकाद्भागवतः, परावरपुरुषार्थविवेकादनन्यप्रयोजनः, स्वपराधिकारविवेकादनन्यसाधनः, पूर्वोक्तात्, 'अस्तु ते' इत्यनुग्रहविशेषात् प्रमितानुष्ठितभरन्यासः, ततश्च मया स्वीकृतभरः, **नित्यकिङ्करो भव** इति दत्तवरश्च त्वं मुक्तप्रायो आसीत्यर्थः । आख्यातेन 'सन्तमेनम्' (तै.उ.आन.६-१) इत्यवस्था व्यज्यते । यद्वा, **नित्यकिङ्करो भव** इति सत्यसङ्कल्पेनोक्ते, तेन वा [6]स्वेन[6] वा प्रत्याख्यातुमशक्यत्वे निवारकान्तराभावे च तदानीमेव तथाविधात्मानमपश्यतः क्रमात् तत्सिद्धिमाह - **एवम्** इति । एवं भवितुमुपक्रान्तोऽसीत्यर्थः ।

---

1. आत्माभिमाना - इ । 2. पुरुषार्थानुभव - इ । 3. गवस्थोऽसि - इ । 4. महालाभ - इ ।
5. तथा - अ । 6. अन्येन - अ ।

[द्वयार्थचिन्तनसहकृतमन्त्रानुसन्धानयुतयावदायुष श्रीरङ्गवासस्य भगवता लाभः]

आध्यात्मिक-आधिभौतिक-आधिदैविक-दुःख-विघ्न-गन्ध-रहितस्त्वम्,
द्वयमर्थानुसन्धानेन सह सदैवं वक्ता;
यावच्छरीरपातम् अत्रैव श्रीरङ्गे सुखमास्स्व ।। २० ।।

श्रु.भा. - शरीरपातावधिकल्पकालः एवं विनोदेन नेय इत्याह - **आध्यात्मिक** इति । दुःखरूपो विघ्नः । तत्र सङ्गरहितत्वे हेतुमाह - **द्वयम्** इति । **सदैवम्** इति क्षणमात्रं द्वयार्थानुसन्धानाभावे सति तापत्रयस्य अवकाशः स्यात् । [1]अतः[1] निरन्तरानुसन्धानेन तद्विरहः कार्य इति भावः । उपायत्वे द्वयोक्तिरेव अलमितिकृत्वा **वक्तारं मां तारय** इत्युक्तम् । अत्र तु अर्थानुसन्धानं भोगरूपत्वेन उक्तम् । **अत्रैव** इत्युपलक्षणम् । भगवदभिमानतदीय-संबन्धव[2]द्देशविशेषेषु[2] इत्यर्थः । **यावच्छरीरपातं** इति - कियानयं काल इति भावः ।

र.र. - भयावहायां देहेन्द्रियादिदशायां कथं कुत्र च निरपायः कालक्षेप इत्यत्राह - **आध्यात्मिक** इति । अत्रत्योत्कटसुखस्याप्युपलक्षणार्थमिह **दुःखोक्तिः** । श्लोकत्रयाद्युक्तज्ञान-भक्तिशालिनं प्रति प्रातिकूल्याविशेषाद्वा **दुःख**शब्देन सुखस्यापि सङ्ग्रहः । **गन्ध**शब्देन वा तद्विवक्षा । तेन सर्वसाधारणः क्षुदादिर्वाऽभिप्रेतः । दुःखस्य द्वयार्थानुसन्धानं प्रति विघ्नत्वं स्यात्, अतस्तद्राहित्योक्तिः । इह च पूर्णविवेकानामाभिमानिकं दुःखं सुखं च नास्ति । सांस्पर्शिकानां तु प्रारब्धकर्मवशात् संभवतामपि प्रतिदिनं कर्मक्षयमोक्षासक्तिदर्शनप्रीत्या द्वयार्थानुसन्धानविघ्नत्वं नातीवास्ति । अतो न प्रत्यक्षादिविरोधः । **त्वम्** - अनन्यज्ञानभक्त्यादिप्रार्थनावान् ।

उच्चारणं प्राधान्येन स्तोतुमर्थानुसन्धाने **सह**शब्दः । एवम् **अर्थानुसन्धानेन** इत्यन्वयः । **एवम्** - 'अखिलहेय' इत्याद्युक्तविशदप्रकारेणेत्यर्थः । एतच्चात्र [3]कृतकृत्यत्वप्रतिसन्धान[3]-प्रीत्यर्थम्, अस्य च स्वयंप्रयोजनकैङ्कर्यरूपत्वात् । 'यन्मुहूर्तम्' (ग.पु.पू.खं.२२२-२२) इत्यादिन्यायेन भगवदनुभवप्रीत्यनुवृत्त्यर्थं, संभवद्द्वन्द्वतितिक्षार्थं, निर्भरत्वानुसन्धान-रसानुवृत्त्यर्थम्, निषिद्धकाम्यादिसङ्गनिवृत्त्यर्थं च **सदा** इत्युक्तिः ।

---

1. अत एव । 2. द्देशेषु । 3. कृतकृत्यत्वानुप्रतिसन्धान - अ ।

[निरन्तरायतया भगवन्मार्गप्रयाणानुगुणावस्थायाः उत्क्रमणसमये भगवदनुग्रहतः सिद्धिः]

शरीरपातसमये तु,

श्रु.भा. - शरीर इति । केवलं त्वय्यकिञ्चित्करेऽपीति भावः ।

र.र. - इदं तु स्वभावार्थशास्त्रप्राप्ताविरोधेन नेयम्, अन्यथा सर्वप्रमाणविरोधात् । 'तस्य तावदेव चिरं यावन्न विमोक्ष्ये,' (छां.उ.६-१४-२) 'प्रारब्धमात्रं [1]भुक्त्वाऽत्र[1] तत्त्ववित् सुखमाप्नुयात्', (पाञ्चरात्रम्) 'प्रारब्धमेव भोक्तव्यं कर्मब्रह्मविदामपि,' (पाञ्चरात्रम्) 'अनारब्धकार्ये एव तु पूर्वे तदवधेः' (ब्र.सू.४-१-१५) इति दर्शितः प्रक्रान्तकर्मफलभोगोऽपि प्रपन्नस्य यथाभिलाषं प्रपत्त्युत्पत्तिशरीरावधिरित्यभिप्रायेणाह - **यावच्छरीरपातम्** इति । आर्तितारतम्या[2]दत्र[2] स्थितितारतम्यम् । **अत्रैव** - अत्यन्तासन्नमत्सेवानुगुणे, न तु मत्कैङ्कर्यविरुद्धदेशेष्वित्यर्थः । अत्र अनेकपुराणादिप्रसिद्ध श्रीरङ्गोपादानं भागवताभिमत-स्वयंव्यक्तादिभगवत्क्षेत्रान्तराणामप्युपलक्षणम् । **सुखमास्स्व** - कृतकृत्यत्वप्रतिसन्धानेन प्रतिदिनं कर्मक्षयदर्शनेन अविलम्बितानायासपरमपुरुषार्थलाभव्यवसायेन विषमधुकल्प-वैषयिकरसवैमुख्यहेतुभूतद्वयार्थानुसन्धानसारस्येन च सन्तुष्टो वर्तस्वेत्यर्थः । स चायमत्रत्य-सेवासौकर्यार्थ उपदेशः; सुखी भवेतिवदनुग्रहोक्तिर्वा । एवमर्थानुसंधानद्वयवचनसुखासिकाभिः मनोवाक्कायानामयोग्यव्यापारनिवृत्तिरपि स्यात् ।

भवत्वेवं कृतकृत्यस्योत्तरकृत्यं फलम् । देहपातदशा कीदृशी? परमफलं च कदा? इत्याकाङ्क्षायां प्रारब्धशरीरानुवर्तकप्रतिबन्धनिवृत्तौ दयार्णवस्य दिव्यशक्तेः स्वस्य पूर्वकृतरक्षासङ्कल्पानुगुणमन्यैरनिवार्यमुत्तरकृत्यमाह - **शरीरपातसमये** इति । 'वाङ्मनसि' (छां.उ.६-८-६) इत्यादिश्रुतिसिद्धाय मनःसंपत्तेः पूर्वावस्थायामित्यर्थः । एतेन 'निशि नेति चेत् न' (ब्र.सू.४-२-१८) इत्याद्युक्तः कालनियमाभावश्च सूचितः 'ततस्तं म्रियमाणं तु' (वरा.च.श्लो.) इतिवत् । अत्र **तु**शब्दोऽधिकार्यन्तराद्विशेषमनुग्रहकार्यं द्योतयति । यद्वा, काष्ठपाषाणसंनिभतया स्वेन वा परैर्वा तदानीं प्रबोधस्य दुःसंपादत्वम् । एवं **तु**शब्दद्योतितमेव विशेषं व्यनक्ति - **केवलं** इत्यादिना ।

---

1. मात्रभुक् - अ । 2. दत्रत्य - अ ।

केवलं मदीययैव दयया अतिप्रबुद्धः, मामेवाऽवलोकयन्, अप्रच्युतपूर्वसंस्कारमनोरथः,

श्रु.भा. - दयया एवेति एवकारः पुष्कलत्वद्योतकः । **अतिप्रबुद्धः -** जीवद्दशायां प्रबोधः अन्धतमसस्थानीय इति भावः । परमात्मनि विश्रमानन्तरं भाव्ययं प्रबोधः, ततः प्राक्तनं स्मरणम्, अन्तिममुपासकानाम् अपेक्षितम् । प्रपन्नन्तु 'काष्ठपाषाणसन्निभम्' (वरा.च.श्लो.) भगवानेव स्मरति । स्वस्मिन् विश्रमानन्तरं प्रबोधं च जनयति । 'तेन प्रद्योतेनैष आत्मा निष्क्रामति' (बृ.उ.६-४-२) इति हि श्रूयते । अतः तदा बोधसिद्धिः । **माम् -** स्वरूपरूपगुण-विभवान्वितम् एव इति विषयान्तरकालुष्यविरह उक्तः । **अवलोकयन् -** साक्षात्कुर्वन् । **अप्रच्युत** इति गुरूपदेशादिजन्यसंस्कारः । भगवत्प्राप्तीच्छा च अप्रच्युते यस्य स तथोक्तः ।

र.र. - केवलं - पूर्वाभ्यासानपेक्षम्, 'यं योगिनः' (म.भा.शां.४६-१३९) इत्याद्युक्ततादात्विक-स्वयत्ननिरपेक्षं च । **मदीययैव** मत्स्वभावभूतयैव, [1]नान्यदीयया,[1] नापि पूर्वोक्तक्षेत्रवासद्वयार्थानुसन्धानजन्यया, न च तादात्विकप्रार्थनासापेक्षायेत्यर्थः । **अतिप्रबुद्धः -** शरीरपातात् पूर्वकाल इव ज्ञानपौष्कल्यवान् । यद्वा, न केवलं सङ्कोचाभावमात्रम्, किन्तु प्रत्यूषप्रकाशकल्पपूर्वावस्थातोऽतिशयोऽपि स्यादित्यर्थः । अपरिच्छिन्नस्तु प्रबोधो विशिष्टदेशगत्यनन्तरभावी । अन्तिमदशायाम् आदिभरतादिवदन्यदर्शनं तव न स्यादित्याह - **मामेवावलोकयन्** इति । नित्यमनुचिन्तनं मामेव शुभाश्रयविग्रहविशिष्टं विशदमनुसंदधान इत्यर्थः । अविच्छिन्नसाक्षात्कारं कुर्वन्निति वा, तदानीमवलोकनीयं सर्वं भगवदपृथक्सिद्धतयैव भातीति वा अवधारणस्याभिप्रायः ।

एवं ज्ञानदर्शने प्रोक्ते; अथ वक्ष्यमाणायाः प्राप्तेः पुरुषार्थत्वाय तदिच्छानुवृत्तिमाह - **अप्रच्युत** इति । भगवानेव मे परमप्राप्य इति शास्त्रजन्यानुभवसंस्कारस्य कालविप्रकर्षकाय-विश्लेषक्लेशादिभिः प्रच्युतिः न भविष्यति; तत एव संस्कारमूलः प्राप्तिमनोरथोऽपि तदानीं [2]भवतस्त्यज्य[2]मानेषु देहतदनुबन्धिषु रागाद्वा, किं भविष्यतीति भयाद्वा न [3]प्रच्यवत[3] इति भावः । **अतिप्रबुद्धः -** इत्यादिभिः परभक्त्यादित्रयं वा, परमात्मनि विश्रमादनन्तरभाविप्रबोधादिकं वा विवक्षितमिति केचित् ।

---

1. नान्यदीयता - अ । 2. भवतस्त्याज्य - अ । 3. प्रच्युत - आ ।

जीर्णमिव वस्त्रं सुखेन, इमां प्रकृतिं स्थूलसूक्ष्मरूपां विसृज्य,

र.र. - लब्धनूतनशुभवस्त्रान्तरस्य जीर्णवस्त्र इव अत्यासन्नदिव्यदेहलाभस्य चिरपरिचितेऽपि भोगायतने जिहासोत्पत्तिमनायासहानप्रीतिं च निदर्शयति - **जीर्णमिव वस्त्रम्** इति । 'कृतकृत्याः प्रतीक्षन्ते', (इति.स.६-३७) 'नोपजनं स्मरन्निदं शरीरम्' (छां.उ.८-१२-३) इत्यादिभिः अभिप्रेतं लब्धपरित्यागक्लेशाभावम्, यमकिङ्करादिभयाभावम्, चिकित्सकशल्यप्रयोगन्यायशङ्कितोत्क्रमणदुःखाभावम्, अत्यासन्नपरमपुरुषार्थानुसन्धानहार्दानुग्रहतादात्विकभगवदनुभवातिवाहिकदर्शनजनित[1]हर्षप्रकर्षं[1] च अभिप्रेत्याह - **सुखेन** इति । **इमाम् -** अनाद्यनुवृत्तां भगवत्स्वरूपतिरोधानादिभिरपकारिणीं कारागृहनरकादिवत् अनुसंहितां दुरत्ययां मदन्यैः त्याजयितुमशक्यां चेति भावः । **प्रकृतिम् -** सततविकारशीलं त्रिगुणद्रव्यम् । उत्क्रान्तिपादे च अर्चिरादिपादे चोक्तं सर्वमभिप्रेत्याह **स्थूलसूक्ष्मरूपां विसृज्य** इति । स्थूलप्रकृतित्यागोऽत्रैव; सूक्ष्मप्रकृतित्यागस्तु -

'त्रिभावभावनातीतो मुक्तये योगिनां नृप! ।
देवयानं परः पन्था योगिनां क्लेशसंक्षयः' ।। (वि.पु.६-७-७६)

इत्याद्युक्त[2]देवपथेन[2] दिव्यदेशगमनदशायामेव भवति । 'एष सम्प्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसंपद्य', (छां.उ.८-३-४) 'स एवं विद्वानस्माच्छरीरभेदादूर्ध्वमुत्क्रम्य अमुष्मिन् स्वर्गे लोके सर्वान् कामान् आप्त्वा अमृतः समभवत्' (ऐ.उ.४-६) इत्यादिषु ब्रह्मप्राप्तिपर्यन्त अभिधानात् तिरोधायकसूक्ष्मप्रकृतिविश्लेषोऽप्यभिप्रेतः । सुबालोपनिषदि तु - 'अपुनर्भवाय नाड्या कोशं भिनत्ति', (सु.उ.११-२) 'कोशं भित्त्वा शीर्षकपालं भिनत्ति', 'शीर्षकपालं भित्त्वा पृथिवीं भिनत्ति', इत्यारभ्य 'अक्षरं भित्त्वा मृत्युं भिनत्ति' (सु.उ.११-२) इत्यन्तेन स्थूलशरीरत्यागपूर्वकतमःपर्यन्तसर्वतत्त्वातिक्रम उक्तः ।

तदेवंक्रमेण सूक्ष्मप्रकृतिविमोक्षानन्तरं स्वस्यैव प्रसादेन अविलम्बितमनोरथपूर्तिमाह - **तदानीमेव** इति ।

---

1. हर्षं - अ । 2. देवयानपथेन - अ ।

तदानीमेव मत्प्रसादलब्ध-मच्चरणारविन्दयुगलैकान्तिकात्यन्तिक-परभक्ति-परज्ञान-परमभक्तिकृत-परिपूर्णानवरत-नित्य-विशदतम-अनन्यप्रयोजनानवधिकातिशय-प्रियमदनुभवजनित-अनवधिकातिशय-प्रीतिकारिताशेषावस्थोचिताशेष-शेषतैकरतिरूप नित्यकिङ्करो भविष्यसि! ।। २१ ।।

[शरणागतस्य शरण्यविषये नैर्भर्यम्]

मा ते भूदत्र संशयः ।। २२ ।।

श्रु.भा. - तदानीमेव - प्रकृतिं [1]विमोक्षा[1]नन्तरमेव । उपरि पूर्ववत् । इदमाश्वासनवाक्यमिति न संशयितव्यम् इत्याह **मा ते भूत्** इति ।

र.र. - अपेक्षणीयान्तराभावात् न विलम्ब इति भावः । **प्रसाद** इह तिरोधायकांशपर्यन्तस्य निग्रहरूपकालुष्यस्य निःशेषनिवृत्त्या सूरिष्विव स्वभावत एवावस्थितं सौहार्दम्; तच्चात्र निर्दुःखनित्यनिरतिशयानन्दमनुभवत्वसावितीच्छैव । अत्र तावदस्ति क्षुद्रफलेष्वप्युपाय-गौरवम्; मोक्षे तु - 'अनेकजन्मसंसिद्धिः,' (भ.गी.६-४५) 'क्लेशेन महता सिद्धैः,' (लघुतन्त्रम्) 'क्षपयित्वाऽधिकारान् स्वान् शश्वत् कालेन भूयसा' (ल.तं.१७-१८) इत्यादिभिः कृच्छ्रसाध्यतयोक्ते 'विधिशिवसनकाद्यैर्ध्यातुमत्यन्तदूरम्' (स्तो.र.४७) गुरूपायसाध्ये न्यासमात्रनिष्ठस्य मादृशस्य निर्यत्नलब्धिवचनमुपच्छन्दनमिति केषाञ्चिच्छङ्का जायेत, अतस्तान् विस्रम्भयितुं भाष्यकारमपदिश्याह - **मा ते भूदत्र संशय** इति । ननूपायलाघवप्राप्यगौरवादि-निमित्तशङ्काविधूननेन महाविश्वासपूर्वकं शरणमुपगतस्य संशयप्रसङ्गाभावादत्र तत्प्रतिषेधो निरर्थकः? मैवम्; तादात्विकमहाविश्वासेनोपाये निष्पन्नेऽपि तस्य फलाविनाभावेऽपि केषाञ्चित् प्रारब्धकर्मविपाकवैचित्र्यात् संशयोऽपि संभवति; न च तेनोपायवैकल्यम्, फलप्रतिबन्धो वा । मतिकालुष्यनिवृत्तिस्तु अत्रत्यपरभक्त्यादिवत् स्वयं पुरुषार्थः; अतः प्रसन्नेन भगवता संशयनिवर्तनमुपपद्यत इति । यद्वा, यावत्फललाभं विमर्शदशायामक्षोभणीयो विश्वासो महाविश्वासः, स च तात्कालिक उपायाङ्गम्; पश्चात्तु मदभिप्रायं मद्वाक्यं च परामृशतां मदनुग्रहादेव संशयो न भवत्येवेति ज्ञापनार्थमिह - **मा ते भूत्** इत्यादि । **निःसंशयः** इत्यन्तमुच्यते इति । **ते -** निश्चितशास्त्रार्थस्य सर्वसुहृदि [2]सर्वशक्तौ[2] मयि न्यस्तभरस्य च । **अत्र -** मत्प्रयोजनप्रधानायां मन्नित्यकिंकरत्वप्राप्तौ ।

1. विमोका - आ । 2. सर्वशक्तौ च - आ ।

'अनृतं नोक्तपूर्वं मे न च वक्ष्ये कदाचन' । (रा.कि.७-२२)
'रामो द्विर्नाभिभाषते' (रा.अयो.१८-३०)
'सकृदेव प्रपन्नाय तवाऽस्मीति च याचते ।
अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम' ।। (रा.यु.१८-३३)
'सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः' ।। (भ.गी.१८-६६)
इति मयैव ह्युक्तम् ।। २३ ।। अतस्त्वं तव तत्त्वतो

श्रु.भा. - अनृतस्यानुक्तत्वमाह - **अनृतम्** इति । उक्तस्य दृढत्वमाह - **रामो द्विः** इति । न केवलं तव । अन्येषामपि मयोक्तमिति आह **सकृत्** इति । अवतारद्वयेऽपि वचनद्वयम् ।

र.र. - यद्येतदुपच्छन्दनम्; तदा मे स्ववचनविरोधः स्यादित्यभिप्रायेणाह - **अनृतं नोक्तपूर्वं मे** इति । इयमनृतानुक्तिराश्रितविषया, आसुरेषु प्रतारणदर्शनात् । अनुक्तपूर्वमप्यनृतं पश्चात् स्वातन्त्र्यादुच्येतेत्यत्राह - **न च वक्ष्ये कदाचन** इति । इतः पूर्वमिवेति भावः ।

इदमपि त्वद्वाक्यतया पूर्ववदाशङ्कनीयमित्यत्र 'सत्यवादी च राघवः,' (रा.अयो.२-३३) इति प्रसिद्धं लोकोक्तिच्छायया स्वयमेवाह - **रामो द्विर्नाभिभाषते** इति । स्वोक्तविरुद्धं नाभिभाषत इत्यर्थः । मम सकृदुक्त्यैवार्थिनामपेक्षितार्थः सिद्ध्येदिति वा तात्पर्यम् । एवं सामान्यतः प्रत्यायितस्य प्रकृतपर्यवसानाय रावणानुजपरिग्रहे पार्थोपदेशपर्यवसाने च विशेषत उक्तं श्लोकद्वयमाह - **सकृदेव** इति, **सर्वधर्मान्** इति च । वेदवैदिकवाक्यमात्रातिशायिनोरनयोः शरण्यवाक्ययोरर्थं तदधिकारयोरभिधास्यामः । इदं मोक्षप्रदानोत्सुकेन मयैवोक्तम्; न तु मदादेशभूतदुरधिगमार्थवेदमुखेन वा संभवद्भ्रमादिदोषपुरुषान्तरमुखेन वेत्याह - **मयैव ह्युक्तम्** इति । **हि** प्रसिद्धौ, हेतौ वा ।

उक्तमेव स्थिरीकरणार्थं सन्तोषातिशयार्थं च निगमयति - **अत** इति । **अतः** सत्यवादिना सत्यव्रतेन मयोक्तस्य वाक्यस्य विश्वसनीयतमत्वात् । **त्वम्** - प्रामाणिकः । **तव** - 'ये प्रपन्ना महात्मानस्ते मे नयनसंपदः' (पाञ्चरात्रम्) इति मत्प्रशंसनीयस्य, मत्स्वीकृतभरस्य च । **तत्त्वतः** - संशयविपर्ययराहित्येन ।

मज्ज्ञानदर्शनप्राप्तिषु
निस्संशयः, सुखमास्स्व! ।। २४ ।।
[[१]तृणीकृतविरिञ्चादि निरङ्कुशविभूतयः ।
रामानुजपदाम्भोजसमाश्रयणशालिनः ।। २५ ।।]

श्रु.भा. - अतः भक्तिसाध्यं प्रपत्त्यैव लभ्यमिति निर्भरेण त्वया भवितव्यमित्याह - **अतस्त्वम्** इति । आचार्यतो लब्धं ज्ञानं यथा तत्त्वविषयमिति **- न संशयः,**

र.र. - मज्ज्ञानदर्शनप्राप्तिषु, यथायोगमत्र परत्र च अपेक्षितास्विति शेषः ।

'निस्संशयेषु सर्वेषु नित्यं वसति वै हरिः ।
ससंशयान् हेतुबलान्नाध्यावसति माधवः' ।। (म.भा.शां.३५९-७१)

इत्यादिप्रमाणसूचनायाह - **निःसंशय** इति । सिद्धस्यैव ज्ञानस्य अनुवृत्तौ संशय इह निवार्यते । अनेनैव निर्भरत्वादिकमप्याकृष्यते । **सुखमास्स्व -** आध्यात्मिकेत्यादिना पूर्वं मयोक्तमेव तवोचितमिति भावः ।

यावच्छरीरपातम् इति [1]पूर्वोक्तस्यानुक्तेरयम्[1] अभिप्रायः - मत्प्राप्तेः प्रारब्धकर्म-प्रतिनियतायुरवसाननिर्बन्धो नास्ति; यावदत्रत्यमदनुभवापेक्षा तावदत्र सुखमास्स्व; परिपूर्णानुभवालाभादिह सुखासिकायामप्युद्वेगे सति आयुःशेषशृङ्खलामप्यपोह्य आत्यन्तिकमत्कैङ्कर्याय मत्पदं गमिष्यसि - इति ।

एतेन अनादिकालमाज्ञातिलङ्घनमूलभगवदप्रसादेन संसरतो मे भगवत्कृपामूल-सदाचार्याङ्गीकारेण द्वयोच्चारण अनूच्चारणपूर्वक स्वरक्षाभरन्यासे सिद्धे, प्रसादनेषु अस्मादभ्यधिकस्याभावात् स्वीकृतभरः श्रियःपतिः नारायणः कालत्रयवर्तिनः सर्वान् अप्रसादहेतून् यथार्हं क्षान्त्वा, स्वयमेव स्वार्थमेव मां स्वज्ञानदर्शनप्राप्त्यादिप्रदानेन रक्षेदिति विश्वस्तो निर्भरो निर्भयः सन्तुष्टो [2]भवेति[2] निगमितं भवति ।।

---

१. मन्दिरे पारायणकाले एषः अनुसन्धीयते ।
1. पूर्वोक्तस्यात्रानुक्तेरयम् - अ । 2. भवेदिति - अ ।

[भगवति अन्त्यकालिकस्मृतिप्रार्थना]

अन्त्यकाले स्मृतिर्या तु तव कैङ्कर्यकारिता ।
तामेनां भगवन्! अद्य क्रियमाणां कुरुष्व मे ।। २६ ।।

।। इति श्रीभगवद्रामानुजविरचितं शरणागतिगद्यं समाप्तम् ।।

तथा भाविन्योर्दर्शनप्राप्तोरपि **निस्संशय** इत्यर्थः ।।

।। इति श्रीहारीतकुलतिलकस्य श्रीरङ्गराजदिव्याज्ञालब्ध-श्रीवेदव्यासभट्टारकापरनामधेयस्य श्रीमत्सुदर्शनाचार्यस्य कृतिषु श्रुतप्रकाशिकाभिधानं शरणागतिगद्यव्याख्यानं सम्पूर्णम् ।।

।। श्रीमते रामानुजाय नमः ।।

इति शरणागतिगद्यं यतीशरङ्गेशसंलपनरूपम् ।
व्यवृणुत देशिकदृष्ट्या विमृश्य निश्चित्य[1]वेङ्कटेशकविः[1] ।।

वितमसि निगमान्ते बिभ्रता देशिकत्वं
कृतिभिरनुमतेन क्षेमबुद्ध्या मयैवम् ।
यतिपतिपृथुगद्यव्याक्रियायां यथावत्
कथितमकथितं च क्षम्यतां नः सयूथ्यैः ।।

।। इति रहस्यरक्षायां पृथु[2]गद्याधिकारः प्रथमः[2] ।।


।। श्रीमते रामानुजाय नमः ।।

1. वेङ्कटकविः - आ । 2. गद्याधिकारः - अ ।

श्रीः

श्रीमते रामानुजाय नमः

श्रीमन्! नारायण! पुरुषोत्तम!



✻ श्रीरङ्गनाथ! मम नाथ! नमोऽस्तु ते ✻

श्रीधराय नमः

श्रियै नमः

श्रीमते रामानुजाय नमः

श्रीभगवद्रामानुजविरचिते गद्यत्रये

श्री र ङ्ग ग द्य म्

[चिदचित्परतत्त्वानां तत्त्वयाथात्म्यवेदिने ।

रामानुजाय मुनये नमो मम गरीयसे ।।]

श्रीवेदान्तदेशिकप्रणीतं मितगद्याधिकारनामकं

श्रीरङ्गगद्यव्याख्यानम्

श्रीमल्लक्ष्मणमुनिना शिष्यहितैकाग्रचेतसा कथितम् ।

[1]मितगद्यममितसारं[1] व्यक्तं व्याख्याति वेङ्कटेशकविः ।।

अत्र द्वयार्थानुसन्धानरसिकेन भगवता भाष्यकारेण बृहद्गद्ये व्याख्यातमपि द्वयम्, 'बहुधा श्रोतव्यम्', इति मन्यमानेभ्यः शिष्येभ्यः पुनरप्याकिञ्चन्यादिप्रपञ्चनपूर्वकस्वानुष्ठानप्रकाशनप्रक्रिययैव संक्षेपेण व्याक्रियते ।

तथा हि - अत्रादिमं वाक्यं उत्तरखण्डस्य विवरणम्; द्वितीयं पूर्वखण्डस्य । तेनैवाधिकारविशेषः कार्पण्यरूपं अङ्गं च [2]प्रदर्शितम्[2] । तृतीयं तु महाविश्वासाद्यङ्गान्तरज्ञापकम् । अनन्तरं श्लोकद्वयानुपठनेन पूर्वोक्त एवार्थः प्रमाणतः प्रतिष्ठाप्यते । ततः परेण वाक्येन पूर्णप्रपत्यकुशले जनेऽपि तत्पूरणानुगुणप्रपत्तिवाक्योच्चारणवैभवं ख्याप्यते । तत्सिद्ध्यर्थं पश्चाच्चतुर्दशभिः सम्बुद्धिभिर्नारायणशब्दोक्ताः शरण्याकारविशेषाः प्रकाश्यन्ते । **'नमोऽस्तु ते'** इत्यनेन तु प्रकृतोपाये प्रधानभूतो भरन्यासांशः, फलप्रार्थनं वा निगद्यत इति विभागः ।

---

1. मितगद्यममृतसारं - अ । 2. प्रदर्शितं भवति - अ ।

[भगवद्दिव्यगुणानुसन्धानपूर्वकं तदनुगुणस्वभावाविर्भावतः स्वस्य भगवति नित्यकैङ्कर्यलाभप्रार्थना]

स्वाधीन-त्रिविधचेतनाचेतन-स्वरूप-स्थिति-प्रवृत्ति-भेदम्,

र.र. - स्वाधीनेत्यादि - इह च प्रथमं सविभूतिकस्य भगवतः परमप्राप्यत्वादिसिद्ध्यर्थं चतुर्थ्यन्तपदप्रदर्शितं सर्वेश्वरत्वादिकमाह - **स्वाधीन** इति । **स्व**शब्देन मुक्तप्राप्यस्य कैङ्कर्योद्देशस्य सर्वेश्वरस्य श्रुत्यादिप्रसिद्धं निरतिशयानन्दत्वादिकं सूच्यते । **स्वाधीन**शब्देन भगवत्स्वरूपाधीनत्वं, तदिच्छाधीनत्वं च विवक्षितम् । सर्वस्य साक्षात् परम्परया वा तदाश्रिततया तत्स्वरूपाधीनत्वम् । तत्र नित्यानां पदार्थानां तदिच्छाधीनस्वरूपत्वं तदभावे तेषामभावः प्रसजेदिति प्रसङ्गमुखेन स्थाप्यम् । तदभिप्रायेण हि आहुः -

'इच्छात एव तव विश्वपदार्थसत्ता
नित्यं प्रियास्तव तु केचन ते हि नित्याः ।
नित्यं त्वदेकपरतन्त्रनिजस्वरूपा
भावत्कमङ्गलगुणा हि निदर्शनं नः' ।। (वै.स्त.३६) इति ।

अभाषि च शारीरकान्ते - 'परमपुरुषभोगोपकरणस्य लीलोपकरणस्य च नित्यतया शास्त्रावगतस्य', 'परमपुरुषस्य नित्येष्टत्वादेव तथाऽवस्थानमस्तीति शास्त्रादवगम्यते' (श्री.भा.४-४-२०) इति । अनित्यानां तु तदिच्छाधीनस्वरूपत्वं तदायत्तोत्पत्तिकतया हि प्रसिद्धम् । गुरुद्रव्याणां पतनप्रतिबन्धेन धार्यत्वमपि तदिच्छाधीनत्वविशेष एव । **चेतन**शब्दः इह जीवविषयः; बद्धमुक्तनित्यरूपेण जीवानां त्रैविध्यम् । **अचेतन**शब्दश्चात्र अचिद्द्रव्यपरः । त्रिगुणकालशुद्धसत्वरूपेण **अचेतन**त्रैविध्यम् । द्रव्याणां तदधीनत्वोक्त्या तत्तद्धर्माणां तादधीन्यं कैमुत्यसिद्धमिति तदनुक्तिः । अचेतनद्रव्यस्यापि धर्मभूतज्ञानस्य चेतनग्रहणे विशेषणतयोपात्तत्वादत्र पृथगनुपादानम् । चेतनमात्रे वा त्रैविध्यान्वयः । चेतनाचेतनानां **स्वरूपं** स्वासाधारणस्वभावैर्निरूप्यं धर्मि, तस्य भेदः तत्तद्व्यक्तितो वर्गतश्च परस्परव्यावृत्तिरूपो धर्मः । **स्थितिः -** कालान्तरेऽपि विद्यमानता; सा च द्रव्याणां स्वरूपेण सर्वकालानुवृत्तिरूपा । तेषां तत्तदवस्थाविशिष्टवेषेण तु कालपरिच्छिन्ना कालतारतम्यवती चेति तद्भेदः । **प्रवृत्तिः -** व्यापारः । निवृत्तिरप्यकरणसङ्कल्परूपा प्रवृत्तिविशेषः । एतद्भेदः तत्तत्कार्यादिभिर्द्रष्टव्यः ।

क्लेश-कर्माद्यशेषदोषासंस्पृष्टम्,
स्वाभाविकानवधिकातिशय-ज्ञान-बलैश्वर्य-वीर्य-शक्ति-तेजः-

र.र. - अत्र स्वेच्छाधीनसर्वत्वोक्त्या स्वार्थसर्वोपादातृत्वसूचनात् सर्वशेषित्वमपि सिद्ध्यति । तदाहुः - 'उपादत्ते सत्तास्थितिनियमनाद्यैश्चिदचितौ, स्वमुद्दिश्य श्रीमानिति वदति वागौपनिषदी' (श्रीरं.स्त.२-५७) इति । एवं भगवतः सर्वाधारत्वादिव्यञ्जनात् तदन्येषां चेतनाचेतनद्रव्याणां तं प्रति आधेयत्वविधेयत्वशेषत्वनियमेन तदपृथक्सिद्धविशेषणतया तच्छरीरत्वं श्रुतिसिद्धं मुख्यमेव स्थापितं भवति । अत्र च कारणवाक्यार्थः, धर्मधर्मिभेदः, चिदचिद्भेदः, जीवेश्वरभेदः, जीवानामन्योन्यभेदः, तेषां ज्ञातृत्वम्, तत एव कर्तृत्वभोक्तृत्वे, ज्ञातृत्वादेः सर्वथा पराधीनत्वम्, परस्य च विभूतिद्वयवत्त्वम्, सार्वत्रिकत्रैकालिकसर्वनियन्तृत्वं त्रिविधपरिच्छेदराहित्यम्, कालपरमव्योम्नोस्त्रिगुणविकारातिरिक्तत्वम्, प्राज्ञानधिष्ठित-प्रकृतिकारणत्वनिरासादिकं च शारीरकस्थापितमर्थसिद्धम् ।

अथ भगवत उक्ताकारान्तर्गतसर्वकारणत्वसर्वनियन्तृत्वादिभिः शङ्कितान् दोषान् परिहरति - **क्लेशकर्म** इति । 'अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्च क्लेशाः' (यो.सू.२-३) । 'पुण्यापुण्यरूपं कर्म' (यो.भा.२-१२) । **आदि**शब्देन 'क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः' (यो.सू.१-२४) इत्यादिप्रसिद्धविपाकादिसंग्रहः । जात्यायुर्भोगादयो विपाकाः । पूर्वानुभवभाविता आफलोदयं शयानाः संस्कारा आशयाः । कतिपयदोषरहितव्यावृत्त्यर्थम् **अशेष**शब्दः । **असंस्पृष्ट**शब्देन स्वभावतोऽनर्हतया कदाचिदपि दोषस्पर्शो नास्तीति विवक्षितम् । एवं पदद्वयेन 'परः पराणां सकला न यत्र क्लेशादयः सन्ति परावरेशे' (वि.पु.६-५-८५) इत्यस्यार्थ उक्तः ।

स्वाभाविकेत्यादि - अथ 'तेजोबलैश्वर्य' (वि.पु.६-५-८५) इत्यादिभिरुक्तान् निरूपितस्वरूपविशेषकधर्मानाह - **स्वाभाविक** इति । **स्वाभाविक**त्वमिह नित्यत्वम्, अनन्याधीनत्वं च । तेन नित्यानां मुक्तानां च ज्ञानादिभ्य एतज्ज्ञानादेर्व्यवच्छेदः । तद्बलादिभ्यो व्यवच्छेदस्तु अनवधिकातिशयत्वादपि । स्वापेक्षया उत्कृष्टावधिरहितोऽतिशयो येषां ते **अनवधिकातिशयाः । ज्ञानम्** इह सर्वविषयनित्यसाक्षात्काररूपम् । **बलम्** - अनाघ्रातश्रमप्रसङ्गं सर्वधारकत्वम् । **ऐश्वर्यम्** - सर्वनियन्तृत्वम् । **वीर्यम्** - सर्वोपादानत्वादावपि अविकृतस्वभावत्वम् । **शक्तिः** - विश्वोपादानतार्हत्वम्, स्वेतरसर्वदुर्घटनशक्तिर्वा ।

सौशील्य-वात्सल्य-मार्दवार्जव-सौहार्द-साम्य-कारुण्य-माधुर्य-गाम्भीर्य-औदार्य-चातुर्य-स्थैर्य-धैर्य-शौर्य-पराक्रम-सत्यकाम-सत्यसङ्कल्प-कृतित्व-

र.र. - तेजः - अस्वाधीनसहकारिनिरपेक्षत्वम्; पराभिभवनसामर्थ्यं वा । अत्र व्यूहव्यक्त्यादिक्रमेण ज्ञानबलादिद्वन्द्वत्रिकनिर्देशः । षाड्गुण्यस्य प्रथममुपादानम्-अन्येषां गुणानां तदन्तर्भावेन तत्प्राधान्यात् परत्वज्ञापकत्वात् आश्रितानाश्रितगोचरव्यापारभेदसाधारण्याच्च ।

अथ षाड्गुण्यविततिरूपाः सौलभ्यज्ञापकाः संश्रितसङ्ग्रहणादौ विशेषत उपयुक्ता गुणाः उच्यन्ते । अत्र **सौशील्यम्** - महतो मन्दैस्सह नीरन्ध्रसंश्लेषरसिकता । **वात्सल्यम्** - आश्रितेषु दोषतिरस्कारिणी प्रीतिः । **मार्दवम्** - अकठिनस्वभावतया सुप्रवेशत्वम्, दण्डनीयेष्वपि सामप्रधानत्वं वा । **आर्जवम्** - कायवाग्बुद्धिव्यापाराणां परस्परमविसंवादित्वं । **सौहार्दम्** - स्वतः सर्वहितैषित्वम् । **साम्यम्** - सर्वैरप्याश्रयणीयत्वे समत्वम्, स्वतोऽपक्षपातित्वम् वा । **कारुण्यम्** - स्वप्रयोजनान्तरानुद्देशेन परदुःखनिराचिकीर्षा । **माधुर्यम्** - उपायदशायामपि रञ्जकत्वेन रसावहत्वम्, द्विषतां जिघांसितानामपि दृष्टिचित्तापहारित्वं वा । **गाम्भीर्यम्** - भक्तानुग्रहादेरगाधत्वम्, आश्रितदोषदर्शनादेः सतोऽपि गोपनेन दुर्ग्रहत्वं वा । **औदार्यम्** - पात्रलाघवदेयगौरवप्रत्युपकाराद्यनादरेण वितरणशीलत्वम् । **चातुर्यम्** - शुभाश्रयप्रकाशनाद्य-यत्नोपायैर्विमुखवशीकरण-विस्रम्भजनन-संश्रितदोषाच्छादन-विरुद्धानुकूलीकरणादिषु कुशलत्वम् । **स्थैर्यम्** - शरणागतसङ्ग्रहे दोषप्रदर्शकैः सुहृद्भिरप्यकम्पनीयत्वम् । **धैर्यम्** - अभिमतवियोगप्रसङ्गेऽप्यभग्नप्रतिज्ञत्वम् । व्यत्ययेन वा **स्थैर्यधैर्य**योर्व्याख्यानम् । प्रबलप्रतिपक्षोपनिपातेऽपि सावज्ञदृढचित्तत्वं वा **धैर्यम्** । **शौर्यम्** तु भीमेष्वपि परसैन्येषु असहायस्यापि स्वसैन्येष्विव निर्भयप्रवेशसामर्थ्यम् । तत्र प्रविष्टस्य परनिराकरणपर्यन्तो व्यापारः **पराक्रमः** ।

सत्यकामसत्यसङ्कल्पशब्दौ इह भावप्रधानौ, कर्मधारयवृत्तौ वा; **सत्यकामत्वम्** - नित्यभोग्यवत्वम्; **सत्यसङ्कल्पत्वम्** - स्वावतारपर्यन्तापूर्वभोग्यसृष्ट्यादावमोघ-सङ्कल्पत्वम् । **कृतित्वम्** - परोपकारकत्वम्, आश्रितरक्षणेन कृतकृत्यं वा, 'न मे पार्थास्ति कर्तव्यम्' (भ.गी.३-२२) इत्याद्युक्तं विहितकर्तव्यनिरपेक्षत्वं वा, धर्मसंस्थापकानुष्ठानवत्त्वं वा, परेषां स्वहितप्रवृत्तेः पूर्वमेव कर्तुमुपक्रान्तपरहितत्वं वा स्वेन कृतं सर्वं प्रति स्वस्यैव शेषित्वं वा ।

कृतज्ञताद्यसङ्ख्येय-कल्याण-गुणगणौघ-महार्णवम्;
परब्रह्मभूतम्, पुरुषोत्तमम्, श्रीरङ्गशायिनमस्मत्-स्वामिनम्,

र.र. - कृतज्ञता - सकृदञ्जलिकर्तुरपि अनुबन्धिपर्यन्तसंरक्षणाय तत्कृतानुदर्शनम्, अवसरे संश्रितापेक्षितकरणाय स्वकृतप्रत्याख्यानानुदर्शित्वं वा; 'शिरसा याचतस्तस्य वचनं न कृतं मया' (रा.यु.२४-२१) इति ह्याह । **आदि**शब्देन तत्र तत्र प्रसिद्धा आनृशंस्यादयो गृह्यन्ते । 'यथा रत्नानि जलधेरसङ्ख्येयानि पुत्रक!' (वाम.पु.७४-४०) इत्यादिस्मारणाय **असङ्ख्येय**त्वोक्तिः । अत्र **दोषासंस्पृष्टत्वं कल्याणगुण**युक्तत्वं च वदता निर्गुणश्रुतेः पशुच्छागोत्सर्गापवादनयाभ्यां दोषरूपविशेषनिषेधपरत्वं सूच्यते ।

परब्रह्मेत्यादि - उक्तं सर्वस्मात् परत्वं स्वसाम्यप्रदानपर्यन्तं सौलभ्यं च 'नारायणः परं ब्रह्म' (महाना.उ.११-२५) 'परं ब्रह्म परं धाम' (भ.गी.१०-१२) इत्यादिश्रुतिस्मृति-सिद्धप्रकारेण स्थिरीकरोति - **परब्रह्म** इति । यद्यपि 'ब्रह्म परिबृढं सर्वतः' (निरुक्तम्.१-३) इति निरुक्तकारवचनात् **ब्रह्म**शब्द एव परत्वं वदन् नाम च भवति, तथाऽप्यौपचारिक-प्रयोगव्यवच्छेदाय **पर**शब्दः ।

अत्र 'बृहति बृंहयति' (अ.शि.२) इति निरुक्तिभ्यां व्यापित्वकारणत्वादिसिद्ध्या शङ्कितान् दोषान् परिहर्तुं भेदश्रुत्याद्यर्थगर्भया भगवद्गीता (भ.गी.१५-१८) निरुक्तया समाख्यया विशिनष्टि - **पुरुषोत्तमम्** इति । अनेन ब्रह्मशब्दार्थतया कुदृष्टिविकल्पित-प्रकारान्तराणि, तामसतन्त्राद्युक्तव्यक्त्यन्तराणि च व्यवच्छिद्यन्ते । अस्य च पञ्चम्यादिविभक्तित्रयेऽपि समासः संभवति ।

एवं सर्वाधिकत्वेन अस्मदादिभिर्दुरधिगमः स्यादिति शङ्कां परिहरन्, द्वाभ्यां विशेषणाभ्यां सौलभ्यकाष्ठां व्यनक्ति - **श्रीरङ्गशायिनम् अस्मत्स्वामिनम्** इति । स्वरूपाद्विग्रहस्य सुखानुसन्धेयतया सौलभ्यमधिकम्; तस्मादप्यर्चावतारस्य भक्ताभिमतसर्वदेशकाल-संनिधायितया परव्यूहादिभ्योऽधिकतमम् । तदा काष्ठाप्राप्तं परत्वमपि तत्र भक्तोपलभ्यं शास्त्रादवसेयम्; यथोक्तम् - 'सर्वातिशायि षाड्गुण्यं संस्थितं मन्त्रबिम्बयोः' (वि.सं.) इति । अत्र मनुष्याणामपि कैङ्कर्योद्देश्यतया अवस्थितस्य निर्भयसेवादियोग्यत्वम् **अस्मत्स्वामि**शब्दाभि-प्रेतम् । यथाऽऽहुः - 'अर्च्यः सर्वसहिष्णुरर्चकपराधीनाखिलात्मस्थितिः' (श्रीरं.स्त.२-७४) इति । यद्वा स्वाचार्यसन्तानसेवितत्वेन प्रीत्यतिशयहेतुत्वमभिप्रेत्य **अस्मत्स्वामि**शब्दः । प्राचीनरामानुज इव 'अहमप्यस्य शीलादिगुणैर्दास्यमुपागतः' (रा.कि.४-१२) इति च भावः । एवं कैङ्कर्यप्रतिसम्बन्धितया अनुभाव्यं निर्धारितम् ।

प्रबुद्ध-नित्यनियाम्य-नित्य-दास्यैक-रसात्म-स्वभावोऽहम्,

तदेकानुभवः; तदेकप्रियः; परिपूर्ण-भगवन्तम्;

विशदतमानुभवेन निरन्तरमनुभूय; तदनुभवजनितानवधिकातिशय-

र.र. - अथात्माभिमानानुगुणपुरुषार्थव्यवस्थासिद्ध्यर्थमनुभवितुः किङ्करस्य स्वात्मनः स्वरूपाविर्भावदशामाह - **प्रबुद्ध** इति । **प्रबुद्धम्** - प्रकर्षेणावगतम्, स्वाधीनस्वार्थकर्तृत्व-भ्रमविरहेण सम्यग्दृष्टमित्यर्थः । **नियाम्यत्वदासत्वे** 'स स्वराड् भवति' (छां.उ.७-२५-२) इत्याम्नातायां मुक्तिदशायामप्यनुवृत्ते इति ज्ञापनाय द्वयोरपि **नित्यत्वो**क्तिः । निरपेक्षस्वातन्त्र्यनिरुपाधिकशेषित्वप्रसङ्गपरिहाराय **एकरस**शब्दः । अत्र **आत्म**शब्दः स्वविषयः । **स्वभाव**शब्दो यावदात्मभाव्याकारमाह । ईदृशात्मस्वरूपमपि 'व्यतिरेकस्तद्भावभावित्वात्' (ब्र.सू.३-३-५४) इति नयेन परमप्राप्यविशेषणतया फलकोटिनिविष्टमनुसन्धेयमिति व्यञ्जयितुम् अधिको **अहं**शब्दः ।

नित्यनियाम्यत्वप्रबोधकाष्ठामाह - **तदेकानुभव** इति । तस्मिन्नेकस्मिन्नेव प्रधानतया अनुभवो यस्य स तथोक्तः । आविर्भूतस्वरूपस्य हि भगवदपृथक्सिद्धविशेषणतया तत्प्रधानतयैव स्वानुभवं 'अविभागेन दृष्टत्वात्' (ब्र.सू.४-४-४) इत्यसूत्रयत् । नित्यदास्यैकरसत्वाविर्भावस्य फलमाह - **तदेकप्रिय** इति । स एव प्रधानतया नित्यं प्रियो यस्य स **तदेकप्रियः ।** न हि तद्दास्यैकरसस्यास्य 'रसो वै सः' (तै.उ.आन.७) इत्याद्युक्तस्वाभाविकनिरवधिकातिशय-रसस्वरूपात् तस्मादन्यत् तदानीं प्रधानतया आस्वाद्यं भवति । तदेवमनुभाव्यानुभवितारावुक्तौ ।

अथात्रत्यानुभवाद्व्यावृत्तमनुभवप्रकारमाह - **परिपूर्णम्** इति । अनन्तगुणविभूति-विशिष्टस्वरूपे अननुभूतांशरहितमित्यर्थः । **भगवन्तम्** - पराशरादिनिरुक्तप्रकारेणोभयलिङ्गम् । तस्मिन् सामान्यतः सर्वाकारविषयपरोक्षज्ञानात् परिमिताकारविषयप्रत्यक्षज्ञानाच्च व्यावृत्त्यर्थमाह - **विशदतमानुभवेन** इति । तत्राप्यपरिच्छिन्नविषयसान्तरप्रत्यक्षाद्व्यवच्छिनत्ति **निरन्तरम्** इति । **अनुभवेन अनुभूय** - अनुभवेन विषयीकृत्येत्यर्थः । **तदनुभव** इति । अनेन पूर्वोक्तभगवदनुभवानुवादः; यद्वा, **तच्छब्देन** भगवदनुभवः परामृश्यते; तस्य **अनुभवो** अपि स्वयंप्रकाशस्य तस्यैव स्वरूपम्; ईदृशोऽयमनुभूयते मयेत्यनुकूलतमभगवदनुभवस्वरूपोल्लेखांशेन जनिता **प्रीतिः** इहोच्यते । तस्या **अनवधिकातिशय**त्वेन ऐश्वर्याद्यनुभवजनितप्रीतेर्व्यवच्छेदः ।

**प्रीतिकारित-अशेषावस्थोचिताशेषशेषतैकरतिरूप-
नित्यकिङ्करो भवानि! ।। १ ।।**

[स्वगताकिञ्चन्य अनन्यगतित्वचिन्तनपूर्वकं भगवच्चरणारविन्दशरणागतिः]

**स्वात्म-नित्यनियाम्य-नित्यदास्यैकरसात्मस्वभावानुसन्धानपूर्वक-
भगवदनवधिकातिशय-स्वाम्याद्यखिलगुणगणानुभवजनित-
अनवधिकातिशय-प्रीतिकारिता अशेषावस्थोचिताशेष-शेषतैकरतिरूप-**

र.र. – ईश्वरेच्छाधीनेऽपि कैङ्कर्ये स्व**प्रीतिकारित**त्वोक्तिः; नियोगनैरपेक्ष्यम्, प्रीतेः प्रेरकत्वातिशयं च व्यनक्ति । **कारित**शब्द इह शेषतायां वा, तदेकरतौ वा शेषवृत्तं प्रति प्रयोज्यकर्तरि किङ्करे वा अन्वेतव्यः । **अशेषावस्था**शब्देन सेव्यस्य भगवतः परत्वव्यूहत्वादयः, सेवकस्य च मुक्तस्य सदेहत्वविदेहत्वादिरूपा अवस्थाः सर्वा विवक्षिताः । **शेषता** अत्र शेषवृत्तिः । अभिमतसर्वशेषवृत्तिषु अभिघातमभिप्रेत्य **अशेष**शब्दः । स्वामिप्रीत्यर्थत्वाविशेषेण परस्परैकरस्यात् परकृताऽपि शेषवृत्तिः स्वकृतेव भवतीति भावः । ईश्वरस्य मुक्तस्य च स्वच्छन्दानेकदेहपरिग्रहेण वा अनन्तगरुडादिवृत्तिसजातीयकैङ्कर्यसिद्धिः । आत्मा आत्मीयं वा सर्वम् **अशेष**शब्देनोच्यते; तदा तस्य **शेषता** शेषभाव एव । एवं विधायाम् **अशेषशेषतायाम्** एव **रतिः** - प्रीतिरिच्छा वा **रूपम्** - निरूपकधर्मो यस्य सः **अशेषशेषतैकरतिरूपः । नित्यकिङ्करो भवानि** - उत्तरावधिरहितकैङ्कर्यसाम्राज्यवान् भवेयमिति भावः ।

एवं न्यासोपासनसाधारणाधिकारसिद्ध्यै प्रथमं फलपर उत्तरखण्डो विवृतः । अथोपायपरं पूर्वखण्डं विवृण्वन् तत्रोत्तमपुरुषविवक्षितमाकिञ्चन्यरूपं प्रपत्तेर्विशेषाधिकारम्, कार्पण्यरूपमङ्गं च व्यनक्ति - **स्वात्मनित्यनियाम्य** इति । **स्वात्म**शब्दोऽनुसन्धातृस्वरूपपरः । अत्र शेषशेषितत्कैङ्कर्यचिन्तनरसेन तदनुवृत्तिवाञ्छया च पूर्वोक्तस्यैव परमपुरुषार्थस्य विस्तरेणानुवादः । **नियाम्य**शब्दोऽत्र भावप्रधानः । **अनवधिकातिशयस्वाम्यम्** - अनवच्छिन्नसर्वविषयस्वामित्वम् । **आदि**शब्देन तथाविधनियन्तृत्वादिसङ्ग्रहः ।

ऐश्वर्यादिफलान्तरात् कादाचित्कभगवत्कैङ्कर्याच्च व्यावृत्त्यर्थं **नित्यकैङ्कर्य**शब्दौ । **उपायभूत** इति च्विप्रत्ययरहितप्रयोगेण मोक्षप्रदत्वं भगवद्भक्तेः स्वभावप्राप्तमिति व्यज्यते ।

नित्यकैङ्कर्यप्राप्त्युपायभूत-भक्ति-तदुपाय-सम्यग्ज्ञान-तदुपाय-समीचीनक्रिया-तदनुगुण-सात्त्विकताऽऽस्तिक्यादि-समस्तात्म-गुण-विहीनः; दुरुत्तरानन्त-तद्विपर्ययज्ञानक्रियानुगुणानादि-पापवासना-महार्णवान्तर्निमग्नः; तिलतैलवत्-दारुवह्निवत् दुर्विवेच-त्रिगुण-क्षणक्षरण-स्वभाव-

र.र. - **भक्ति**शब्द इह वेदान्तोदितसपरिकरभक्तियोगपरः । **ज्ञानक्रिया**शब्दाभ्यां ज्ञानकर्मयोगौ विवक्षितौ; तयोः **सम्यक्त्वं** यथावस्थितसकलाङ्गोपसंहारवत्त्वम् । ज्ञानयोगमन्तरेणापि कर्मयोगेनैवात्मावलोकनपूर्वकभक्तियोगाधिकारारोहणस्य 'भगवद्गीताभाष्य' (३-१९) प्रपञ्चितस्याधिकारिविशेषनियततया तदनादरेणात्र स्वारसिकक्रमनिर्देशः । **सात्त्विकता** 'नित्यसत्त्वस्थः' (भ.गी.२-४५) इत्युक्तसत्त्वनिष्ठता; तस्याः फलम् **आस्तिक्यादिगुण**जातम् । अवस्थाभेदेन तस्या हेतुश्च । 'अमानित्वमदम्भित्वम्', (भ.गी.१३-७) 'दया सर्वेषु भूतेषु' (वि.पु.३-८-५३) इत्याद्युक्तात्मगुणान्तरसङ्ग्रहाय **समस्त**शब्दः । प्रपत्त्यपेक्षितज्ञान-विश्वासादेस्त्विह न प्रतिषेधः । एवमुपायान्तरतदुपायपरम्परहानिरुक्ता ।

अथ पूर्वं पश्चाच्च उपायप्रतिबन्धकापायपरम्परान्वयमाह - **दुरुत्तर** इति । **दुरुत्तर**त्वं भगवत्सङ्कल्पमन्तरेण सनकादिभिरपि लङ्घयितुमशक्यत्वम् । **तच्छ**ब्देन पूर्वोक्तसम्यग्ज्ञानादि-परामर्शः । **विपर्यय**शब्दोऽत्र विपरीतपरः; स च ज्ञानादिषु त्रिष्वन्वीयते । त्रयाणां हेतुः **पापवासना ।** बीजाङ्कुरन्यायसूचनाय **अनादि**शब्दः । पापानां वासना सजातीयपापान्तरारम्भ-रुचिहेतुभूतः स्वभावविशेषः । षडूर्मिसङ्कुलत्वादिविवक्षया **महार्णव**त्वरूपणम् ।

एवंविधस्य पापस्य आत्मतिरोधायकत्वप्रकारमाह - **तिलतैलवत्** इति । दृष्टान्तद्वयेन 'दारूण्यग्निर्यथा तैलं तिले तद्वत्पुमानपि । प्रधानेऽवस्थितो व्यापी' (वि.पु.२-७-२८) इति वचनं स्मार्यते । अल्पश्रुतैः पृथक् ज्ञातुम्, अयोगिभिः पृथक् द्रष्टुम्, अनीश्वरैः पृथक्कर्तुं च अशक्यतया **दुर्विवेच**त्वोक्तिः । चतुर्दशाध्यायोक्तगुणत्रयबन्धकत्वप्रकारज्ञापनाय **त्रिगुण**शब्दः । अनुकूलपरिणतेः क्षणमपि व्यवस्थापयितुमशक्यत्वमभिप्रेत्याह - **क्षणक्षरणस्वभाव** इति ।

'अचेतना परार्था च नित्या सततविक्रिया ।
त्रिगुणा कर्मिणां क्षेत्रं प्रकृते रूपमुच्यते ।।

अचेतन-प्रकृति-व्याप्तिरूप-दुरत्यय-भगवन्माया-तिरोहित-स्वप्रकाशः;
अनाद्यविद्या-सञ्चित-अनन्ताशक्य-विस्रंसन-कर्मपाश-प्रग्रथितः,
अनागतानन्तकाल-समीक्षयाऽपि अदृष्टसन्तारोपायः,

र.र. - 'व्याप्तिरूपेण सम्बन्धस्तस्याश्च पुरुषस्य च ।
स ह्यनादिरनन्तश्च परमार्थेन निश्चितः' ।। (परम.सं.२) इति परमसंहितोक्तम् **अचेतनप्रकृतिव्याप्ति**शब्दैर्दर्शितम् । **प्रकृतौ व्याप्तिः** अनुप्रवेशः; **प्रकृतेर्व्याप्तिः** सर्वतः सम्बन्धः । अत्र तस्या इव तत्सम्बन्धस्यापि विचित्रसृष्ट्युपयोगित्वाविशेषात् **माया**त्वोक्तिः । **दुरत्ययभगवन्माया** इत्यनेन 'मम माया दुरत्यया' (भ.गी.७-१४) इति पदत्रयसूचनम् । यद्यप्यात्मस्वरूपं नित्यस्वप्रकाशम्; तथाऽपि तस्य भगवच्छेषत्वादिविशिष्टाकारगोचर-धर्मभूतज्ञाननिरोधमभिप्रेत्य **तिरोहितस्वप्रकाश** इत्युक्तम् । स्वस्वरूपतिरोधानवचनेन 'भगवत्स्वरूपतिरोधानकरीम्' (श.ग.) इत्याद्युक्तमप्युपलक्ष्यते ।

प्रकृतेस्तिरोधायकत्वं कर्मोपाधिकम् । कर्म च भोगैस्तत्तत्प्रतिपदोक्तप्रायश्चित्तैर्वा निश्शेषयितुमशक्यमित्यभिप्रायेणाह - **अनाद्यविद्या** इति । अत्र **अविद्या**शब्देनाज्ञानं देहात्मभ्रमादिकं च गृह्यते, तस्याश्च कर्महेतुत्वं रागद्वेषद्वारा । 'यद्ब्रह्मकल्प' (वै.स्त.६२) इत्याद्युक्तप्रक्रियया **अनाद्यविद्यासञ्चित**त्वेन आनन्त्यात्, प्रत्येकं प्राबल्याच्च भगवद्व्यतिरिक्तैः **अशक्यविस्रंसन**त्वम् ।

'पशवः पाशिताः पूर्वं परमेण स्वलीलया ।
तेनैव मोचनीयास्ते नान्यैर्मोचयितुं क्षमाः' ।। (श्रीवि.त.१-२-१०)
इत्याद्युक्तसूचनाय **कर्मणः पाश**त्वरूपणम् । **प्रग्रथितः** - दृढं निबद्धः; 'नाभुक्तं क्षीयते कर्म' (ब्र.वै.२६-७०) इति हि स्मर्यते ।

उक्तप्रतिबन्धकभूयस्त्वात् 'त्वत्पादकमलादन्यत्' (जि.स्तो.१-१०) इत्याद्युक्तप्रकारेण कालान्तरेऽप्युपायान्तरसम्भावनां प्राङ्न्यायेन प्रतिषेधति - **अनागत** इति । वक्ष्यमाण-**श्रीमत्त्वनारायण**त्वाभ्यां फलितम् 'सर्वस्य शरणं सुहृत्' (श्वे.उ.३-१७) 'देवानां दानवानां च' (जि.स्तो.१-२) 'सर्वलोकशरण्याय' (रा.यु.१७-१५) 'विभीषणो वा सुग्रीव (धर्मात्मा) यदि वा रावणः स्वयम्' (रा.यु.१८-३५) इत्यादिप्रसिद्धं स्वसङ्ग्रहोपयुक्तं स्वभावमाह -

निखिलजन्तुजातशरण्य!

श्रीमन्! नारायण! तव चरणारविन्दयुगलं शरणमहं प्रपद्ये ।। २ ।।

[शरण्ये भगवति महाविश्वासपूर्वकं नित्यकिङ्करतालाभप्रार्थना]

एवमवस्थितस्याऽपि

र.र. - निखिलजन्तुजातशरण्य इति । हिरण्यगर्भादीनामपि सङ्ग्रहाय **निखिल**शब्दः; तेऽपि हि कर्माधीनजन्मभागितया जन्तवः ।

'पशुर्मनुष्यः पक्षी वा ये च वैष्णवसंश्रयाः ।
तेनैव ते प्रयास्यन्ति तद्विष्णोः परमं पदम्' ।। (शां.स्मृ.१-१५)
'एतन्निष्ठस्य मर्त्यस्य मुक्तिर्हस्तस्थिता सदा ।
तत्सम्बन्धिन एवापि मुक्तिमेष्यन्ति वै ध्रुवम्' ।। (भा.स्मृ.)

इत्याद्यर्थमभिप्रेत्य **जात**शब्दः । स च अत्र गुणप्रधानतया अन्वितव्रातपरः ।

पूर्वखण्डपदक्रमानुसारेण **श्रीमत्** इत्यादीनि पदानि । **श्रीमत्** शब्देन 'लक्ष्म्या सह हृषीकेशः' (ल.तं.२८-१४) इत्याद्युक्तं सूच्यते । सर्वशरण्यत्वौपयिकसम्बन्धगुण-विशेषादिप्रदर्शनाय **नारायण**शब्दः । कृपोत्तम्भकत्वातिशयादौचित्याच्च **चरण**ग्रहणम् । उपायदशायामपि भोग्यत्वसूचनाय **अरविन्द**त्वरूपणम् । **शरण**शब्दः इहोपायपरः । उत्तमपुरुषविवक्षिताधिकारिविशेषव्यञ्जनाय **अहं**शब्दः; अधिकारविरहादुपायान्तरेषु निराशः, प्रत्यवायभयादिदानीमपायेभ्य उपरतः, शरण्यगुणविवेकादतिशङ्कानिर्मुक्तः, संसारे दोषदर्शनात् परित्यक्तप्रयोजनान्तरतदुपायः, परमपुरुषार्थसङ्गात् प्रार्थनान्वितभरन्यासो-द्यतश्चेति भावः । **शरणं प्रपद्ये** - उपायतया आश्रयामि । अकिञ्चनोऽनन्यगतिरहं श्रीमति नारायणे स्वात्मरक्षाभरं निक्षिपामीत्युक्तं भवति । अत्र सविशेषण**नारायण**शब्देन विरोधिभूयस्त्व-प्राप्यगौरवोपायलाघवादिमूलशङ्कानिरासहेतवः शरण्याकारा विवक्षिताः ।।

अथ तत्फलितं सोपसर्गधातूक्तम् 'रक्षिष्यतीति विश्वासादभीष्टोपायकल्पनम्' (ल.तं.१७-७७) 'गोप्तृत्ववरणं नाम स्वाभिप्रायनिवेदनम्' (ल.तं.१७-७८) इति विभज्य निर्दिष्टमङ्गद्वयम् -

'प्रार्थनामात्रसन्तुष्टो जन्तोर्यच्छति वाञ्छितम् ।
इति निश्चित्य भगवत्प्रार्थना शरणागतिः' ।। (अहि.सं.) ।

अर्थित्वमात्रेण-परमकारुणिको भगवान्;
स्वानुभवप्रीत्योपनीतैकान्तिकात्यन्तिक-नित्यकैङ्कर्यैकरतिरूप-नित्यदास्यं
दास्यतीति विश्वासपूर्वकं; भगवन्तं नित्यकिङ्करतां प्रार्थये ।। ३ ।।

[भगवदनुभवकारित प्रीतिजन्यदास्यादिकानुग्रहप्रार्थना]

तवाऽनुभूति-सम्भूत-प्रीति-कारित-दासताम् ।
देहि मे कृपया नाथ! न जाने गतिमन्यथा ।। ४ ।।

र.र. - इत्युक्तप्रकारविशेषोपलक्षितप्रकारिवैशिष्ट्याभिप्रायेणाह - **एवम्** इति । **एवमवस्थितस्य** इत्यनेन अधिकारवैगुण्यं विरोधिभूयस्त्वं च पूर्ववाक्योक्तमेव शरण्यगुणप्रकर्ष-व्यञ्जनायानूदितम् । **अर्थित्वमात्रेण** इति उपायलाघवोक्तिः; अहृदयप्रार्थनावाक्यमात्रमपि, 'नेहाभिक्रमनाशोऽस्ति' (भ.गी.२-४०) इति न्यायात् अन्ततः कार्यकरमिति भावः । अथवा, अत्र सकृत्कर्तव्यभरन्यासलक्षणतया सद्यः स्वाभीष्टसिद्धिः । **स्वानुभवप्रीति** इत्यादिना प्राप्यगौरवप्रकाशनम् । उक्तैर्हेतुभिः सम्भवन्तीं शङ्कामपाकर्तुं **परमकारुणिको भगवान्** इति सुलभत्वपरत्वसूचकपदद्वयोक्तिः; ईदृशस्य हि सर्वविधिनिवर्तनार्हता । समर्थस्य निर्दयत्वे, दयालोश्चासमर्थत्वे शरण्यत्वं न स्यादिति तत्सिद्ध्यर्थमुभयोक्तिः । **स्वानुभव** इत्यत्र **स्व**शब्दः परमात्मविषयः । **ऐकान्तिक**त्वम् अनन्यविषयत्वम् । **आत्यन्तिकत्वम्** इह फलान्तरोपाधिकनिवृत्तिरहितत्वम्, अत एव पश्चाद् यावत्कालम् अनुवर्तमानत्वं वा । **दास्यकिङ्करता**शब्दाविह वृत्तिपरौ । **रति**शब्देन विश्वासस्य महत्त्वरूपप्रकारोऽभिप्रेतः । प्रार्थनाशब्दस्य इच्छामात्रेऽपि प्रयोगसम्भवात् तद्व्यावृत्त्यर्थं 'तदेकोपायता याच्ञा' (भरतमुनिवाक्यम्) इत्युक्तयाचनरूपत्वं व्यञ्जयितुं द्विकर्मकप्रयोगः ।

सर्वस्य प्रार्थितप्रदानसामर्थ्यम्, कैङ्कर्यप्रतिसम्बन्धिनस्तस्योभयलिङ्गत्वं च ज्ञापयितुं **भगवन्तम्** इत्युक्तम् । अस्मिन् वाक्ये प्रातिकूल्यवर्जनस्य आनुकूल्यसङ्कल्पस्य च अर्थसिद्धत्वम् अवगन्तव्यम् ।

उक्तप्रकारसाध्यसाधनरूपमर्थद्वयं व्याख्येयक्रमेण सुखप्रतिपत्त्यर्थम् ऐतिहासिक-श्लोकद्वयेन स्ववाक्यायमानेन संक्षिप्याह - **तव** इति । यद्यपि प्रथमश्लोकेऽपि पूर्वार्धे फलमुपादीयते, तथाऽप्यसौ **देहि** इत्युक्तप्रार्थनाप्राधान्यादुपायपरः । अत्र **दासता**शब्देन दासवृत्तिर्विवक्षिता, दासभावमात्रस्य च नित्यसिद्धत्वेन साध्यत्वायोगात् । **मे** - अनन्यप्रयोजनस्य

सर्वावस्थोचिताशेष-शेषतैकरतिस्तव ।
भवेयं पुण्डरीकाक्ष! त्वमेवैवं कुरुष्व! माम् ।। ५ ।।
एवम्भूत-तत्त्वयाथात्म्यावबोध-तदिच्छारहितस्यापि,

र.र. - अनन्योपायस्य च । **कृपया नाथ** इति पदाभ्यां गुणविशेषसम्बन्धविशेषविशिष्टस्योपायभाव इति व्यज्यते; **नाथ**शब्दो हि नाथ्यते इति व्युत्पत्या रक्षणार्थं प्रार्थनीये स्वामिनि रूढः । **न जाने गतिमन्यथा** इति । उक्तप्रकारात् प्रपत्तिमात्रवशीकार्यात् त्वत्तोऽन्यथाभूतं मदर्हमुपायं सर्वशास्त्रपरामर्शेऽपि न पश्यामि, देवतान्तराणां साक्षात् मोक्षप्रदत्वाभावात् मोक्षोपायतया चोदितस्य त्वदुपासनस्य मया दुःसाधत्वादिति भावः । यद्वा, **अन्यथा** इति अनेन त्वय्यदातरीति विवक्षितम् ।।

एवं प्रार्थिते कैङ्कर्यरूपे पुरुषार्थे **प्रीति**शब्दोक्तं हेत्वंशं विशिंषन्, स्वाभीष्टप्रदाने स्वप्रयत्नान्तरनैरपेक्ष्यं च अपेक्षते - **सर्व** इति । **सर्वावस्था**शब्द**शेषता**शब्दौ पूर्वोक्तार्थौ । तत्तद्दशायां स्वाम्यभिमतप्रकार **उचित**शब्दः । 'जायमानं हि पुरुषम्' (म.भा.शां.३५८-७३) 'कृपामयमपाङ्गं ते सकृन्मयि निपातय' (वि.ध.) इत्याद्युक्तेन सत्त्वोन्मेषहेतुना कटाक्षविशेषेण मामेवं कुरुष्वेत्यभिप्रायेणोक्तम् - **पुण्डरीकाक्ष** इति । यद्वा 'पुण्डरीकं परं धाम' (म.भा.शां.६९-६) इत्यादिनिरुक्तेनानेन नाम्ना परमपदवासिनः परिचरणं प्रार्थ्यत इति सूच्यते । त्वदितराशक्ये अस्मिन्नर्थे त्वयि च निरपेक्षोपाये किमीदृशभरन्यास-रूपव्याजातिरिक्तमत्प्रयत्नेनेत्यभिप्रायेणाह - **त्वमेव** इति । **त्वम्** - सर्वज्ञः सर्वशक्तिः परमकारुणिकः । **माम्** - आकिंचन्यानन्यगतित्वार्थित्वशालिनम् । त्रितोर्धात्वोरिह **भवेयं, कुरुष्व** इति परस्मैपदात्मनेपदाभ्यां स्वस्य भगवतश्च यथार्हं क्रियाफलान्वयः सूच्यते ।

नन्विह शरण्यशरणागतितत्फलविशेषनिर्धारणपूर्विका फलकामना हि अधिकारिविशेषणम्, न पुनस्तद्वत इव तथाविधतद्वचनमात्रमित्यत्र 'अनिच्छन्नप्येवम्,' (स्तो.र.५९) इति श्लोकोक्तप्रकारेण सप्रश्रयं प्रतिवक्ति - **एवंभूत** इति । **तदिच्छा** इति इच्छाविषयत्वेन परामृश्यमानार्थत्वात् **तत्त्व**शब्द इह पुरुषार्थपरः, पुरुषार्थविशेष-निष्कर्षाय जीवात्मपरमात्मतत्त्वपरो वा । **अवबोध इच्छा** वा **तदिच्छा** इत्युच्यते; तदा पुरुषार्थेच्छाविरहः कैमुत्यात् सिद्ध्यति । श्रियःपत्युस्तव प्रसादादद्य साधिकारोऽस्मि, निरधिकारत्वेऽपि लब्धव्याजेन त्वया शेषपूरणं कार्यमिति द्योतयितुम् **अपि**शब्दः ।

एतदुच्चारणमात्रावलम्बनेन; उच्यमानार्थ-परमार्थनिष्ठं मे मनः, त्वमेवाद्यैव कारय! ।। ६ ।।

[भगवति नमनीयताचिन्तनपूर्वकं स्वाभाविकं नमनम्]

अपारकरुणाम्बुधे! अनालोचितविशेषाशेषलोकशरण्य! प्रणतार्तिहर! आश्रितवात्सल्यैकमहोदधे!

र.र. - एवमधिकारवैकल्यं, अङ्गवैकल्यं, अङ्गिवैकल्यं च अन्वारुह्योक्तम् - **उच्चारणमात्रा** इति । वैषम्यदोषप्रसङ्गपरिहारहेतुस्तव सिद्ध इत्यभिप्रायेण **अवलम्बन**शब्दः । **उच्यमानार्थः**- उपायोपेयरूपः । **एतत्** शब्दोऽप्यत्र तद्विषयः । अन्यतरविषयत्वेऽपि तदितरस्यार्थात् सिद्धिः । **परमार्थनिष्ठ**त्वं अज्ञानसंशयविपर्ययरहितव्यवसायानुवृत्तिमत्त्वम् । **मे** - 'सकृदुच्चारो भवति' (द्वयोपनिषत्) 'सकृदुच्चरितं येन' (वि.ध.७०-८४) 'भव शरणमितीरयन्ति ये वै' (वि.पु.३-७-३३) इत्याद्युक्तवचनमात्रधनस्य त्वदायत्तसर्वसिद्धेः **मनः** - 'चञ्चलं हि मनः कृष्ण!' (भ.गी.६-३४) 'मनो दुर्निग्रहं चलम्' (भ.गी.६-३५) 'बन्धाय विषयासङ्गि' (वि.पु.६-७-२८) इत्याद्युक्तदोषमपि हृषीकेशेन त्वया अनुगृहीतानां सम्यङ्मननसाधनम् । शरण्यस्यापेक्षणीयान्तराभावम्, आत्मनस्त्वरातिशयं च व्यनक्ति - **त्वमेवाद्यैव** इति । **कारय** इत्यनेन प्रपत्तावपि स्वस्य प्रयोज्यकर्तृत्वं अध्यात्मशास्त्रैराचार्यमुखेनान्तर्यामितया च भगवतः प्रयोजककर्तृत्त्वं च प्रकाश्यते । अविकलप्रपत्तिप्रयोगस्यापि भाष्यकारस्येदं वाक्यं विकलप्रयोगाणामन्येषामपि शरण्यानुकम्पया क्षिप्रमुपायपूर्तिः स्यादिति ख्यापनार्थम् ।

अथाधिकारोपायफलप्रदानेषु यथार्हमुपयुक्तान् भगवतः प्रकारान् वदन्, प्रथमं सर्वोपयोगिगुणविशेषप्रकर्षमाह - **अपार** इति । स्वस्मिन्नपि व्याप्तिमभिप्रेत्य **अपार**त्वोक्तिः । तत्फलितं स्वेनाप्याश्रयणीयत्वमभिप्रेत्याह - **अनालोचित** इति । जातिगुणादिनिकर्षानादरेण सर्वैः शरण्यतया वरणीयेत्यर्थः । अनेन प्रपत्तेः सर्वाधिकारत्वं दर्शितम् । कारुणिकोऽपि यदि विषमः स्यात्, समोऽपि यदि निर्घृणः स्यात्, न तदा सर्वशरण्यः स्यादिति तदर्थमुभयोक्तिः ।

शरणागतिसमनन्तरलक्षणीयौ गुणावाह - **प्रणतार्तिहर! आश्रितवात्सल्यैकमहोदधे!** इति । **प्रणताः** इह प्रकृष्टप्रह्वीभावयुक्ताः प्रपन्नाः, तेषां तत्तदभिमतालाभनिमित्तां आर्तिं हरतीति **प्रणतार्तिहरः** । अनेन तु प्रपत्तेः सकलफलप्रदत्वं च सूच्यते । **प्रणत**शब्दस्य प्रह्वीभावमात्रपरत्वे तदार्तिहरणादल्पप्रयत्नप्रसाद्यत्वं प्रकाश्यते । वात्सल्येन गुणान्तरतिरस्कारमभिप्रेत्य **एक**शब्दः, येन सर्वज्ञोऽप्यविज्ञातेव, स्वतन्त्रोऽप्यस्वतन्त्र इव स्यात् ।

अनवरतविदित-निखिल-भूतजात-याथात्म्य!
सत्यकाम! सत्यसङ्कल्प! आपत्सख! काकुत्स्थ!
श्रीमन्! नारायण! पुरुषोत्तम!

र.र. - कारुण्यादिसद्भावेऽप्यज्ञस्यापूर्णस्याशक्तस्य च निरपेक्षरक्षकत्वं न स्यात्, अतस्तत्सिद्ध्यर्थं गुणत्रयम् **अनवरत** इत्यादिभिरुच्यते । **अनवरतनिखिल**शब्दाभ्यां ज्ञानस्य कालतो विषयतश्च निःसङ्कोचत्वोक्तिः; मम अनिष्टनिवर्तनेष्टप्रापणोपयोगिष्वधिकारादिषु किञ्चिदपि कदाचिदपि तवाज्ञातं नास्तीति भावः । न च तव मादृशाकिञ्चनपरित्यागहेतुभूत-प्रत्युपकारपूर्वोपकारादिप्रयोजनान्तरसापेक्षत्वं गुणवैकल्यं वा कदाचिदप्यस्ति; अतो मद्रक्षणेन स्वगुणान् संरक्षेत्यभिप्रायेणाह - **सत्यकाम** इति । नित्यभोग्यानन्तकल्याणगुणादिविशिष्टेत्यर्थः । सङ्कल्पमात्रसाधितजगत्सृष्ट्यादेस्तव मद्रक्षणेऽपि न हि सङ्कल्पादतिरिक्तं सम्पादनीयमित्यभिप्रायेणाह - **सत्यसङ्कल्प** इति । अमोघसङ्कल्पेत्यर्थः । त्वयैव ख्यापितं प्रपन्नविषयं त्वद्व्रतं न कैश्चिदपि प्रतिहन्तुं शक्यमिति भावः ।

उक्तगुणवर्गहेतुकद्रौपदीगजेन्द्रादिसंरक्षणप्रकारं तद्वत् स्वस्याप्यापत्प्रशमनायोद्घाटयति - **आपत्सख** इति । आपदि सखा भवतीति **आपत्सखः;** सखेव प्रीतिविश्वासगोचरः संरक्षकश्चेति भावः । तदेतत् निषादवानरराक्षससर्वजातिसुलभे सकृत्प्रपन्नसंरक्षणव्रतिनि सर्वलोकशरण्ये विषयवासमात्रसंरक्षितजङ्गमस्थावरजन्तुजाते अवतारविशेषे सुव्यक्तमित्यभिप्रायेणाह - **काकुत्स्थ** इति । अनेन 'वधार्हमपि काकुत्स्थः कृपया पर्यपालयत्' (रा.सुं.३८-३४) इत्यादिवाक्यमपि स्मार्यते । अस्य सापराधेष्वप्याश्रितेषु निग्रहोष्मलतानिवारिकया सहधर्मचारिण्या नित्ययोगमाह - **श्रीमन्** इति । परहितेष्वपि स्वार्थप्रवृत्त्यनुगुणसम्बन्धादिविशेषं व्यनक्ति - **नारायण** इति । इदं च पदद्वयं व्याख्येयगत-विशिष्टसिद्धोपायोपेयप्रकाशकम् । नारायणशब्दवाच्य-जगत्सम्बन्धादिशङ्कितदोषनिवृत्त्यर्थं पञ्चदशाध्यायोक्तं काष्ठाप्राप्तं परत्वरूपं वैलक्षण्यं समाख्याति - **पुरुषोत्तम** इति । पुरु सनोतीति **पुरुष**शब्दव्युत्पत्त्या बहुप्रदेषूत्तमत्वं वा विवक्षितम् - स्वाश्रितेभ्यः स्वात्मानमपि सविभूतिकं ददातीति । सर्वापेक्षितसाधकसेवानुगुणां सौलभ्यकाष्ठां सूचयति - **श्रीरङ्गनाथ** इति । उक्तं च अर्चावतारं प्रस्तुत्य भगवता शौनकेन -

'तामर्चयेत् तां प्रणमेत् तां यजेत् तां विचिन्तयेत् ।
विशत्यपास्तदोषस्तु तामेव ब्रह्मरूपिणीम्' ।। (वि.ध.१०३-३०) इति ।

श्रीपौष्करे तु अर्चावतारस्योपायविरोधिवर्गनिवर्तकत्वमपि दर्शितम् -

श्रीरङ्गनाथ! मम नाथ! नमोऽस्तु ते ।। ७ ।।

।। इति श्रीभगवद्रामानुजविरचितं श्रीरङ्गगद्यं सम्पूर्णम् ।।

।। श्रीमते रामानुजाय नमः ।।

र.र. - 'सन्दर्शनादकस्माच्च पुंसां सम्मूढचेतसाम् ।
कुवासना कुबुद्धिश्च कुतर्कश्च कुनिश्चयः ।।
कुहेतुश्च कुभावश्च नास्तिकत्वं लयं व्रजेत्' । (पौ.सं.१-३१,३२) इति ।

स्थानविशेषोऽप्यत्र सेवकानां सत्त्वोन्मेषहेतुत्वाभिप्रायेणोपात्तः । स्वयंव्यक्तसैद्धवैष्णवरूप-भगवत्क्षेत्रवासिनामपि फलविशेषः प्रदर्शितः । श्रीसात्वते -

'दुष्टेन्द्रियवशाच्चित्तं नृणां यत् कलुषैर्वृतम् ।
तदन्तकाले संशुद्धिं याति नारायणालये' ।। (सा.सं.७-१२०) इति ।

तत्रापि स्वाचार्यपरम्पराचिरसेवनजनितप्रसादातिशयात् स्वदोषानादरेण स्वस्यैवं-विधावस्थाप्रदत्वेन प्रार्थितपूरणानुगुणतामभिप्रेत्याह - **मम नाथ** इति । स्वापेक्षितसिद्ध्यर्थं याचनीयः स्वामी **नाथः** । एवमभिमुखीकृते भगवति प्रकृतोपायस्य भरन्यासरूपं प्रधानांशं दमयन्त्यादिवृत्तान्तेषु शरणागतिविषयतया प्रसिद्धेन भगवच्छास्त्रोक्तस्थूलसूक्ष्मादियोजनवता **नमः**शब्देन निगमयन्, प्रयुज्यमानः सोऽयमुपायस्त्वच्छेषतयैव स्वीक्रियतामित्यभिप्रायेणाह - **नमोऽस्तु ते** इति । यद्वा, अत्र परत्र च अपेक्षितं निर्ममत्वसंस्कृतं कैङ्कर्यं **नमः**-शब्दाभिप्रेतम् । **अस्तु** इति आशासनम् । **ते** इत्यत्र प्रकृत्यंशेन प्राप्यत्वप्रापकत्वशेषित्वादि-शालितया निरुपाधिकनमःप्रयोगयोग्यत्वमभिप्रेतम् । चतुर्थी च अत्र तादर्थ्यपरा । इदमेव वाक्यम् आवर्त्यमानं पृथुगद्योक्तस्य प्रतिवचनविस्तरस्य सङ्ग्रहोऽपि भवति; सूत्रादिष्विव प्रयोजनप्रकर्षे सत्यावृत्तेरभियुक्तसंमतत्वात् ।

तत्रायमर्थः - मत्प्रपन्नस्य ते यथामनोरथं मत्कैङ्कर्यं भवतु इति । तदेवं रहस्यत्रयोक्तशरण्यशरणागतितत्फलविशेषाः सन्दर्शिताः ।


'यदत्र संग्रहेणोक्तमनुक्तमपि किञ्चन ।
बृहद्गद्याधिकारे तद्व्यक्तं प्रत्यवमृश्यताम्' ।।

।। इति रहस्यरक्षायां श्रीरङ्गगद्याधिकारः समाप्तः ।।

श्रीः

श्रीमते रामानुजाय नमः

श्रीमन्! नारायण! अशरण्यशरण्य! अनन्यशरणः
त्वत्पादारविन्दयुगलं शरणमहं प्रपद्ये



भगवते शेषभोगे श्रिया सह आसीनाय वैनतेयादिभिः
सेव्यमानाय वैकुण्ठनाथाय समस्तपरिवाराय
श्रीमते नारायणाय नमः

श्रीधराय नमः

श्रियै नमः

श्रीमते रामानुजाय नमः

श्रीभगवद्रामानुजविरचिते गद्यत्रये

श्री वै कु ण्ठ ग द्य म्

[भक्तियोगाख्यश्रेष्ठार्थसन्दर्शनप्रतिज्ञा]

यामुनार्यसुधाम्भोधिम् अवगाह्य यथामति ।
आदाय भक्तियोगाख्यं रत्नं सन्दर्शयाम्यहम् ।। १ ।।

[भगवति शरण्यता, जीवदेवयोः सम्बन्धः जीवस्य प्रपत्तीतरोपायराहित्यं चिन्तनपूर्वकं शरणागतिविधानम्]

स्वाधीन-त्रिविध-चेतनाचेतन-स्वरूप-स्थिति-प्रवृत्ति-भेदम्, क्लेशकर्माद्यशेष-दोषासंस्पृष्टम्, स्वाभाविकानवधिकातिशय-ज्ञान-बलैश्वर्य-वीर्य-शक्ति-तेजः-प्रभृत्यसङ्ख्येयकल्याणगुणगणौघ-महार्णवम्; परमपुरुषं, भगवन्तं नारायणम्; स्वामित्वेन, सुहृत्वेन, गुरुत्वेन च, परिगृह्य; ऐकान्तिकात्यन्तिक-तत्पादाम्बुजद्वय-परिचर्यैकमनोरथः, तत्प्राप्तये च तत्पादाम्बुजद्वयप्रपत्तेः, अन्यन्न मे कल्पकोटिसहस्रेणाऽपि साधनमस्तीति मन्वानः, तस्यैव भगवतो नारायणस्य; अखिल-सत्त्वदयैक-सागरस्य,

र.र. - अनया गद्यद्वयोक्तगमनिकयैव श्रीवैकुण्ठगद्यमपि गतार्थप्रायम् । एतयोः स्वानुष्ठानोक्तिमुखेन शिष्यशिक्षणं कृतम्; तस्मिंस्तु उपदेशमुखेनेति विशेषः । तत्र यदादौ पठ्यते -

'यामुनार्यसुधाम्भोधि अवगाह्य यथामति ।
आदाय भक्तियोगाख्यं रत्नं सन्दर्शयाम्यहम्' ।।

इति; इहासौ भक्तियोगशब्दः स्वयंप्रयोजनभगवदनुसन्धानपरः; अन्यथा, **तत्प्राप्तये च तत्पादाम्बुजद्वयप्रपत्तेरन्यन्न मे कल्पकोटिसहस्रेणापि साधनमस्तीति मन्वानः** इति वक्ष्यमाणविरोधात् । अत एव 'प्रत्यहमात्मोज्जीवनाय' इत्यादिकमपि न

अनालोचित-गुणागणाखण्डजनानुकूलामर्यादशीलवतः, स्वाभाविक-अनवधिकातिशय-गुणवत्तया, देव-तिर्यङ्-मनुष्याद्यखिलजन-हृदयानन्दनस्य; आश्रित-वात्सल्यैकजलधेः, भक्तजन-संश्लेषैकभोगस्य; नित्य-ज्ञान-क्रियैश्वर्यादि-भोग-सामग्री-समृद्धस्य, महा-विभूतेः श्रीमतः चरणारविन्दयुगलम्; अनन्यात्म-सञ्जीवनेन तद्गत सर्वभावेन, शरणमनुव्रजेत् ।। २ ।।

[भगवतः शुभाश्रयस्वरूपस्य यावदायुषम् अहरहश्चिन्तनम् स्वरूपाप्रच्युतये]

ततश्च प्रत्यहम् आत्मोज्जीवनायैवमनुस्मरेत् ।। ३ ।।

[भगवल्लोक-भगवदायतन-भगवन्मण्टप-भगवत्पर्यङ्काः]

चतुर्दशभुवनात्मकमण्डम्, दशगुणितोत्तरं च आवरणसप्तकम्; समस्तं कार्यकारणजातमतीत्य; परमव्योमशब्दाभिधेये; ब्रह्मादीनां वाङ्मनसागोचरे; श्रीमति वैकुण्ठे, दिव्यलोके; सनक-विधि-शिवादिभिरप्यचिन्त्यस्वभावैश्वर्यैः, नित्यसिद्धैः, अनन्तैः, भगवदानुकूल्यैक-भोगैः, दिव्यपुरुषैः महात्मभिरापूरिते, तेषामपि, इयत्परिमाणम्, इयदैश्वर्यम्, ईदृशस्वभावम्, इति परिच्छेत्तुमयोग्ये; दिव्यावरण-शतसहस्रावृते; दिव्यकल्पकतरूपशोभिते; दिव्योद्यान-शतसहस्रकोटिभिरावृते; अतिप्रमाणे, दिव्यायतने, कस्मिंश्चित्, विचित्रदिव्यरत्नमय-दिव्यास्थानमण्टपे; दिव्यरत्नस्तम्भ-शतसहस्रकोटिभिरुपशोभिते; दिव्यनानारत्न-कृतस्थल-विचित्रिते; दिव्यालङ्कारालङ्कृते; परितः पतितैः, पतमानैः, पादपस्थैश्च नानागन्धवर्णैः, दिव्यपुष्पैश्शोभमानैः, दिव्यपुष्पोपवनैरुपशोभिते; सङ्कीर्ण-पारिजातादि-कल्पद्रुमोपशोभितैः, असङ्कीर्णैश्च कैश्चित् अन्तस्थ-पुष्परत्नादि-निर्मित-दिव्य-लीलामण्टप-शतसहस्रोपशोभितैः, सर्वदाऽनुभूयमानैरपि अपूर्ववत् आश्चर्यमावहद्भिः, क्रीडाशैलशतसहस्रैरलङ्कृतैः;

र.र. - मुक्तितत्साधनपरम्; अपि तु 'ज्ञानी तु परमैकान्ती परायत्तात्मजीवनः' (गी.सं.२९) इत्यादिप्रसिद्धे अत्रत्यावस्थाविशेषे मरुदेशपथिकपानीयन्यायेन अलभ्यलाभाश्वासनाभिप्रायम् ।

तेषामपीयत्परिमाणमियदैश्वर्यमीदृशस्वभावमिति परिच्छेत्तुमयोग्ये इति दिव्यायतनविशेषणे तु महत्तरत्वमेव विवक्षितम्, **दिव्यावरण**संवृतत्वादिकथनेनैव तत्परिमाणसिद्धेः । अत्र स्वभावशब्दोऽपि निरतिशयभोग्यत्वादिविषयः । न ह्येवंविधविषयेषु

कैश्चिन्नारायण-दिव्य-लीलाऽसाधारणैः, कैश्चित् पद्मवनालया-दिव्यलीलाऽसाधारणैः; साधारणैश्च कैश्चित्, शुक-शारिका-मयूर-कोकिलादिभिः कोमलकूजितैराकुलैः; दिव्योद्यान-शतसहस्त्रैरावृते; मणि-मुक्ता-प्रवाल-कृत सोपानैः; दिव्यामलामृत-रसोदकैः, दिव्याण्डजवरैः; अतिरमणीयदर्शनैः अतिमनोहर-मधुर-स्वरैराकुलैः; अन्तस्स्थ-मुक्तामय-दिव्यक्रीडास्थानोपशोभितैः; दिव्य-सौगन्धिक-वापी-शत-सहस्त्रैः; दिव्यराजहंसावलीविराजितैरावृते; निरस्तातिशयानन्दैकरसतया च आनन्त्याच्च, प्रविष्टानुन्मादयद्भिः, क्रीडोद्देशैर्विराजिते; तत्रतत्रकृत-दिव्य पुष्प-पर्यङ्कोपशोभिते; नाना-पुष्पासवास्वाद-मत्त-भृङ्गावलीभिः उद्गीयमान-दिव्य-गान्धर्वेणापूरिते; चन्दनागुरु-कर्पूर-दिव्य-पुष्पावगाहि-मन्दानिला सेव्यमाने; मध्ये पुष्पसञ्चयविचित्रिते; महति; दिव्ययोगपर्यङ्के, अनन्तभोगिनि;

[दिव्यमहिषीसहित-भगवद्दिव्यविग्रहस्वरूपस्य ध्यानयोगतो दर्शनम्]

श्रीमद्वैकुण्ठैश्वर्यादि-दिव्यलोकम् आत्म-कान्त्या विश्वमाप्याययन्त्या, शेषशेषाशनादि सर्वं परिजनं भगवतः तत्तदवस्थोचित-परिचर्यायाम् आज्ञापयन्त्या, शील-रूप-गुण-विलासादिभिः आत्मानुरूपया, श्रिया, सहासीनम्; प्रत्यग्रोन्मीलित-सरसिज-सदृश-नयनयुगलम्, स्वच्छनील जीमूत-सङ्काशम्; अत्युज्ज्वल-पीतवाससम्; स्वया प्रभया अतिनिर्मलया अतिशीतलया स्वच्छमाणिक्याभया कृत्स्नं जगद्भासयन्तम्; अचिन्त्य-दिव्याद्भुत-नित्ययौवनस्वभाव-लावण्यमयामृतसागरम्; अतिसौकुमार्यात् ईषत्प्रस्विन्नवदालक्ष्यमाण-ललाट-फलक-दिव्यालकावली-विराजितम्; प्रबुद्ध-मुग्धाम्बुज-चारु-लोचनम्; स-विभ्रम-भ्रूलतम् उज्ज्वलाधरम्; शुचिस्मितम्; कोमल-गण्डमुन्नसम्; उदग्र-पीनांस-विलम्बि-कुण्डल-अलकावली-बन्धुर-कम्बु-कन्धरम्; प्रियावतंसोत्पल-कर्णभूषण-श्लथालकाबन्ध-विमर्दशंसिभिः चतुर्भिराजानुविलम्बिभिर्भुजैः विराजितम्; अतिकोमल-दिव्य-रेखालङ्कृताताम्रकरतलम्; दिव्याङ्गुलीयक-विराजितम्; अतिकोमल-दिव्य-नखावली-विराजित-अतिरक्ताङ्गुलीभिः अलङ्कृतम्; तत्क्षणोन्मीलित-पुण्डरीक-'सरसिज'[1]-सदृश-चरण-युगलम्; अतिमनोहर-किरीट-मकुट-

र.र. - परिच्छेदायोग्यत्वोक्त्या सूरीणां सार्वज्ञ्यहानिः, दिव्यायतनगुणप्रकर्षे तात्पर्याच्च । **प्रविष्टानुन्मादयद्भिः क्रीडोद्देशैः** इत्यत्रापि हर्षप्रकर्षजनकत्वे तात्पर्यम् ।

श्रीमद्वैकुण्ठैश्वर्यादिदिव्यलोकम् - इत्यत्र तु वैकुण्ठशब्देन नगराद्यवान्तरप्रदेशो विवक्षितः; स एव प्रशस्तविभूतिरूपत्वादैश्वर्यशब्देनोपचर्यते । नित्यमुक्तविषयं देव्या

---

१. 'सरसिज' इति अधिकः पाठः ।

चूडाऽवतंस-मकरकुण्डल-ग्रैवेयक-हार-केयूर-कटक श्रीवत्स-कौस्तुभ-मुक्तादामोदरबन्धन-पीताम्बर-काञ्ची-गुण-नूपुरादिभिः अत्यन्त-सुखस्पर्शैर्दिव्यगन्धैः [१]दिव्य[१]भूषणैर्भूषितम्, श्रीमत्या वैजयन्त्या वनमालया विराजितम्; शङ्ख-चक्र-गदाऽसि-शार्ङ्गादि-दिव्यायुधैः सेव्यमानम्; स्वसङ्कल्पमात्रावक्लृप्त-जगज्जन्म-स्थिति-ध्वंसादिके, श्रीमति, विष्वक्सेने, न्यस्त-समस्तात्मैश्वर्यम्; वैनतेयादिभिः स्वभावतो-निरस्त-समस्त-सांसारिक-स्वभावैः; भगवत्परिचर्या-करण-योग्यैः, भगवत्परिचर्यैक-भोगैः; नित्य-सिद्धैः, अनन्तैः यथायोगं सेव्यमानम्; आत्मभोगेनानुसंहित-परादि-काल -दिव्यामल-कोमलावलोकनेन, विश्वमाह्लादयन्तम्; ईषदुन्मीलित-मुखाम्बुजोदर-विनिर्गतेन, दिव्याननारविन्द-[1]शोभाजनकेन[1]; दिव्य-गाम्भीर्य-औदार्य-सौन्दर्य-माधुर्याद्यनवधिक-गुण-गण-विभूषितेन, अतिमनोहर-दिव्य-भाव-गर्भेण; दिव्यलीलालापामृतेन अखिल-जन-हृदयान्तराणि आपूरयन्तम्; भगवन्तं नारायणम्, ध्यानयोगेन दृष्ट्वा;

[जीवात्म-परमात्मनोः स्वाभाविकसम्बन्धचिन्तनं, भगवत्साक्षात्कारनिरीक्षा च]

ततो भगवतो नित्यस्वाम्यम् आत्मनो नित्यदास्यं च यथावस्थितम् अनुसन्धाय; 'कदाऽहं भगवन्तं, नारायणं, मम [2]नाथम्,[2] मम कुलदैवतम्, मम कुलधनम्, मम भोग्यम्, मम मातरम्, मम पितरम्, मम सर्वम्, साक्षात्करवाणि चक्षुषा!' 'कदाऽहं भगवत्पादाम्बुज-द्वयं शिरसा [3]सङ्ग्रहिष्यामि!'[3] 'कदाऽहं भगवत्पादाम्बुज-द्वय-परिचर्याशया निरस्त-समस्तेतर-भोगाशः, अपगत-समस्त-सांसारिक-स्वभावः, तत्पादाम्बुज-द्वयं प्रवेक्ष्यामि!' 'कदाऽहं भगवत्पादाम्बुज-द्वय-परिचर्या-करणयोग्यः तदेकभोगः, तत्पादौ परिचरिष्यामि!' 'कदा मां भगवान् स्वकीयया

र.र. - आज्ञापनं परिचर्याविशेषेषु इच्छोत्पादनमात्रम्, तेषां सर्वज्ञत्वेन ज्ञानोत्पादननैरपेक्ष्यात् । **पुण्डरीकसदृशचरणयुगलम्** - इति अत्र **पुण्डरीक**शब्दः पद्मसामान्यमुखेन रक्ताम्बुजपरः ।

यत्तूक्तम् - **संकल्पमात्रावक्लृप्तजगज्जन्मस्थितिध्वंसादिके श्रीमति विष्वक्सेने न्यस्तसमस्तात्मैश्वर्यम्** इति, तत्र यद्यपि जगव्द्यापारमोक्षप्रदत्वे ब्रह्मलक्षणतया मुक्तेष्विव नित्यसूरिष्वपि सर्वेषु न संभवतः; यद्यपि च भगवान् स्वतः सर्वज्ञः; तथाऽपि 'प्रियेण सेनापतिना निवेदितं तथाऽनुजानन्तमुदारवीक्षणैः' (स्तो.र.४२) इति न्यायेन भगवद्दत्ततादृशाधिकारतया तत्तदवसरे जगत्सृष्ट्याद्यर्थं भगवते विज्ञापनवाक्यं विष्वक्सेनो व्याहरति; तदा स्वतः सर्वज्ञो भगवान् तन्निवेदितकारीव क्रीडति; तावन्मात्रेण विष्वक्सेनस्य

---

१. 'दिव्य' इति पारायणे प्रयुज्यते ।

1. शोभाजननेन - अ । 2. कुलनाथम् - आ । 3. धारयिष्यामि - इ ।

अतिशीतलया दृशाऽवलोक्य, स्निग्ध-गम्भीर-मधुरया गिरा परिचर्यायाम् आज्ञापयिष्यति!' इति, भगवत्परिचर्यायाम् आशां वर्धयित्वा;

[स्वस्य भगवते निवेदनम्]

तयैवाशया तत्प्रसादोपबृंहितया भगवन्तमुपेत्य, दूरादेव भगवन्तं शेषभोगे श्रिया सहाऽऽसीनम्, वैनतेयादिभिः सेव्यमानम्, 'समस्तपरिवाराय श्रीमते नारायणाय नमः' इति प्रणम्योत्थायोत्थाय, पुनः पुनः प्रणम्य, अत्यन्त-साध्वस-विनयावनतो भूत्वा, भगवत्पारिषद-गणनायकैः, द्वारपालैः, कृपया स्नेहगर्भया दृशाऽवलोकितः, सम्यगभिवन्दितैः तैस्तैरेवानुमतो भगवन्तमुपेत्य, श्रीमता मूलमन्त्रेण माम् ऐकान्तिकात्यन्तिक-परिचर्याकरणाय परिगृह्णीष्व' इति याचमानः, प्रणम्य, आत्मानं भगवते निवेदयेत् ।। ४ ।।

[नित्यकैङ्कर्येण भगवदुपासनम्]

ततो भगवता, स्वयमेवात्मसञ्जीवनेन; अमर्यादशीलवता, अतिप्रेमान्वितेनावलोकनेनावलोक्य, सर्वदेश-सर्वकाल-सर्वावस्थोचितात्यन्त-शेषभावाय स्वीकृत; अनुज्ञातश्च अत्यन्त-साध्वस-विनयावनतः, किङ्कुर्वाणः, कृताञ्जलि-पुटो भगवन्तमुपासीत ।। ५ ।।

[भगवदवलोकनाविच्छेदः, आनन्दमग्नतया भगवत्पादच्छायायाम् अविरतावस्थितिश्च]

ततश्चानुभूयमान-भावविशेषः, निरतिशय-प्रीत्या; अन्यत् किञ्चित् कर्तुं द्रष्टुं स्मर्तुमशक्तः; पुनरपि शेषभावमेव याचमानो, भगवन्तमेव अविच्छिन्न-स्रोतोरूपेण अवलोकनेनावलोकयन् आसीत ।। ६ ।।

र.र. - जगद्व्यापारव्यपदेशरूपस्तुतिः; **न्यस्तसमस्तात्मैश्वर्यम्** - इत्येतदपि सेनानिर्वहणाद्यर्थाधिकार-प्रदानपरम्; 'स यदि पितृलोककामो भवति संकल्पादेवास्य पितरः समुत्तिष्ठन्ति' (छां.उ.८-२-१) इत्यादिन्यायेन परिमितविषयो वाऽत्र **जगच्छब्दः**; अतो हिरण्यगर्भादिवत् क्वाचित्कप्रभूतसृष्ट्यादिमात्राणास्मिन् ब्रह्मलक्षणप्रसङ्गः । यदपि **आत्मभोगेन अनुसंहितपरावरकालम्** इति, तदपि भगवतः कालविषयमज्ञानं नाभिप्रैति, आनन्दप्रकर्षप्रशंसायां तात्पर्यात् । यच्च **तत्पादाम्बुजद्वयं प्रवेक्ष्यामि** इति मुमुक्षोरभिसंधिरुच्यते, तत्र पूर्वोक्तस्य शिरसा संग्रहणस्य गाढतमत्वं प्रवेशशब्देनाभिप्रेतम् । यदपि **शेषभावाय स्वीकृतः** - इति, तत्र यावदात्मभाविकैङ्कर्यकरणाय संकल्पित इत्यर्थः । एवमन्यदपि सर्वं सुसङ्गतम् इति ।।

ततो भगवता स्वयमेवात्मसञ्जीवनेन अवलोकनेनाऽवलोक्य, सस्मितमाहूय; समस्त-क्लेशापहं, निरतिशय-सुखावहम् आत्मीयं, श्रीमत्पादारविन्दयुगलं, शिरसि कृतं ध्यात्वा; अमृत-सागरान्तर्निमग्न-सर्वावयवः सुखमासीत ।। ७ ।।

।। इति श्रीभगवद्रामानुजाचार्यविरचितं श्रीवैकुण्ठगद्यं सम्पूर्णम् ।।

।। इति श्रीभगवद्रामानुजाचार्यविरचितं गद्यत्रयं सम्पूर्णम् ।।

।। श्रीमते रामानुजाय नमः ।।

द्वयवचनधनानां द्विःप्रयोगानपेक्षे
मुषितनिखिलदोषे मुक्त्युपाये स्थितानाम् ।
अमृतमिव पयोधेराप्तमेतद्यतीन्द्रात्
व्यवृणुत मितगद्यं वेङ्कटेशः सुमेधाः ।।

।। इति रहस्यरक्षायां मितगद्याधिकारः समाप्तः ।।

।। इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य
वेदान्ताचार्यस्य कृतिषु रहस्यरक्षायां
गद्यत्रयभाष्यं समाप्तम् ।।

अनुबन्धाः

१. शरणागतिगद्यभाष्योद्धृतप्रमाणानां अकारादि सूचनी
२. श्रीरङ्गगद्यभाष्योद्धृतप्रमाणानां अकारादि सूचनी
३. वैकुण्ठगद्यभाष्योद्धृतप्रमाणानां अकारादि सूचनी
४. कारिकाणां अकारादि सूचनी
५. सङ्केताक्षरसूचनी

१. शरणागतिगद्यभाष्योद्धृतप्रमाणानां अकारादि सूचनी

२. श्रीरङ्गगद्यभाष्योद्धृतप्रमाणानां अकारादि सूचनी

३. वैकुण्ठगद्यभाष्योद्धृतप्रमाणानां अकारादि सूचनी

४. कारिकाणां अकारादि सूचनी

५. सङ्केताक्षरसूचनी

अ.शि.	अथर्वशिखा
अ.श्लो.	अष्टश्लोकी
अत्रि.स्मृ.	अत्रिस्मृतिः
अहि.सं.	अहिर्बुध्न्यसंहिता
आप.ध.	आपस्तम्बधर्मसूत्रम्
इ.स.	इतिहाससमुच्चयः
उ.रा.	उत्तररामायणम्
कठ.उ.	कठोपनिषत्
का.सं.	काश्यपसंहिता
कौषी.उ.	कौषीतक्युपनिषत्
ग.पु.पू.खं.	गरुडपुराणं पूर्वखण्डम्
गी.सं.	गीतार्थसंग्रहः
च.श्लो.	चतुश्श्लोकी
छां.उ.	छान्दोग्योपनिषत्
जि.स्तो.	जितन्तास्तोत्रम्
जै.ब्रा.	जैमिनीब्राह्मणम्
त.बो.	तत्त्वबोधिनी
तै.आर.	तैत्तिरीय आरण्यकम्
तै.उ.	तैत्तरीयोपनिषत्
तै.उ.आन.	तैत्तिरीयोपनिषत् आनन्दवल्ली
तै.उ.भृ.	तैत्तिरीयोपनिषत् भृगुवल्ली
तै.उ.शि.	तैत्तिरीयोपनिषत् शिक्षावल्ली
तै.ब्रा.	तैत्तिरीयब्राह्मणम्
तै.सं.	तैत्तिरीयसंहिता
द्व.मं.	द्वयमन्त्रम्

धा.पा.	धातुपाठः
नि.ग्रं.	नित्यग्रन्थः
न्या.त.	न्यायतत्त्वम्
परम.सं.	परमसंहिता
पा.सू.	पाणिनीयसूत्रम्
पौ.सं.	पौष्करसंहिता
ब.पौ.	बलपौष्करम्
बृ.उ.	बृहदारण्यकोपनिषत्
ब्र.वै.	ब्रह्मवैवर्तम्
ब्र.सू.	ब्रह्मसूत्रम्
ब्रा.पु.	ब्राह्मपुराणम्
भ.गी.	भगवद्गीता
भ.गी.भा.	भगवद्गीताभाष्यम्
भा.स्मृ.	भारद्वाजस्मृतिः
भाग.	भागवतम्
म.भा.आनु.	महाभारत-आनुशासनपर्व
म.भा.आर.	महाभारत-आरण्यकपर्व
म.भा.आश्व.	महाभारत-आश्वमेधिकपर्व
म.भा.उद्यो.	महाभारत-उद्योगपर्व
म.भा.कर्ण.	महाभारत-कर्णपर्व
म.भा.मोक्ष.	महाभारत-मोक्षपर्व
म.भा.मौ.	महाभारत-मौसलपर्व
म.भा.शां.	महाभारत-शान्तिपर्व
म.भा.सभा.	महाभारत-सभापर्व
म.स्मृ.	मनुस्मृतिः
मं.रा.स्तो.	मंत्रराजस्तोत्रम्
महाना.उ.	महानारायणोपनिषत्

मुं.उ.	मुण्डकोपनिषत्
मै.उ.	मैत्रायणीयोपनिषत्
यो.भा.	योगभाष्यम्
यो.सू.	योगसूत्रम्
र.आ.	रहस्याम्नायः
र.र.	रहस्यरक्षा
रा.अयो.	रामायणं अयोध्याकाण्डः
रा.अर.	रामायणं अरण्यकाण्डः
रा.उत्त.	रामायणं उत्तरकाण्डः
रा.बा.	रामायणं बालकाण्डः
रा.यु.	रामायणं युद्धकाण्डः
रा.सुं.	रामायणं सुन्दरकाण्डः
ल.तं.	लक्ष्मीतन्त्रम्
ल.स.	लक्ष्मीसहस्रनामस्तोत्रम्
व.स्त.	वरदराजस्तवः
वरा.च.श्लो.	वराहचरमश्लोकम्
वरा.पु.	वराहपुराणम्
वाम.पु.	वामनपुराणम्
वि.त.	विष्णुतत्त्वम्
वि.ध.	विष्णुधर्मम्
वि.पु.	विष्णुपुराणम्
वि.सं.	विष्वक्सेनसंहिता
वै.ग.	वैकुण्ठगद्यम्
वै.स्त.	वैकुण्ठस्तवः
श.ग.	शरणागतिगद्यम्
शां.स्मृ.	शांडिल्यस्मृतिः
शौ.सं.	शौनकसंहिता

श्रीगु.र.को.	श्रीगुणरत्नकोशः
श्रीभा.	श्रीभाष्यम्
श्रीरं.स्त.	श्रीरंगराजस्तवः
श्रीवि.त.	श्रीविष्णुतत्त्वम्
श्रीसू.	श्रीसूक्तम्
श्रीस्त.	श्रीस्तवः
श्रु.भा.	श्रुतप्रकाशिकाभाष्यम्
श्वे.उ.	श्वेताश्वतरोपनिषत्
सन.सं.	सनत्कुमारसंहिता
सा.तं.	सात्यकीतन्त्रम्
सा.सं.	सात्वतसंहिता
सु.उ.	सुबालोपनिषत्
स्तो.र.	स्तोत्ररत्नम्
ह.ना.	हनुमन्नाटकम्
हला.को.	हलायुधकोशः

पाठभेदार्थं स्वीकृताः ग्रन्थाः

मातृकाभूतत्वेन स्वीकृतग्रन्थः	लिपिः	सङ्केतः
१. **ईशावास्योपनिषद्भाष्यम्, चतुःश्लोकीभाष्यम्, स्तोत्रभाष्यम्, गद्यभाष्यं च** । उ.वे. श्रीकाञ्ची प्र.भ. अण्णङ्गराचार्यैः परिशोधितम् । श्रीमद्वेदान्तदेशिकग्रन्थमाला, प्रकाशकः - विद्वान् अ. सम्पत्कुमाराचार्यः - ३९ सन्निधिवीधी, काञ्चीवरम्, तमिळुनाडु ।	देवनागरीलिपिः	
२. **चतुःश्लोकीभाष्यम् स्तोत्रभाष्यम्, गद्यत्रयभाष्यं च (वेदान्तदेशिकभाष्यम्)** । चेट्लूर् वा. श्रीवत्साङ्काचार्येण सम्पादितम् । श्री वेदान्तदेशिक सवेन्त् सेंट्रनरि ट्रस्ट् - वेङ्कटेश अग्रहारम्, मैलापुरम्, मद्रास् - ४ ।	देवनागरीलिपिः	**अ**
३. **श्री भगवद्रमानुजविरचित गद्यत्रयम् - (व्याख्यात्रयोपेतम्)** । उ.वे.पु. तिरुवेङ्कटाचार्येण परिशोधितम् । श्रीवैष्णवग्रन्थमुद्रापकसभा, काञ्चीपुरम् - तमिळुनाडु ।	तेलुगुलिपिः	**आ**
४. **गद्यत्रयव्याख्यानङ्गळ् - (व्याख्याद्वयोपेतम्)** । उ.के. श्रीनिवासय्यंगार् स्वामिभिः परिशेधितम् । प्रकाशकः - एस्. कृष्णस्वामी ऐय्यङ्गार्, ३, पुत्तूरु अग्रहारम्, तिरुच्चि - १७ - तमिळुनाडु ।	देवनागरी - तमिळ्	**इ**